षष्कणनदीर्घकालाईानएकपष्कणानितिपाठमुरजान् ९६ ९७ गोरवंमामत्वं ९८ सोदंद्र्मैत्रीकृपांस्लेहंट्यांपरदुःखपहाणेछां ९९
कीर्तिमतांपांडवानांस्तुतिसंहिताबाचइतिसंबंधः १०० आर्योःकुलीनाःवृन्नंगीतिभिरद्धमरथीशोर्यागभशंगारुहंविदुः १०१ १०२ भीष्मपर्वभावदीपे

श्ववास्यंदुदुंभिस्वशतशश्चैवपुष्करान् सिंहनादांश्चविविधान्विनेदुः पुरुषर्षभाः ९६ रथस्थान्पुरुषव्याघ्रान्पांडवान्वेक्ष्यपा
र्थिवाः धृष्टद्युम्नादयः सर्वेऽपनजेहृषिरेतदा ॥९७॥ गोरवंपांडुपुत्राणांतंमासान्मानयतांवतान् दृष्ट्वामहीक्षितस्तत्रपूजयां
चक्रिरेभृशं ९८ सौहृदंचकृपांचैवप्राप्तकालंमहात्मनां दयांचज्ञातिषुपराकथयांचक्रिरेनृपाः ९९ साधुसाध्वितिसर्वे
त्रनिश्चरुस्तुतिसंहिताः ॥वाचः पुण्याःकीर्तिमतांमनोहृदयकर्षणाः १०० म्लेच्छाश्चार्याश्चयेतत्रददृशुः शुश्रुवुस्तदा वृत्तं
तत्पांडुपुत्राणांरुरुदुस्तेसगद्गदा ॥१॥ ततोजघ्नुर्महाभेरीःशतशश्चैवपुष्करान् शंखांश्चगोक्षीरनिभान्दध्मुर्हृष्टमनस्विनः २
इतिभीष्मपर्वणिअध्याय ॥४॥ धृतराष्ट्रउवाच ॥ एवंमहेष्वानीकेषुमामकेषितेषुच केऽपूर्वंप्राहरंस्तत्रकुरवःपांडवास्तथा
१ संजयउवाच भ्रातृभिःसहितोराजन्पुत्रोदुःशासनस्तव भीष्मंप्रमुखतःकृत्वाप्रययौसेनयासह २ तथैवपांडवाःसर्वेभी
मसेनपुरोगमाः भीष्मेणयुद्धमिच्छंतःप्रययुर्हृष्टमानसाः ३

ध्यायः एवंमहेष्विमारेर्दृष्ट्वाभीमस्यविक्रमंमिसंगतस्यसमचांतिआर्योभीष्मस्यपराक्रमइतितात्पर्यार्थः ३ ॥ ३ ॥ ३ ॥ ३ ॥ ३ ॥ ३

क्ष्वेलाः सिंहनादाः मृदंगा मर्द्दलाः मुरजाः क्षुद्रमर्द्दलाः ४ समाद्रवन् अन्योन्यं संगता अभवन् ५ महान् समुच्छ्रयः संप्रहारो यत्र ६ ७ गोवृषो बलीवर्दः

क्ष्वेलाः किलिकिलाशब्दाः क्रकचा गोविषाणिकाः भेरीमृदंगमुरजा हयकुंजरनिस्वनाः ४ उभयोः सेनयो राजंस्ततस्ते स्म
समाद्रवन् वयं तास्वतिनर्दंतस्तत्र शब्दोऽभूत्तुमुलं महत् ५ महांत्यनीकानि महासमुच्छ्रये समागमे पांडवधार्त्तराष्ट्रयोः चकंपि
रे शंखमृदंगनिस्वनैः प्रकंपितानीव वनानि वायुना ६ नरेंद्रनागाश्वसमाकुलानामागच्छतीनामशिवे मुहूर्त्ते बभूव घोष
स्तुमुलश्चमूनां वातोद्धतानामिव सागराणां ७ तस्मिन्समुत्थिते शब्दे तुमुले लोमहर्षणे भीमसेनो महाबाहुः प्राणदद्
गोवृषो यथा ८ शंखदुंदुभिनिर्घोषान्वारणानां च बृंहितं सिंहनादं च सैन्यानां भीमसेनरवोऽभ्यभूत् ९ हयानां हे
षमाणानामनीकेषु सहस्रशः सर्वानभ्यभवच्छब्दान्भीमसेनस्य निस्वनः तं श्रुत्वा निनदं तस्य सैन्यास्तव वितत्रसुः जी
मूतस्येव नदतः शक्राशनिसमस्वनं ११ वाहनानि च सर्वाणि शकृन्मूत्रं प्रसुस्रुवुः शब्देन तस्य वीरस्य सिंहस्येवेतरे मृ
गाः १२ दर्शयन्घोररूपमात्मानं महाभ्रमिव नादयन् भीषयंस्तव पुत्रांस्तान्भीमसेनः समभ्यपात् १३ तमायांतं महेष्वा
सं सोदर्याः पर्यवारयन् छादयंतः शरव्रातैर्मेघा इव दिवाकरं १४ दुर्योधनश्च पुत्रस्ते दुर्मुखो दुःसहः शलः दुःशासनश्चाति

श्रेष्ठः ८ अभ्यभूत् अभिभूतवान् ९ १० सैन्याः सेनामुख्याः संनादयन् नादं कुर्वन् १३ सोदर्याः राजात्मजाः १४ १५

भी०
२००

निर्मुक्ताः मुक्तकंचुकाश्चाशीविषाउपमायेषांतान् १७ १८ भीमाभयंकरास्कानांतलानांवनिः स्वनायेत ः २० लाघवंक्षिप्रहस्तत्वांनिमि

श्व२

विविंशतिश्चित्रसेनोविकर्णाश्चमहारथः पुरुमित्रोजयोभोजः सोमदत्तिश्चवीर्यवान् १९ महाचापानिधुन्वंतोजलदाइवविद्युतः आ
ददानाश्चनाराचान्निर्मुक्ताशीविषोपमान् १७ अथतेद्रौपदीपुत्राः सौभद्रश्चमहारथः नकुलः सहदेवश्चधृष्टद्युम्नश्चपार्षतः १८ धार्त्त
राष्ट्रानप्रतिययुरर्दयंतः शितैः शरैः वज्रैरिवमहावेगैः शिखराणिधराभृतां १९ तस्मिन्प्रथमसंग्रामेभीमज्यातलनिस्वनेः ताव
कानांपरेषांचनासीत्कश्चित्पराङ्मुखः २० लाघवंद्रोणशिष्याणामपश्यंभरतर्षभ निमित्तवेधिनांराजन् [illegible]शरानुत्सृजतांभृशं २१
नोपशाम्यतिनिर्घोषोधनुषांकूजितंतदा विनिश्चेरुः शरादीप्ताज्योतींषीवनभस्तलात् २२ सर्वेत्वन्येमहीपालाः प्रेक्षकाइव
भारत ददृशुर्दर्शनीयंतेभीमंज्ञातिसमागमं २३ ततस्तेजातसंरंभाः परस्परकृतागसः अन्योन्यस्पर्धयाराजन्व्यायच्छंत
महारथाः २४ कुरुपांडवसेनेतेहस्त्यश्वरथसंकुले शुशुभातेरणेतीवपटेचित्रगतेइव २५ ततस्तेपार्थिवाः सर्वेप्रगृहीतश
रासनाः सहसैन्याः समापेतुः पुत्रस्यतववाहिनीं २६ ः ः

तलस्वनाः २ २२ जातसंरंभाश्चिरसंभृतकोपाः कृतागसः कृतापराधाः भीमोपिबाल्येधार्त्तराष्ट्रान्मर्दयन्कृतापराधोस्तीत्य
र्थःपरस्परेतिआयच्छंतः व्यायामंचक्रुः २४ पटे इतिसमम्यंतं २५ २६

२७ ततस्तान् तेषामाधावतांतत्रगजाश्वकलिलोमहान् सिंहनादरवोन्मिश्रः शंखभेरीसमाकुलः सद्धोषर्वांश्चशराघैधनुर्ज्यातलनिस्वनः
व्याकुलितपुरे धातश्चासीच्छब्दो धैर्यत्स्वनः युधिष्ठिरेनैवादिष्टाः पार्थिवास्तेसत्कृताः दिनदत्ताः समापेतुः पुत्रस्यतव [illegible]ी २९ रणपंडि[illegible]

रामु०
२००

अंतर्धीयत अंतर्हितः अरुभावः अरुभावः आर्षः सैन्येन सेनाभ्यां वृत २८ २९ अतिअतिक्रम्य ३० अध्यायः पूर्वाह्णे तस्य अह्नः पूर्वाह्णेऽह्ने

पु १

उभयोः सेनयोस्तीव्रः सैन्यानां स समागमः अंतर्धीयत चादित्यः सैन्येन रजसा वृतः २८ प्रयुध्यतां प्रभग्नानां पुनरावर्त्तितां अ
पि न तु सेषां परेषां च विशेषः समदृश्यत २९ तस्मिन्सुतुमुले युद्धे वर्त्तमाने महाभये अतिसर्वाण्यनीकानि पिता ते व्यरोच
त ३० इति भीष्मपर्वणि अध्यायः ४२ संजय उवाच पूर्वाह्णे तस्य रौद्रस्य युद्धमह्नो विशांपते प्रावर्त्तत महाघोरं राज्ञां देहा
वकर्त्तनं १ कुरूणां संजयानां च संग्रामे विजिगीषतां सिंहानामिव संह्रादो दिवमुर्वीं च नादयन् २ आसीत्किलकिलाशं
खरवैः सह जज्ञिरे सिंहनादाश्च नराणां प्रतिगर्जतां ३ तलत्राभिहतश्चैव ज्याशब्दो भरतर्षभ पत्तीनां पदशब्दश्च वाजिनां च म
हास्वनः ४ तोत्राङ्कुशनिपातश्च आयुधानां च निस्वनः घंटाशब्दश्च नागानामन्योन्यमभिधावतां ५ तस्मिन्समुदिते शब्दे तुमुले
लोमहर्षणे बभूव रथनिर्घोषः पर्जन्यनिनदोपमः ६ ते मनः क्रूरमास्थाय समभित्यक्तजीविताः पांडवानभ्यवर्त्तंत सर्व एवो
च्छ्रितध्वजाः ७ स्वयं शांतनवो राजन्नभ्यधावद्धनंजयं प्रगृह्य कार्मुकं घोरं कालदंडोपमं रणे ८ अर्जुनोऽपि धनुर्गृह्य गांडीवं लो
कविश्रुतं अभ्यधावत तेजस्वी गांगेयं रणमूर्द्धनि ९

भोग १ संज्ञानं पांचालभेरानां २ तलं ज्याघातवारणं ३४ तोत्रं गजदमनं वेणुकांडं वा रांबुधन्नमाकरं ५ ८ रणमूर्धनि रणाग्रे
९

पा०स्लल ४

१० महेष्वासो महानस्त्रसो धनुर्धरस ११ १२ आनर्छतुः पीडितं वैतौ तत्समागौ तत्कृकुर्वाणं १३ पुष्पैः शबलौ विविचित्रौ किं

स्पर पुर ध

तावुभौ कुरुशार्दूलौ परस्परवधैषिणौ गांगेयस्तु रणे पार्थं विद्ध्वा नाकंपयद्बली ९ तथैव पाण्डवो राजन् भीष्मं नाकंपयद्युधि सात्यकि
स्तु महेष्वासः कृतवर्माणमभ्ययात ११ तयोः समभवद्युद्धं सुमहल्लोमहर्षणं सात्यकिः कृतवर्माणं कृतवर्मा च सात्यकिं १२
बो आनर्छतुः शरैर्घोरैस्तक्षमाणौ परस्परं तौ शराचितसर्वांगौ शुशुभाते महाबलौ १३ वसन्ते पुष्पशबलौ पुष्पिताविव किंशुकौ अ
भिमन्युर्महेष्वासो बृहद्बलमयोधयत १४ ततः कोशलको राजा सौभद्रस्य विशांपते ध्वजं विच्छेद समरे सारथिं चाप्यपातयत १५ सौ
भद्रस्तु ततः क्रुद्धः पातिते रथसारथौ बृहद्बलं महाराज विव्याध नवभिः शरैः १६ तथापराभ्यां भल्लाभ्यां सिताभ्यामरिमर्दनः ध्वज
मेकेन चिच्छेद पार्ष्णिमेकेन सारथिं १७ अन्योन्यं च शरैस्तौ तौ ततक्षतुररिंदमौ मानिनं समरे द्रोणं कृतवैरं महारथं १८ भीमसे
नस्तव पुत्रं दुर्योधनमयोधयत १ तावुभौ नरशार्दूलौ कुरुमुख्यौ महारथौ १९ अन्योन्यं शरवर्षाभ्यां ववृषाते रणाजिरे तौ वीक्ष्य
तु महात्मानौ कृतिनौ चित्रयोधिनौ २० विस्मयः सर्वभूतानां समपद्यत भारत दुःशासनस्तु नकुलं प्रत्युद्याय महारथं २१ ::

शुकोपमसौ १४ १६ सिताभ्यां तीक्ष्णाभ्यां ध्वजमिति पूर्वेणान्वयः एकेन पार्ष्णिं पृष्ठगोपमिति १७ १८ कृतिनौ युद्धकुशलौ २०

रामजी रामजी भा रामयजी ::

कृतं क्षत्रं २२ क्षुद्रकाणां बाणानां विशिखानां २३ ३० पराङ्मुखानां मार्गणानां धनं ३१ ३२ ३३ ३४ श्रीकृष्णाय नमः

अविध्यन्निशितैर्बाणैः प्रहसन्निव भारत तस्य माद्रीसुतः केतुं स शरासनं २२ चिच्छेद निशितैर्बाणैः प्रहसन्निव भारत अथैनं पंच
विंशत्या क्षुद्रकाणां समर्पयत २३ पुत्रस्तु तव दुर्धर्षो नकुलस्य महाहवे तुरंगांश्चैव चिच्छेद ध्वजं चैव चापमपातयत २४ दुर्मुखः सहदे
वं तु प्रत्युद्याय महाबलं विव्याध शरवर्षेण यतमानं महाहवे २५ सहदेवस्ततो वीरो दुर्मुखस्य महाहवे शरेणाथ शितेनाशु पातयामा
स सारथिं २६ तावन्योन्यं समासाद्य समरे युद्धदुर्मदौ त्रासयेतां शरैर्घोरैः कृतप्रतिकृतैषिणौ २७ युधिष्ठिरः स्वयं राजा [illegible] मद्रराजा
न[illegible]मभ्ययात तस्य मद्रपतिश्चापं द्विधा चिच्छेद पश्यतः २८ तदपास्य धनुश्छिन्नं कुंतीपुत्रो युधिष्ठिरः अन्यत्कार्मुकमादाय वेगव
द्बलवत्तरं २९ ततो मद्रेश्वरं राजा शरैः संनतपर्वभिः छादयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत ३० धृष्टद्युम्नस्ततो द्रोणमभ्यद्र
त भारत तस्य द्रोणः सुसंक्रुद्धः परासुकरणं दृढं ३१ धनुश्चिच्छेद समरे पांचाल्यस्य महात्मनः शरं चैव महाघोरं कालदंडमि
वापरं ३२ प्रेषयामास समरे सोस्य कायमगमत अथान्यद्धनुरादाय सायकांश्च चतुर्दश ३३ द्रोणं द्रुपदपुत्रस्तु प्रतिवि
व्याध संयुगे तावन्योन्यं सुसंरब्धौ चक्रतुः सुभृशं रणं ३४

तिष्ठे ४

४४ ४४

भसंमत्वरं ३५ वीरः शंखं तु रैशेन्यम्मसंधो ३६ ३८ धृष्टकेतुः शिशुपालसुतः ३९ ४० समीपतुः अन्योन्यस्पर्धयासं भौलिनो ४१

सौमदत्तिं रणे शंखो रभसं रभसो युधि अभ्यधावन्महाराज तिष्ठ तिष्ठेति चाब्रवीत् ३५ तस्य वै दक्षिणं वीरो निर्बिभेद रणे भुजं सौ
मदत्तिस्ततः शंखं जत्रुदेशे समाहनत् ३६ तयोः समभवद्युद्धं घोररूपं विशांपते दृप्तयोः समरे तूर्णं देवदानवयोरिव ३७
वाल्हिकं तु रणे क्रुद्धः क्रुद्धरूपं विशांपते अभ्यद्रवदमेयात्मा धृष्टकेतुर्महारथः ३८ वाल्हीकस्तु ततो राजन् धृष्टकेतुम
मर्षणः शरैर्बहुभिरानर्छत् सिंहनादमथानदत् ३९ चेदिराजस्तु संक्रुद्धो वाल्हीकं नवभिः शरैः विव्याध समरे तूर्णं म
त्तो मत्तमिव द्विपं ४० तौ तत्र समरे क्रुद्धौ नर्दन्तौ च मुहुर्मुहुः समीयतुः सुसंक्रुद्धावंगारकबुधाविव ४१ राक्षसं क्रूरकर्माणं
क्रूरकर्मा घटोत्कचः अलंबुषं प्रत्युद्याद्बलं शक्र इवाहवे ४२ घटोत्कचस्तु संक्रुद्धो राक्षसं तं महाबलं नवत्या साय
कैस्तीक्ष्णैर्दारयामास भारत ४३ अलंबुषस्तु समरे भैमसेनिं महाबलं बहुधा दारयामास शरैः क्रुद्धश्शतं रिनमवक्षि
ते नाराचेन सुतीक्ष्णेन भृशं विव्याध कंपयन् ४६ ः ः रामजी ः ः ः ः ः ः ः ः ः ः ः ः ः ः

४३ सन्नतपर्वभिः अलक्षितत्वंयैथिमिः ४४ ४५ ४६ ः ः ः ः ः ः ः ः ः ः ः ः ः ः ः ः

सन्नतपर्वभिः ४४ विभ्राजेतां ततस्तौ तु संयुगे शरविक्षतौ शिखरणी समरे राजन् ... युधि योधौ ४५ अपवस्य मातनः २ ...

सूपीतेन सुपुङ्खेन प्रायितेन बतो शोणसर्वम्भ्योरणायतः विशिखेन शरासोह्णोर्द ४७ मधेमंग्रामे ४८ वृष्ण्यारुवुसमीधिरार्बः ५० ५६ तुमं

शिखण्डी समितिं राजन्द्रोणपुत्रमताडयत् सायकेन सुपीतेन तीक्ष्णेनाविशिखेन च ४७ तमभ्युत्तोमं द्रौणेर्विविधेर्मधे भारत
तेरंगोत्सूर्यविरोटवाहिनीपतिः ४८ अमगा त्वरितो राजन्कृतेयुद्धमर्कत विराटोभारत तं तु शरवर्षेण भारत ४९ अमर्षपूर्ण
संक्रुद्धो मर्घो वृष्ण्यास्त्वावलं भारतस्तु सुतं तूर्णं विराटं पृथिवीपतिं ५० द्रुपदस्यापि संग्रामे मर्घः स्वयंद्वौरितं हन्त शत्रु चेकेक
यं कृपः शारद्वतोपययौ ५१ ते कृपः शरवर्षेणाछादयामास भारत गौतमं च समं क्रुद्धं शरवृष्ट्याभ्यपूरयत् ५२ तेतो मोमं हयानहत्वा
धनुश्छित्वा च भारत विरथावमियुद्धायसमोपपतरमर्षणो ५३ तयोस्तत्समवयुद्धं घोररूपं दुरासदं दुपरस्तु ततो
राजामं धर्ववेत्रमपद्रुथं ५४ अभ्युद्ययौ सुसंरब्धो गरुडस्वपक्वंतप ततः मे धूंचकीरामद्रुपदं विशिख
स्त्रिभिः ताडयामास समरे स्मव तं मत विध्यत तयोः समभवद्युद्धं घोररूपं सुदारुणं ५६ देवमोधीतित्वनर्शक्रांगारकयोरिव
विकर्णस्तु ततस्तमंसुतसोमं महाबलं ५७ अभ्ययाज्जवनैरश्वैस्ततोयुद्धमवर्तत विकर्णः सुतसोमं तु विध्वा नाकंपयच्छरैः ५८
सुतसोमो विकर्णं च तत्स्तुतमिवाभवत् सुशर्माणं नरव्याघ्रश्चेकितानो महारथः अभ्यद्रवत्सुसंक्रुद्धः पांडवार्थे पराक्रमी ५९

तव ५७ सुतसोमं भीमसेनिं ५८ चेकितानो पारवः ५९

वा१

भी०
२०३

६६ इरावान्नर्जुनपुत्रः ६८ ६९ गदायेणागदस्मृसुलेन ७० समममन्तात् संसक्ता व भूतां ७२ ४४ ॥

२१ ५२

सुशर्मा तु महाराज चेकितानं महारथं महता शरवर्षेण वारयामास संयुगे ६० चेकितानोपि संरब्धः सुशर्माणं महाहवे
ववर्ष शरवर्षेण महामेघ इवाचलं ६१ शकुनिः प्रतिविंध्यं तु राज्ञ क्रांतपराक्रमी अभ्यद्रवत राजेंद्र मत्तसिंह इव द्विपं ६२ योधि
ष्ठिरः सुसंक्रुद्धः सौबलं निशितैः शरैः व्यदारयत संग्रामे मघवानिव दानवं ६३ शकुनिः प्रतिविंध्यं तु प्रतिविध्यन्महाहवे अ
दारयन्महामाः शरैः सन्नतपर्वभिः ६४ सुदक्षिणं तु राजेंद्र कांबोजानां महारथं श्रुतकर्मा [illegible]
[illegible] पराक्रांतमभ्यद्रवत संयुगे ६५
सुदक्षिणस्तु राजेंद्र माहदेविं महारथं विध्वा नाकंपयत्सैमैनाकमिव पर्वतं ६६ इरावानथ संक्रुद्धः श्रुतायुषममर्षणः अभ्यु
घयौ रणायत्तो यत्नरूपं परंतपः आर्जुनिस्तस्य समरे ह्याश्वान् हत्वा महारथः ननाद बलवान् राजन् तत्सैन्यं प्रत्यपूरयत ६७
श्रुतायुस्तु संक्रुद्धः फाल्गुनिः समरे हयान् निजघान गदाग्रेण ततो युद्धमवर्तत ७० विंदानुविंदावावंत्यौ कुंतिभोजं महा
रथं ससैन्यं समसत्तौ वीरौ समसज्जतुराहवे ७१ तत्राद्भुतमपश्याम तयोर्घोरपराक्रमं अयुध्यंतौ स्थिरौ भूत्वा महत्या सेनया

सह ७२ ॥ रामजीराम

सं२

राम०
२०३

तेष्वद्वंद्वेद्युम्न्यामास्त्रनुविंदइति ७३ ७७ द्वंद्वंद्वयोर्द्वयोर्युद्धं ८० ८५ विपरीतंअतीतकर्मनिर्णयोसंक्षेपतव्यवहारं ८५ ॥ ॥ ॥ ॥

अनुविंदस्तुगदयाकुंतिभोजमताडयत् कुंतिभोजस्तुतंतूर्णंशरव्रातैरवाकिरत् ७३ कुंतिभोजसुतश्चापिविंदंविव्याधसायकैः सचतंप्र
तिविव्याधतदद्भुतमिवाभवत् ७४ कैकेयाभ्रातरःपंचगांधारान्पंचमारिषससैन्यास्ते महात्मानोयोधयामासुराहवे ७५ वीरबाहुश्चतेपुत्रोवै
राटिंरथसत्तमं उत्तरंयोधयामासविव्याधनवभिःशरैः ७६ उत्तरश्चापितंवीरंविव्याधनिशितैःशरैः चेदिराट्समरेराजन्नुलूकंसमभिद्रवत्
७७ तथैवशरवर्षेणउलूकंसमविध्यत उलूकश्चापितंबाणैर्निशितैर्लोमवाहिभिः ७८ तयोर्युद्धंसमभवद्घोररूपंविशांपते दारयेतांसु
संक्रुद्धावन्योन्यमपराजितौ ७९ एवंद्वंद्वसहस्राणिरथवारणवाजिनां पदातीनांचसमरेतवतेषांचसंकुले ८० मुहूर्तमिवतद्युद्धमासीन्मधु
रदर्शनं ततउन्मत्तवद्राजन्नप्राज्ञायतकिंचन ८१ गजोगजेनसमरेरथीचरथिनंययौ अश्वोश्वंसमभिप्रेक्ष्यपदातिश्चपदातिनं ८२ त
तोयुद्धंसुदुर्धर्षंव्याकुलंसमपद्यत शूराणांसमरेतत्रसमासाद्यपरस्परं ८३ तत्रदेवर्षयःसिद्धाश्चारणाश्चसमागताः प्रेक्षंततद्रणंघो
रंदेवासुरसमंयुधि ८४ ततोदंतिसहस्राणिरथानांचापिमारिष अश्वौघाःपुरुषौघाश्चविपरीतंसमाययुः ८५ ॥ ॥ ॥ ॥

८६ अध्याय: राजन्नभयुद्धानि पुंकृतवंति १ नेते ज्ञातवानतत्रकालेखल्वीयोभागिनेयः २ आवीष्टाइवभूता दिनामगृहीताइव ३ युगानिअ
धस्कंधापितानिदारुणी ४ रथेषारथधरः कूबरः युगकीलः संगतैः सन्मुखागतैः ६ प्रभिन्नाः श्चोतन्मदाः विषाणैः दंतैः ७ तोरणानिच

तेन्नतत्रमहद्दृश्यंतरथवारणापत्तयः सादिनश्चनरव्याघ्रयुध्यमानामुहुर्मुहुः ८१ इतिभीष्मपर्वणिअध्यायः ४२ संजयउवाच राजंछ
तमहस्राणितत्रतत्रपदातिनां निर्मर्यादंप्रयुद्धानितन्नेवस्वामिभारत नपुत्रः पितरंजज्ञेनपितापुत्रमौरसं नैभ्राताभ्रातरंतत्रस्वस्रीयोन
चमातुलं १ नमातुलश्चस्वस्त्रियंनसखायंसखातदा आविष्टाइवयुध्यंतेपांडवाः कुरुभिःसह २ रथानीकंनरव्याघ्राः केचिदभ्यपत
न्रथैः अभज्यंतरथैरेवयुगानिभरतर्षभ ४ रथेषाश्चरथेषाभिः कूबरारथकूबरैः संगतैः संहताः केचित्परस्परजिघांसवः ५ नशे
कुश्चलितुंकेचित्संनिपत्यरथारथैः प्रभिन्नास्तुमहाकायाः संनिपत्यमहागजैः ६ बहुधादारयन्क्रुद्धाविषाणैरितरेतरं सतोरणाँ
वरवारणौः ७ अभिसृत्यमहाराजवेगवद्भिर्महागजैः दंतैरभिहतास्तत्रचुक्रुशुःपरमातुराः अभिनीताश्चशिक्षाभिस्तोत्रांकुशसमा
हताः ८ अप्रभिन्नाः प्रभिन्नानांसंमुखाभिमुखाययुः प्रभिन्नैरपिसंयुक्ताः केचित्तत्रमहागजाः १० राम जी राम जी ः

पताकेश्ववारणा

तुस्तंभमंडपाकारस्यगतपल्याणास्तत्रैवरीतिभाषयाप्रसिद्धस्यद्वाराणिपताकाश्चतैश्चसतोरणाश्चरथाः ८ अभिनीताः सुशिक्षिताः ९
अप्रभिन्नाः अनुद्भिन्नमदाः संमुखाभिमुखाः अन्योन्यसंमुखाइत्यर्थः १०

प्रणीताः संयुक्ताः ऋष्टयः हस्तक्षेप्याः शूलभल्लाः भिंडिपालः करकोटीरिति प्रसिद्धः तोमराः दीर्घदंडभल्लाः नाराचाः महाशल्याः विस्तीर्ण
फलकाः शराः ११ १२ परश्वधैः कुठारैः १३ भिंदिपालैः फरशैः महागाष्ठगांगोफण इति प्रसिद्धैः पीतैर्घट्टैः निस्त्रिंशैः खड्गैः हन्यमानाः धावं

तो स्थान १

त्यैः कश्चिन्निरंकृत्याभद्रवंते ततस्ततः सम्यक्प्रणीताश्च तथा प्रभिन्नकरटामुखाः ऋष्टितोमरनाराचैर्निकृत्ता वरवारणाः १२
विनेदुर्भिन्नमर्माणो निपेतुश्च गतासवः प्रधावंति द्विपाः केचित्तत्र नैरम्भरवान् १३ गजानां पदरक्षाश्च मृदिताः महारिणाः ऋष्टिभि
श्च धनुर्भिश्च विमलैश्च परश्वधैः १४ गदाभिर्मुसलैश्चैव भिंदिपालैः सतोमरैः आयसैः परिघैश्चापि निस्त्रिंशैर्विमलैः शितैः १५
सुगृहीतैः सुसंरब्धा द्रवमाणास्ततस्ततः व्याहरंतो महाराज परस्परजिघांसवः १६ राजमानाश्च निस्त्रिंशाः संसक्ता नरशोणि
तैः प्रत्यदृश्यंत शूराणामन्यमभिधावतां १७ अवक्षिप्तावधूतानामसीनां वीरबाहुभिः संजज्ञे तुमुलः शब्दः पततां परमर्मसु
१८ गदामुसलरुग्णानां भिन्नानां च वरासिभिः दंतिदंतावभिन्नानां मृदितानां च दंतिभिः १८ तत्र तत्र नरौघाणां क्रोशतामितरे
तरे शुश्रुवुर्दारुणा वाचः प्रेतानामिव भारत १९ : ४४ १९ १९ १९ :

मो ३

तः १५ १६ अवक्षिप्तावधूतानां परेषां मर्मसु पततामसीनामिति संबंधः १७ रुग्णाः तीव्राघातान्तैः भिन्नाः निकृत्ताः अवभिन्नाः क्षताः
ना १ गः १८ प्रेतानां नारकाणां १९ ४४

हयैः कासाश्रैत चाम्रपीतश्यामरक्तपालाः तच्चारिभिः अतएव हयैरिव अभिविद्रुताः संमुखमुपागताः २० मा साहस्त्रैः प्यामह्ला: मेती
प्रतिमस्निग्धाः कुंताद्रसपरेश्चाशुगाः शीघ्रगाः २१ अश्मकैवहस्तमवेगाः २२ भल्लैः दीर्घफणैर्बाणैः २३ २४ सहसाबलेनअतर्कितेवा

हयै रपिहयारोहाश्यामरापीडधारिभिः हयैरिवमहावेगैरन्योन्यमभिविद्रुताः २० तेविमुक्तामहाप्राज्ञाजांबूनदविभू
षणाः आशुगाविमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः २१ अश्मचयजवैः केचिदश्वाःसुमहतोरथात् शिरांस्यादद
रेवीरारथिनामश्वसादिनः २२ बहूनपिहयारोहानभल्लैः सन्नतपर्वभिः रथीसूर्यानसंप्राप्य बाणागोचरमागतान् २३ न
वमेघप्रतीकाशाश्चाक्षिप्यतुरगानगजाः सपादैरवमृद्गंतिमत्ताः कनकभूषणाः २४ मांसेविमथिताः केचिद्दिनेदुः
परमातुराः साश्वारोहानश्चानके क्रिन्नमर्थ्यवरणाः २५ सहसाचिक्षिपुस्तत्रसंकुलेपरमेसति साश्वारोहाविषाणाग्रैरु
त्क्षिप्यतुरगानगजाः २६ रथौघानवमृद्नंतः सध्वजानभिचक्रमुः पुंस्त्वादतिमदत्वाच्च केचित्तत्रमहागजाः २७ साश्वारोहानपा
नज्जघ्नुः करैः सचरणैस्तथा प्रतिमानेषु गात्रेषु पार्श्वेष्वभिचवारणान् आशुगाविमलास्तीक्ष्णाः संपेतुर्भुजगोपमाः २८

४२३

सतिविद्यमाने २५ अमितौजसम् पुंस्त्वात् वीर्यवत्वात् अतिमदत्वात् उत्कटमदत्वात् २७ प्रतिमानेषु गात्रेषु अग्रेषु वा रणानभिगजा
नामभितः पार्श्वेषु क्षितिपात्राशुगाः बाणाः २८

शक्त्यः शक्तयः कृष्णालोहरंगास्तस्व महोल्काप्रतिमाः २९ द्वीपि विक्रव्याघ्रः विकोशैः प्रयोगकालैः ३० अभिलुतं स्वाभिमुख्येन स्वपरांगं स्मारमि
सु तत एव स्माद्भिपुहुं क्रोष्टुं इं शास्त्रिसंयुतं वामप क्षास्त्रितं यानमेकपार्श्वविदारितं चर्ममहारवसांगात्क्षतिप्रसिद्धं माषायां ३१ आक्षिप्य आकृष्य

नगाश्च कायान्निर्भिद्य लोहार्द्रा निकषा इव निपेतुर्विमलाः शक्त्यो वीरबाहुभिरर्पिताः महोल्काप्रतिमा घोरास्तत्र तत्र विशांपते २९
द्वीपिचर्मावनद्धैश्च व्याघ्रचर्मशयैरपि विकोशैर्विमलैः खड्गैरभिजघ्नुः परान्रणे ३० अभिलुतमभिक्रुद्धमेकपार्श्वावदारितं वि
दर्शयंतः संपेतुः खड्गचर्मपरश्वधैः ३१ केचिदाक्षिप्य करिणः साश्वानपि रथान्करैः विकर्षंतो दिशः सर्वाः संपेतुः सर्वशब्दगाः
३२ शंकुभिर्दारिताः केचित्संछिन्नाश्च परश्वधैः हस्तिभिर्मृदिताः केचित्क्षुण्णाः केचित्तुरंगमैः ३३ रथनेमिनिखाताश्च
निकृत्ताश्च परश्वधैः व्याक्रोशंत महाराज तत्र तत्र स्म बांधवान् पुत्रानन्ये पितॄनन्ये भ्रातॄंश्च सह बंधुभिः ३४ मातुलान्भागिनेयांश्च
परानपि च संयुगे विकीर्णांत्राः सुबहवो भग्नसक्थाश्च भारत ३५ बाहुभिश्चापरैश्छिन्नैः पार्श्वेषु च विदारिताः क्रंदंतः समदृश्यं
त तृष्णार्ता जीवितेप्सवः ३६ तृषा परिगताः केचिदल्पसत्वा विशांपते भूमौ निपतिताः संख्ये मृगयां चक्रिरे जलं ३७ ॥

वेशत्रुणा सर्वेषामास्पदं शत्रूणां शब्दं मत्वा गच्छंतीति तथा ३२ शंकुभिः कंटकैः दारिताः ३३ व्याक्रोशंत व्याक्रोशं कृतवंतः ३४
बंधुभिः सखिभिः ३५ भग्नसक्थः भग्नोरवः ३६ तृषा पिपासया अल्पसत्वाः धैर्यवर्जिताः मृगयां चक्रिरे याचंते ३७ ॥

भी०
२०६

३९ ३७ रक्तनकुरंबोरहं ४० निष्कूजाः निःशब्दाः ४१ रथमन्यस्य गंतुं प्रार्थयानामध्येमार्गे निपतितारतियोज्यं ४२ ४७ केतुनेति

रुधिरौघपरिक्लिन्नाः क्लिश्यमानाश्च भारत न निस्तरंत्यशक्तात्मानं तव पुत्राश्च संगतान् ३८ अपरे क्षत्रियाः शूराः कृतवैराः परस्परं नैव शस्त्रं विमुंचंति नैव क्रंदंति मारिष ३९ तर्जयंति सुसंहृष्टास्तत्र तत्र विशांपते निर्दश्य दशनैश्चापि क्रोधात्स्वदशनच्छदं ४० भ्रुकुटीकुटिलैर्वक्त्रैः प्रेक्षंते च परस्परं अपरे क्लिश्यमानास्तु शरार्ता व्रणपीडिताः ४१ निष्कूजाः समपद्यंत दुर्बलास्तु महाबलाः अन्ये च विरथाः शूरा रथमन्यस्य संयुगे ४२ प्रार्थयाना निपतिताः संक्षुण्णा वरवारणैः अशोभंत महाराज सपुष्पा इव किंशुकाः ४३ संबभूवुरनीकेषु बहवो भैरवस्वनाः वर्तमाने महाभीमे तस्मिन्वीरवरक्षये ४४ अहनत्पिता पुत्रं पुत्रश्चापि तथा रणे स्वस्रीयो मातुलं चापि स्वस्रीयं चापि मातुलः ४५ स[illegible]सखायं च तथा संबंधी बांधवांस्तथा एवमेष क्षयो वृत्तः कुरूणां पांडवैः सह ४६ वर्तमाने भये तस्मिन्निर्मर्यादे महाभये भीष्ममासाद्य पार्थानां वाहिनी समकंपत केतुना पंचतारेण तालेन भरतर्षभः ४७ राजतेन महाबाहुरुच्छ्रितेन महारथे बभौ भीष्मस्तदा राजंश्चंद्रमा इव मेरुणा ४८

मार्ध॰ अर्धचंद्रकेतोः मेरुसदृशभीष्मपार्श्वोपमाय भावः भीष्मस्य रुक्मरथत्वात् ४८॥

नोपत्र १

राम०
२०६

गतोतीतः पूर्वाह्णस्य भूयिष्ठभागोयस्मिन्नहनि १५ नृत्यतः नृत्यमिवकुर्वतः ३ पिशंगैः पिंगलैः ७ कर्णिकारोकर्णिकारद्रुमोपमेतरश्च
स्य ३

इतिभीष्मपर्वणिअध्यायः ४४ संजय उवाच गतपूर्वाह्णभूयिष्ठेतस्मिन्नहनिदारुणे वर्त्तमानेतथारौद्रेमहावीरवरक्षये १ दुर्मुखः
कृतवर्माचकृपः शल्योविविंशतिः भीष्मंजुगुपुरासाद्यतवपुत्रेणचोदिताः २ एतैरतिरथैर्गुप्तः पंचभिर्भरतर्षभ पांडवानामनी
कानिविजगाहेमहारथः ३ चेदिकाशिकुरूषेषुपांचालेषुचभारत भीष्मस्यबहुधातालश्चलत्केतुरदृश्यत ४ सशिरांसिरथोवीरो
रथांश्चसयुगध्वजान् चिच्छेदतेमहावेगैर्भल्लैः सन्नतपर्वभिः नृत्यतोरथमार्गेषुभीष्मस्यभरतर्षभकेचिदार्त्तस्वरंचक्रुर्नागामर्म
णिताडिताः ६ अभिमन्युः सुसंक्रुद्धः पिशंगैस्तुरगोत्तमैः संयुक्तंरथमास्थायप्रायाद्भीष्मरथंप्रति ७ जांबूनदविचित्रेणक
र्णिकारेणकेतुना अभ्यवर्त्ततभीष्मंचतांश्चैवरथसत्तमान् ८ सतालकेतोस्तीक्ष्णेनकेतुमाहत्यपत्रिणा भीष्मेणयुयुधे
वीरस्तस्यचानुरथैः सह ९ कृतवर्माणमेकेनशल्यंपंचभिरायसैः भित्वानवभिरत्युग्रैःशरैः प्रपितामहं १० पूर्णायतविसृष्टे
नसम्यक्प्रणिहितेनच ध्वजमेकेनचिच्छेदजांबूनदविभूषितं ११ दुर्मुखस्यतुभल्लेनसर्वावरणभेदिना जहारसारथेःकायात्

नुरथैः पार्ष्णिगोपारिभिः ९ १० पूर्णायतविसृष्टेनआकर्णाकृष्टसक्तेनसम्यक्प्रणिहितेन ११   १२ शिरः सन्नतपर्वणा १२

कार्त्तस्वरं सुवर्णं तालम् ध्वजान् १३ १४ लघुधलस्वतयाकार्ष्णेः । अभिमन्योः सत्ववंतं बलवंतं १५ अलातसदृशप्रभं धामप्रमा

धनुश्चिच्छेद समरे तेन कार्त्तस्वरविभूषितं कृतस्य निशिताग्रेण तालं चास्य तीक्ष्णमुखैः शरैः १३ जघान परमक्रुद्धो नवभिः सन्नि
वमहारथः तस्य लाघवमुद्वीक्ष्य ततः सुदेवताश्चापि १४ लघुधलस्वतयाकार्ष्णेः सर्वे भीष्ममुखा रथाः सत्ववंतममन्यंत सा
क्षादिव धनंजयं १५ तस्य लाघवमार्गस्थमलातसदृशप्रभं दिशः पर्यपतच्चापं गांडीवमिव धावत १६ स तमासाद्य वेगेन
भीष्मो नवभिराशुगैः विव्याध समरे तूर्णमार्जुनिं परवीरहा १७ ध्वजं चास्य त्रिभिर्भल्लैश्चिच्छेद परमौजसः सारथिं च त्रिभिर्बाणै
राजघानयतव्रतः १८ तथैव कृतवर्मा तु कृपः शल्यश्च मारिष विध्वा नाकंपयत्कार्ष्णिं मैनाकमिव पर्वतं १९ स तैः परि
वृतः शूरो धार्त्तराष्ट्रैर्महारथैः ववर्ष शरवर्षाणि कार्ष्णिः पंचरथान्प्रति २० ततस्तेषां महास्त्राणि निवार्य शरवृष्टिभिः
ननाद बलवान्कार्ष्णिर्भीष्माय विसृजञ्छरान् २१ तत्रास्य सुमहद्राजन्बाह्वोर्बलमदृश्यत यतमानस्य समरे भीष्ममर्दयतः
शरैः २२ पराक्रांतस्य तस्यैवं भीष्मोपि प्राहिणोच्छरान् स तांश्चिच्छेद समरे भीष्मचापच्युतान्शरान् २३ ततो ध्वजममो
घेषुर्भीष्मस्य नवभिः शरैः चिच्छेद समरे वीरस्तत उच्चुक्रुशुर्जनाः २४ स राजतो महास्कंधस्तालो हेमविभूषितः सौ
भद्रविशिखैश्छिन्नः पपात भुवि भारत २५

तोल्मुकसममंगलाकारमित्यर्थः २२ १७ २४ श्रीरामायनमः ॥४४॥

२६ २७ पुत्रेणाउत्तरेण ३० केसरीसिंहः ३१ ३२ ३३ ३४ मग्रहीताग्रहस्तेनकुंडलीकृतशुंडाग्रेण ३५ तस्यवे

ध्वजंसौभद्रविशिखैःपतंतंभरतर्षभ दृष्ट्वाभीमोनदद्धृष्टःसौभद्रमभिहर्षयन् २६ अथभीष्मोमहास्त्राणिदिव्यानि
चबहूनिचप्रादुश्चक्रेमहारौद्ररणेतस्मिन्महाबलः २७ ततःशरसहस्रेणसौभद्रंप्रपितामहः आवाकिरदमेयात्मा
शरस्तेनतपर्वणां २८ ततोदशमहेष्वासाःपांडवानांमहारथाः रक्षार्थमभ्यधावंतसौभद्रंत्वरितारथैः २९
विराटःसहपुत्रेणधृष्टद्युम्नश्चपार्षतः भीमश्चकेकयश्चैवसात्यकिश्चविशांपते ३० जवेनपततांतेषांभीष्मः
शांतनवोरणे पांचाल्यंत्रिभिरानर्छत्सात्यकिंनवभिःशरैः ३१ पूर्णायतविसृष्टेनक्षुरेणनिशितेनच ध्वजमे
केनाच्छेदभीमसेनस्यपत्रिणा ३२ जांबूनदमयःकेतुःकेसरीनरसत्तम पपातभीमसेनस्यभीष्मेणमथितोरथा
त् ३३ ततोभीमस्त्रिभिर्विध्वाभीष्मंशांतनवंरणे कृपमेकेनविव्याधकृतवर्माणमष्टभिः ३४ प्रगृहीताग्रहस्ते
नवैराटिरपिदंतिना अभ्यद्रवतराजानंमद्राधिपतिमुत्तरः तस्यवारणराजस्यजवेनापततोजवात् शल्योविवारया
मासवेगमप्रतिमंरणे ३५ तस्यक्रुद्धःसनागेंद्रोबृहतःसाधुवाहिनः पदायुगमधिष्ठायजघानचतुरोहयान् ३७ सहता

गामितिसंबंधःरथेरथोपरि ३६ तस्यशल्यस्यबृहतःपृष्टानसाधुवाहिनःसम्य श्वरथेतिष्ठन्मद्राधिपतिरायसीं उत्तरांतकरीश
ग्रहनशीलान् ३८

तमःमोहंप्रमुक्तंहस्ताहूलितंत्वंकुशादिकंपस्य ३९ ४० ४१ ४२ ४३ ४४ ४५ ४६ ४७ ४८ ४९

तयाभिन्नतनुत्राणःप्रविश्यविपुलंतमः सपपातगजस्कंधात्प्रमुक्तांकुशतोमरः ३९ समासाद्यचशल्योसिम
वत्सुतरथोत्तमात् वारणेंद्रस्यविक्रम्यचिछेदायमहाकरं ४० भिन्नमर्मशिरस्त्रैस्तैश्छिन्नहस्तःसवारणः भीममा
र्त्तस्वरंकृत्वापपातममारच ४१ एतदीदृशकंकृत्वामद्रराजोजनाधिपः आरुरोहरथंतूर्णंभास्वरंकृतवर्मणः
४२ उत्तरंतुहतंदृष्ट्वा वैराटिर्भ्रातरंतदा श्वेतःससमहावीरान्दृष्ट्वाक्रोधसमन्वितः ४३ धनूंषितेषांवि
छेदवाणैःसंनतपर्वभिः निकृत्तान्येवतानिस्मसमदृश्यन्तभारत ४४ ततस्तेतुनिमेषार्धात्प्रतिपद्यधनूंषिच स
प्तैवपृषत्कांश्चश्वेतस्योपर्यपातयन् ४५ ततःपुनरमेयात्माभल्लैःसप्तभिराशुगैः विचकर्त्तमहाबाहुस्तेषांचा
पानिधन्विनां ४६ तेनिकृत्तमहाचापाःस्फुरमाणामहारथाः अथशक्तीःपरामृश्यविनेदुर्भैरवान्रवान् मु
मुचुर्भरतश्रेष्ठसमश्वेतरथंप्रति ४७ ततस्ताज्वलिताःसप्तमहोल्काशनिनिःस्वनाः अप्राप्ताःससभिर्भल्लैश्चि
च्छेदपरमास्त्रवित् ४८ ततःसमादायशरंसर्वकायविदारणं प्राहिणोद्भरतश्रेष्ठश्वेतोरुक्मरथंप्रति ४९ त
स्यदेहेनिपतितोवाणोवज्रातिगोमहान् ततोरुक्मरथोराजन्सायकेनदृढंहतः ५० निषसादरथोपस्थेकश्म
लंचाविशन्महत् तंविसंज्ञंविमनसंत्वरमाणस्तुसारथिः ५१

अपोवाहस्त्वर्धसंपन्नः सर्वलोकस्यपश्यतः श्वेतोन्यान्षट्समादायवाजिनोहेमभूषितान् ५२ तेषांयंतारं महाबाहुर्ध्वजशीर्षा
ण्यपातयत् हयांश्चशीघ्रान्निर्भिद्यसारथींश्चपरंतप ५३ शरैश्चैनांसमाकीर्यप्रायाच्छल्यरथंप्रति ततोहलहलाशब्दस्तवसैन्येषुभा
रत ५४ दृष्ट्वासेनापतिंतूर्णंयांतंशल्यरथंप्रति ततोभीष्मंपुरस्कृत्यतवपुत्रोमहाबलः ५५ वृतश्चसर्वसैन्येनप्रायाच्छल्यरथंप्र
ति मृत्योरास्यमनुप्राप्तंमद्रराजममोचयत् ५६ ततोयुद्धंसमभवत्तुमुलंलोमहर्षणंतावकानांपरेषांचव्यतिषक्तरथद्विपं ५७
सौभद्रेभीमसेनेचसात्यकेचमहारथे कैकेयेचविराटेचधृष्टद्युम्नेचपार्षते ५८ एतेषुनरसिंहेषुचेदिसैन्येषुचैवह ववर्षशरव
र्षाणिवृद्धःकुरुपितामहः ५९ इतिश्रीभीष्मपर्वणिअध्यायः ४४ धृतराष्ट्रउवाच एवंश्वेतेमहेष्वासेप्राप्तेशल्यरथंप्रति कुरवः
पांडवेयाश्चकिमकुर्वतसंजय १ भीष्मःशांतनवःकिंवा तन्ममाचक्ष्वपृच्छतः संजयउवाच राजन्शतसहस्राणिततःक्ष
त्रियपुंगवाः २ श्वेतंसेनापतिंशूराःपुरस्कृत्यमहारथाः ३ राज्ञोबलंदर्शयंतस्तवपुत्रस्यभारत शिखंडिनंपुरस्कृत्यत्रा
तुमैच्छन्महारथाः अभ्यवर्तंतभीष्मस्यरथंहेमपरिष्कृतं जिघांसंतोयुधांश्रेष्ठंतदासीत्तुमुलंमहत् ४ तत्रेहंसंप्रवक्ष्या
मिमहावैशसमुत्तमं तावकानांपरेषांचयथायुद्धमवर्तत ५ तत्राकरोद्रथोपस्थानशून्यान्शांतनवोबहून् प्राकं
तंउत्तमांगानिशरैश्छिन्नैर्योत्तमः ६ समार्त्तरणेछैरैर्कतुल्यप्रतापवान् तुरन्समंतात्समेरेरविरुघनपथोत्तमः ७

तेनाजौ प्रेषिता राजन् शराः शतसहस्रशः क्षत्रियांतकराः संख्ये महावेगा महाबलाः पातयामास सूक्ष्मणां शिरांसि शतशो रणे राज
न् कंकपक्षेन तद्वीरा विगतमस्तकाः ९ रथाश्च रथेषु संसक्ता व्यदृश्यंत विशांपते एको रथं पर्यवर्तद्रोणिर्गोमस्तुरंगम १० स्वबलं
निहतं वीरं त्वं बमानं सकार्मुकं उदीर्णाश्च हया राजन्नवहंतश्च ततस्ततः ११ बद्धखड्गनिषंगाश्च विध्वस्ता शिरसो हताः
शतशः पतिता भूमौ वीरशय्यासु सेरते परस्परेण धावंतः पतिताः पुनरुत्थिताः उत्थाय च प्रधावंतो द्वंद्वयुद्धमवाप्नुयात्
१३ पंडिताः पुनरन्योन्यं लंवंतो रणमूर्द्धनि मत्तो गजः पर्यपतद्धतसारथिनो हयाः १४ सरथा रथिनश्चापि विमर्द्
तः समंततः स्पंदनात्पतत्कश्चिन्निहतोन्येन सायकैः १५ हतसारथिरप्युच्चैः पपात काष्ठवद्रथः युध्यमानस्य संग्रा
मे व्यूढेरजसि चोत्थिते १६ धनुःकूजितविज्ञानं तत्रासीत्प्रतियुध्यतः गात्रस्पर्शेन योधानां व्यज्ञायत परिपंथिनं १७
युध्यमानं शरै राजन् सिंजिनीध्वजिनीत्यगात् अन्योन्यं वीरसंशब्दो नाश्रूयत भटैः कृतः १८ शब्दायमाने सं
ग्रामे पटहे कर्णदारिणि युध्यमानस्य संग्रामे कुर्वतः पौरुषं स्वकं १९ नाश्रोषीन्नाम गोत्राणि कीर्तनं च परस्परं
भीष्मचापच्युतैर्बाणैरार्त्तानां युध्यतां मृधे २० परस्परेषां वीराणां मनांसि समकंपयन् तस्मिन्निराकुले युद्धे
तुमुले रोमहर्षणे २१ पिता स्वमौरसं पुत्रं नाभिजानाति कश्चन चक्रे भग्ने युगे चैकाको धुर्ये रथो हतः २२ आक्षि
प्तः स्पंदनाद्वीरः ससारथिरजिह्मगैः विधुरे भिन्नचक्रे च रथे च विहरी हते २३ तेन तेन स्म दृश्यंते बाधमानाः परस्प

रं योहतः शिरसाछिन्नोमर्मभिर्निहतोहतः २४ अहतः कोपिनैवासीद्भीष्मेनिघ्नतिशात्रवान् श्वेतः कुरूणामकरोत्क्षयं तस्मिन्म
हाहवे २५ राजपुत्रांस्तथोदारानवधीच्छतसंघशः चिछेदरथिनांतासौ शिरांसिशतसंघशः २६ सांगदाबाहवश्चैव धनूंषिसमंत
तः रथिनोरथचक्राणि तूणराशिरथानिच २७ क्षुद्राणिचमहान्हीरिपताकाश्चविशांपते हयौघाश्चरथौघाश्चनरौघाश्चैवभार
त २८ वारणाःशतशश्चैवहतास्ते श्वेतेनसंयुगे वयंश्वेतभयान्नीताविहायरथसत्तमं २९ अपसृतास्तथापश्याघन्तपश्यामतेप्रभुं
शरपातमपक्रम्यकुरवःकुरुनंदन ३० भीष्मंशांतनवंयुद्धेस्थिताःपश्यामसर्वशः अदीनोदीनसमयेभीष्मोस्माकंमहाहवे
३१ एकस्तस्थौनरव्याघ्रोगिरिर्मेरुरिवाचलः आददानइवप्राणान्सविताशिशिरात्यये ३२ गभस्तिभिरिवादित्यंतस्थौ
हेमरथोविमान् समुमोचमहेष्वासःशरसंघाननेकशः ३३ निघ्नन्नमित्रान्समरेवज्रपाणिरिवासुरान् तेवध्यमानाभी
ष्मेणप्रजह्रुस्तंमहाहवे ३४ स्वयूथादिवतेयूथान्मुक्तानिमिवदारुणाः तमेकमुपलभ्यैकोहृष्टःपुष्टःपरंतप ३५ दुर्यो
धनप्रियेयुक्तःपांडवान्बहुशोषयन् जीवितंदुस्त्यजंत्यक्त्वाभयंचसुमहाहवे ३६ पातयामाससैन्यानिपांडवानांविशां
पते प्रहरंतमनीकानिपितादेवव्रतस्तव ३७ दृष्ट्वासेनापतिंभीष्मोवेगितःसनस्समभ्ययात् सभीष्मंशरजालेनमहतासम
वाकिरत् ३८ श्वेतंचापितथाभीष्मःशरौघैःसमवाकिरत् तौवृषाविवनर्दंतौमत्ताविवमहाद्विपौ ३९ व्याघ्राविवसुसं
क्रुद्धावन्योन्यमभिजघ्नतुः अस्त्रैरस्त्राणिसंवार्यततस्तौपुरुषर्षभौ ४० भीष्मःश्वेतश्चयुयुधेपरस्परवधैषिणौ एकाह्ना
न्निर्दहेद्भीष्मःपांडवानामनीकिनी ४१ शरैःपरमसंक्रुद्धःश्वेतोयदिनपालयेत् पितामहंततोदृष्ट्वाश्वेतेनविमुखी

भी०
११०

कृतं ४२ प्रहर्षपांडवाजग्मुःपुत्रस्तेविमनाह्यभूत् ततोदुर्योधनःक्रुद्धःपार्थिवैःपरिवारितः ४३ सभीष्मःपांडवानीकमभ्यद्रव
त्संयुगे श्वेतोगांगेयमुत्सृज्यतवपुत्रस्यवाहिनीं ४४ नाशयामासवेगेनवृक्षान्वायुरिवौजसा द्रावयित्वाचमूंचैवंवैराटिःक्रो
धमूर्छितः ४५ आपतत्समहान्मूर्ध्नायत्रभीष्मोव्यवस्थितः तौतत्रापिगतौराजन्शरदीप्तौमहाबलौ ४६ अयुध्येतांमहात्मा
नौयथावावृत्रवासवौ अन्योन्यंतुमहाराजपरस्परवधैषिणौ ४७ निगृह्यकार्मुकंश्वेतोभीष्मंविव्याधसप्तभिः पराक्र
मंततस्तस्यपराक्रम्यपराक्रमी ४८ तरसावारयामासमत्तोमत्तमिवद्विपं वैराटिःसमरेक्रुद्धोभृशमायम्यकार्मुकं ४९
आजघानततोभीष्मंश्वेतःक्षत्रियनंदनः तंप्रत्यविध्यद्दशभिर्भीष्मःशांतनवस्तथा ५० सविद्धस्तेनबलवान्नाकंपतपथा
चलःश्वेतःशांतनवंभूयःशरैःसंनतपर्वभिः ५१ विव्याधपंचविंशत्यातदद्भुतमिवाभवत् प्रहस्यचरणीश्वेतःसृक्किणीप
रिसंलिहन् ५२ ततोदुर्योधनःक्रोधात्स्वमनीकमचोदयत् यत्ताभीष्मंपरीप्सध्वंरक्षमाणाःसमंततः ५३ तान्वैचपश्यमा
नांस्तान्श्वेतोस्त्रमयवाप्स्यति भीष्मःशांतनवःशूरस्तथासत्यंब्रवीमिते ५४ राजस्तुवचनंश्रुत्वात्वरमाणामहारथाः बले
नचतुरंगेणगांगेयमनुपालयन् ५५ वाल्हिकःकृतवर्माचशलःशल्यश्चभारत जरासंधिर्विकर्णश्चचित्रसेनोविविंशतिः
५६ त्वरमाणास्त्वराकालेपरिवार्यसमंततः शस्त्रवृष्टिंसुवहुलांश्वेतस्योपरिपालयन् ५७ ॥ तान्क्रुद्धान्निशितैर्बाणैस्त्व
रमाणोमहाबलः अवारयदमेयात्मादर्शयन्पाणिलाघवं ५८ सन्निवार्यतुतान्सर्वान्केसरीकुंजरानिव महताशरवर्षेण

राम०
११०

भीष्मस्य धनुरछिनत् ५९ ततोन्यद्धनुरादाय भीष्मः शांतनवो युधि श्वेतं विव्याध राजेंद्र कंकपत्रैः शिलाशितैः ६० ततः सेनाप
तिः क्रुद्धो भीष्मं बहुभिरायसैः विव्याध समरे राजन् सर्वलोकस्य पश्यतः ६१ ततः प्रव्यथितो राजा भीष्मं दृष्ट्वा निवारितं प्रवी
रं सर्वलोकस्य श्वेतेन युधि वै तदा ६२ निष्टानकश्च सुमहान् तव सैन्यस्य चाभवत् तं वीरं वारितं दृष्ट्वा श्वेतेन शरविक्षतं ६३
हतं श्वेतेन मन्यंते श्वेतस्य वशमागतं ततः क्रोधवशं प्राप्तः पिता देवव्रतस्तव ६४ ध्वजमुन्मथितं दृष्ट्वा तां च सेनां निवा
रितां श्वेतं प्रति महाराज व्यसृजत् सायकान् बहून् ६५ तानावार्य रणे श्वेतो भीष्मस्य रथिनां वरः धनुश्चिच्छेद भल्लेन पुनरे
व पितुस्तव ६६ उत्सृज्य कार्मुकं राजन् गांगेयः क्रोधमूर्छितः अन्यत्कार्मुकमादाय विपुलं बलवत्तरं ६७ तत्र सं
धाय विपुलान् भल्लान् सप्त शिलाशितान् चतुर्भिश्चतुरश्चाश्वान् श्वेतस्य पृतनापतेः ६८ ध्वजं द्वाभ्यां चाचिच्छेद सप्तमे
न च सारथेः शिरश्चिच्छेद भल्लेन संक्रुद्धो लघुविक्रमः ६९ हताश्वसूतात्स रथादवप्लुत्य महारथः अमर्षवशमाप
न्नो व्याकुलः समपद्यत ७० विरथं रथिनां श्रेष्ठं श्वेतं दृष्ट्वा पितामहः ताडयामास निशितैः शरसंघैः समंततः ७१ स ता
ड्यमानः समरे भीष्म चापच्युतैः शरैः स्वरथे धनुरुत्सृज्य शक्तिं जग्राह कांचनीं ७२ ततः शक्तिं रणे घोरां ग्रहायोग्रां म
हाभयां कालदंडोपमां घोरां मृत्योश्च शमनक्षमां ७३ अब्रवीच्च तदा श्वेतो भीष्मं शांतनवं रणे तिष्ठेदानीं सुसंरब्धः ॥

भी०
२११

पश्यमांपुरुषोत्तम ७४ एवमुक्त्वामहेष्वासोभीष्मंयुधिपराक्रमी ततःशक्तिममेयात्माचिक्षेपभुजगोपमां ७५ पांडवार्थेपराक्रां
तस्तवानर्थंचिकीर्षति हाहाकारोमहानासीत्पुत्राणांतेविशांपते ७६ दृष्ट्वाशक्तिंमहाघोरांमृत्योर्दंडसमप्रभां श्वेतस्यक
रनिर्मुक्तांनिर्मुक्तोरगसंनिभां ७७ अपतत्सहसाराजन्महोल्केवनभस्तलात् ज्वलंतीमंतरिक्षेतांज्वालाभिरिवसंवृतां
७८ सुसंभ्रांतस्तदाराजन्पितादेवव्रतस्तव अष्टभिर्नवधाभीष्मःशक्तिंचिच्छेदपत्रिभिः ७९ उत्कृष्टहेमविकृतानिकृता
निशितैःशरैः उच्चुक्रुशुस्ततःसर्वेतावकाभरतर्षभ ८० शक्तिंविनिहतांदृष्ट्वावैराटिःक्रोधमूर्छितः कालोपहतचेतास्च
कर्त्तव्यंनाभ्यजानत ८१ क्रोधसंमूर्छितोराजन्वैराटिःप्रहसन्निव गदांजग्राहसंहृष्टोभीष्मस्यनिधनंगतः ८२ क्रोधेन
रक्तनयनोदंडपाणिरिवापरः भीष्मंसमभिदुद्राववजलौघइवपर्वतं ८३ तस्यवेगमसंवार्यंमत्वाभीष्मःप्रतापवान् प्रभा
ववित्प्रमोक्षार्थंसहसाधरणींगतः ८४ श्वेतःक्रोधवशाविष्टोभ्रामयित्वातुतांगदां रथेभीष्मस्यचिक्षेपयथादेवोधनेश्वरः
८५ तयाभीष्मनिपातिन्यासरथोभस्मसात्कृतः सध्वजःसहसूतेनसाश्वःसहयुगंधरः ८६॥ ॥ ॥ ॥

राम०
२११

विरथंरथिनांश्रेष्ठंभीष्मंदृष्ट्वारथोत्तमाः अभ्यधावंतसहिताः शल्यप्रमुखतोरथाः ८७ ततोन्यंरथमास्थायधनुर्विस्फार्यदु
र्मनाः शनैकैरभ्ययातश्वेतंगांगेयःप्रहसन्निव ८८ एतस्मिन्नंतरेभीष्मःशुश्राव विपुलांगिरं आकाशादीरितांदिव्यामात्मनो
हितसंश्रयां ८९ भीष्मभीष्ममहाबाहोशीघ्रंयत्नंकुरुष्व वै एषह्यस्यजयेकालोनिर्दिष्टोविश्वयोनिना ९० एतच्छ्रु
त्वातुवचनंदेवदूतेनभाषितं संप्रहृष्टमनाभूत्वावधेतस्यमनोदधे ९१ विरथंरथिनांश्रेष्ठंश्वेतंदृष्ट्वापदातिनं ॥
८३ संहितास्तुवंर्धतपरीप्संतोमहारथाः ९२ सात्यकिर्भीमसेनश्चधृष्टद्युम्नश्चपार्षतः कैकेयाधृष्टकेतुश्चअभिमन्युश्च
वीर्यवान् ९३ एतानापततोदृष्ट्वाद्रोणशल्यकृपैःसह आवारयदमेयात्मावायुवेगानिवाचलः ९४ सन्नि
रुद्धेषुसर्वेषुपांडवेषुमहात्मसु श्वेतःखड्गमथाकृष्यभीष्मस्यधनुराच्छिनत् ९५ तदपास्यधनुश्छिन्नंत्वरमाणाः
पितामहः देवदूतवचःश्रुत्वावधेतस्यमनोदधे ९६ ॥ ॥ ॥

ततःप्रचरमाणास्तुपितादेवव्रतस्तव अन्यत्कार्मुकमादायत्वरमाणोमहारथः ९७ क्षणेनसज्जमकरोत्तश
श्चापंसमरेथ पितातेभरतश्रेष्ठःश्वेतंदृष्ट्वामहारथं ९८ हतंतैस्तैर्नरव्याघ्रैर्भीमसेनपुरोगमैः अभ्यवर्त्ततगां
गेयःश्वेतंसेनापतिंकृतं ९९ आपतंतंततोभीष्मंभीमसेनःप्रतापवान आजघ्नेविशिखैःषष्ट्यासेनान्यंचमहा
रथः १०० अभिमन्युंचसमरेपितादेवव्रतस्तव वारयित्वाशरैर्घोरैरन्यानपिमहारथान १०१ आजघ्नेभरतश्रे
ष्ठस्त्रिभिःसंनतपर्वभिः सात्यकिंचशतेनाजौभरतानांपितामहः २ धृष्टद्युम्नंचविंशत्याकैकेयंचापिपंचभिः।

भिः तांश्चसर्वान्महेष्वासान्नृपशार्दूलतस्तव ३ व्यापितःशरैर्घोरैः स्वेनममाभिदुद्रुवे ततः शरंमृत्युसमंभारसाधनमुत्तमं ४ विकृष्यबलवान्भी
ष्मः समधत्तदुरासदं ब्रह्मास्त्रेणानुसंयुक्तंतंशरंलोमवाहिनं ५ ददृशुर्देवगंधर्वाः पिशाचोरगराक्षसाः सतस्यकवचंभित्वाज्वलदग्निमितौजसः ६
जगामधरणींबाणोमहाशनिरिवज्वलन् अस्तंगच्छन्यथादित्यःप्रभामादायसत्वरः ७ एवंजीवितमादायश्वेतदेहाज्जगामसः ततोभीष्मेण
नाम्याग्रेनयथाविधि हतंयुधि ८ प्रपतंतमपश्याम गिरेःशृंगमिवच्युतं अयोधाःपांडवास्तत्र क्षत्रियाश्चमहारथाः ९ प्रहृष्टास्तुततःसर्वेकुरव
श्चापिसर्वशः ततोदुःशासनोराजन्श्वेतंदृष्ट्वानिपातितं १० वादित्रनिनदैर्घोरैर्नृत्यतिस्मसमंततः अस्मिन्शरेमहेष्वासेभीष्मेणाह
वशोभिना ११ प्रावेपन्[illegible]हेष्वासाःशिखंडिप्रमुखारथाः ततोधनंजयोराजन्वार्ष्णेयश्चापिसर्वशः १२ अवहारंशनैश्चक्रेनिहतेवाहिनीपतौ
ततोवहारःसैन्यानां[illegible]षांचभारत १३ तावकानांपरेषांचनर्दतांमर्षतांस्वनः पार्थाविमनसोभूत्वाप्राविशंतमहारथाः १४ चिंत
यंतोवधंघोरंकौरवाणांपरंतप इतिश्रीभीष्मपर्वणिअध्यायः ४५ धृतराष्ट्रउवाच श्वेतेसेनापतौतातसंग्रामेनिहतेपरैः किमकुर्वन्महेष्वा
साःपंचालाःपांडवैःसह १ सेनापतिंसमाकर्ण्यश्वेतंयुधिनिपातितं तदर्थंयततांचापिपरेषांप्रपलायिनां २ मनःप्रीणातिमेवाक्यंजयं
संजयशृण्वतः प्रत्युपायंचिंतयतांलज्जांनःप्रस्रवंतिमे ३ सहिवीरोनुरक्तश्चवृद्धःकुरुपतिस्तदा कृतवैरंमहातेनपितुःपुत्रेणधीमता ४
तस्योद्वेगभयाच्चापिसंश्रितापांडवान्पुरा सर्वंस्वशरीरंसंत्यज्यदुःखंसंश्रित्यतिष्ठति ५ पांडवानांप्रतापेनदुर्गदेशंप्रविश्यच सपत्नशतसं

मो०
२१३

बाधसतेवंसमंस्थितः ६ अश्वत्थामैवमस्त्राणां पुराणां सुहृन्मतिः नेतायुधिष्ठिरे भक्तः कथं संजय सूदितः ८ प्रेषितः सपत्नः क्रुद्धः पानालिप्रहतपाथमः
न युद्धे द्रोणच येद्भीष्मो न चाचार्यः कथंचन न कृपो न च गांधारो नाहं संजय पाण्डवे न वासुदेवो वार्ष्णेयो धर्मराजश्च पाण्डवः ९ न भीमो नार्जुनश्चैव न
यमौ पुरुषर्षभौ वार्यमाणो मयात्यर्थं गांधार्या विदुरेण च १० जामदग्न्येन रामेण व्यासेन च महात्मना दुर्योधनो युद्धमना नित्यमेव हि सं
जय ११ कर्णं समंतमास्थाय लोबलस्य पापकृत् दुःशासनस्य चन्नयापांडवानभ्यसूयत १२ नसाहं व्यसनं घोरं ममेषाश्चेनुसंजय स्वेत
स्वविना नभोष्मस्य विजयेरणे १३ संक्रुद्धः कृष्णसहितः पार्थः किमकरोद्युधि अर्जुनाद्धि भयं भूतस्तन्मेतातनशाम्यति १४ सहि
शूरस्त्वकौंतेयः क्षिप्रकारी महाबलः मन्ये शौरैः शरीराणि प्रमथिष्यति विद्विषां १५ ऐंद्रिरिंद्रात्मजः समत्तेपेंद्रसदृशो रणे अमोघक्रोधसं
कल्पो हस्वावः किमभून्मनः १६ तथैव वेदविद्धूरो ज्वलनार्कसमद्युतिः ऐंद्रास्त्रविदमेयात्मा प्रापतत्समितिंजयः १७ वज्रसंस्पर्श
रूपाणामस्त्राणामायकारिता शम्बआपैक्षहस्तं तु शावंक्रोमहारथः १८ ससंजयमहाप्राज्ञो तुपरस्यात्मजो बली धृष्टद्युम्नः किमकरो
त्स्वेते युधिनिपातिते १९ ममचैवापराधेन सर्वमेतत्त्रशिष्यति मन्येमनः प्रजज्वालपांडवानां महात्मनां २० तेषां क्रोधं विविंनयंत्स्वत्रहः सु
चनिशासुच नशांतिमधिगच्छामि सर्वमाचक्ष्व संजय २१ संजयउवाच गतः पूर्वाह्नसमयेतस्मिन्नहनिदारुणे कृतवर्माणमहितं द
स्वाशल्यमवास्थितं २२ शत्रुः क्रोधाग्नजज्वालहविषा हव्यवाडिव सविस्फार्यमहाचापं शक्रचापोपमं बली २३ अभ्याव

एम०
२१३

त्रिभ्यांसैवेशल्यंमद्राधिपंबली महारथंवंशेनसमंनातिवीर्यान्: २४ सजनुवाणमयंवर्षंप्राप्यावल्यायशंति तमायनंतंसंख्येश्म
त्वावाणविक्रमं २५ तावकानांरथा: सप्तसमंतात्समवारयन् मद्रराजपरीप्संतोमृत्योर्दंष्ट्रांतरंगतं २६ बृहद्बलश्चकौशल्योजय
त्सेनश्चमागध: तथारुक्मरथोराजनपुत्र:शल्यस्यमानित: २७ विंदानुविंदावावंत्यौकांबोजश्चसुदक्षिण: बृहत्क्षत्रस्यदायाद:
सैंधवश्चजयद्रथ: नानाधातुविचित्राणिकार्मुकाणिमहात्मनां विस्फारितान्यदृश्यंततोयदेष्विवविद्युत: २९ तेतुवाणमयंवर्षंशल्य
मूर्ध्निन्यपातयत् निदाघांतेनिलोद्धूतामेघाइवनभोजलं ३० तत:क्रुद्धोमहेष्वास:सप्तभल्लै:सुतेजनै: धनूंषितेषामाच्छिद्य
ननर्दपृतनापति: ३१ ततोभीष्मोमहावाहुर्विनद्यजलदोयथा तालमात्रंधनुर्गृह्यशंखमभ्यद्रवद्रणे ३२ तमुद्यतमुदीक्ष्याथम
हेष्वासंमहाबलं संत्रस्तापांडवीसेनावातवेगाहतेवनौ: ३३ तत्रार्जुन:संत्वरित:शंखस्यासीत्पुर:सर: भीष्माद्रक्ष्योधमर्थेतित
त्वयुद्धमवर्तत ३४ हाहाकारोमहानासीद्योधानांयुधियुध्यतां तेजस्तेजसिसंपृक्तमित्येवविस्मयंययु: ३५ अथशल्योगदा
पाणिरवतीर्यमहारथात् शंखस्यचतुरोवाहानवधीत्क्षत्रियर्षभ ३६ सहतास्वाद्रथात्तूर्णंखड्गमादायविद्रुत: बीभत्सोस्वरथंप्रा
प्यतत:शांतिमविंदत ३७ ततोभीष्मोरथात्तूर्णमुत्पतंत:पतत्रिण: वैरंतरिक्षंभूमिश्चसर्वत:समवस्तृता ३८ पां

भी०
२१४

चालानथमत्स्यांश्चकेकयांश्चप्रभद्रकान् भीष्मः प्रहरतांश्रेष्ठः पातयामासमार्गणैः ३९ ततस्तस्मिन्समरेराजन्पांडवस्यमहाचम
ह्वतपांचालस्तुपरःसेनपाहृतं ४० प्रियसंवधिनंराजंश्छरांश्चविकिरन्बहून् अग्निनेवप्रदग्धानिवनानिशिशिरात्यये ४१ शर
दग्धामहेष्वंतसेसानिर्दृपदस्मह अतिष्ठत्रणेभीष्मोविधूमइवपावकः ४२ मध्यंदिनेयथादित्यंतपंतमिवतेजसा नशेकुः
पांडवेयस्ययोधाभीष्मंनिरीक्षितुं ४३ वीक्षांचक्रुः समंतात्तेपांडवाभयपीडिताः त्रातारंनाध्यगच्छंतगावः शीतार्दिताइव
४४ हतावसौविशिष्टैरुसेनागांगेयशरपीडिता सिंहेनेवविनिर्भिन्नामुक्तागोरिवगोपते ४५ हतविद्रुतेसैन्येनिरुत्साहे
विमर्दिते हाहाकारोमहानासीत्पांडुसैन्यस्यभारत ४६ ततोभीष्मः शांतनवोनित्यंमंडलकार्मुकः मुमोचबाणान्दी प्ताग्रान्
प्तायान्महाशीविषानिव ४७ शरैरेकायनीकुर्वन्दिशः सर्वायतव्रतः जघानपांडवरथानादिश्यादिश्यभारत ४८ ततः
सैन्येषुभग्नेषुमथितेषुचभारत प्राप्तेचास्तंदिनकरेनप्राज्ञायतकिंचन ४९ भीष्मंचसमुदीर्यंतंदृष्ट्वापार्थामहाहवे अवहारमकुर्वं
तसैन्यानांभरतर्षभ ५० इतिश्रीभीष्मपर्वणिअध्यायः ४६ प्रथमदिवसयुद्धं संजयउवाच कृतेवहारेसैन्यानांप्रथमेभरतर्षभ भी
ष्मेचयुधिसंरब्धेहृष्टेदुर्योधनेतदा १ धर्मराजस्ततस्तूर्णमभिगम्यजनार्दनं भ्रातृभिः सहितः सर्वैः सर्वैश्चैवजन
रेश्वरैः २ शोकेनमहतायुक्तश्चिंतयानः पराजयं वार्ष्णेयमब्रवीद्राजादृष्ट्वाभीष्मस्यविक्रमं ३

लम०
२१४

७३

श्रीः

कृष्ण पश्य महेष्वासं भीमं भीमपराक्रमं शरैर्दहंतं सैन्यं मे ग्रीष्मे कक्षमिवानलः ४ कथमेनं महात्मानं शक्ष्यामः प्रतिवीक्षितुं लेलिह्यमानं सैन्यं मे हविष्मंत
मिवानलं ५ एतं हि पुरुषव्याघ्रं धनुष्मंतं महाबलं दृष्ट्वा विप्रद्रुतं सैन्यं मदीयं मार्गणाहतं ६ शक्यो जेतुं यमः क्रुद्धो वज्रपाणिश्च संयुगे वरुणः पाशभृच्चापि कु
बेरो वा गदाधरः ७ नतु भीष्मो महाबाहुः शक्यो जेतुं महाबलः सोहमेवं गते मग्नो भीष्मागाधजले मुनः ८ आत्मनो बुद्धिदौर्बल्याद्भीष्ममासाद्य केशव वनं
यास्यामि वार्ष्णेय श्रेयो वा मे न जीवितं ९ न चेमान् पृथिवीपालान् दातुं भीष्माय मृत्यवे क्षपयिष्यति सेनां मे कृष्ण भीष्मो महास्त्रवित् १० यथानलं च
लितं पतंगाः समभिद्रुताः विनाशायैव गच्छंति तथा मे सैनिका जनः ११ क्षयं नीतोस्मि वार्ष्णेय राज्यहेतोः पराक्रमी भ्रातरश्चैव मे वीराः कर्शिताः श
रपीडिताः १२ मत्कृते भ्रातृहार्देन राज्याद्भ्रष्टास्तथा सुखात् जीवितं बहुमन्येहं जीवितं त्वद्य दुर्लभं १३ जीवितस्य हि शेषेण तपस्तप्स्यामि दुश्चरं न
घातयिष्यामि रणे मित्राणीमानि केशव १४ रथान्मे बहुसाहस्रान् दिव्यैरस्त्रैर्महाबलः घातय[illegible]त्यनिशं भीष्मः प्रवराणां प्रहारिणां १५ किंनु कृत्वा हितं मे
स्याद्ब्रूहि माधव माचिरं मध्यस्थमिव पश्यामि समरे सव्यसाचिनं एको भीष्मः परं शक्त्या युध्यत्येष महाभुजः केवलं बाहुवीर्येण क्षत्रधर्ममनुस्मरन् १६
गदया वीरघातिन्या यथात्माहं महामनाः करोत्यसुकरं कर्म रथाश्वनरदंतिषु १८ नालमेष क्षयं कर्तुं परसैन्यस्य मारिष आर्जवेनैव युद्धेन वीर वर्षश
तैरपि १९ एको ह्यस्त्रवित्सखा ते यः सोप्यस्मानुपेक्षते निर्दह्यमानान्भीष्मेण द्रोणेन च महात्मना २० दिव्यान्यस्त्राणि भीष्मस्य द्रोणस्य च महात्म
नः धक्ष्यंति क्षत्रियान्सर्वान्प्रयुक्तानि पुनः पुनः २१ कृष्ण भीष्मः सुसंरब्धः सहितः सर्वपार्थिवैः क्षपयिष्यति नो नूनं यादृशोस्य पराक्रमः २२
स त्वं पश्य महाभाग योगेश्वर महारथं भीष्मं यः शमयेत्संख्ये दावाग्निं जलदो यथा २३ तव प्रसादाद्गोविंद पांडवा निहतद्विषः स्वराज्यमनुसंप्राप्ता मो
दिष्यंते सबांधवाः २४ एवमुक्त्वा ततः पार्थो ध्यायन्नास्ते महामनाः चिरमंतर्मना भूत्वा शोकोपहतचेतनः २५ शोकार्त्तं पांडवं दृष्ट्वा दुःखेना
हतचेतसं अब्रवीत्तत्र गोविंदो हर्षयन्सर्वपांडवान् २६ मा शुचो भरतश्रेष्ठ न त्वं शोचितुमर्हसि यस्य ते भ्रातरः शूराः सर्वे लोकविश्रुताः २७
अहं च प्रियकृद्राजन् सात्यकिश्च महारथः विराटद्रुपदौ चैव धृष्टद्युम्नश्च पार्षतः २८ तथैव सबलाः सर्वे राजानो राजसत्तम त्वत्प्रसादं प्रती

वी २

भीष्म: ७

स्पंनेतदुक्तास्तुविशेषतः २९ अयंतेपार्थनोनिर्मोहितकामःप्रियेतरैसेनापतिमनुज्ञासोधृष्टद्युम्नोमहारथः ३० शिखंडीचमहाबाहोभीष्मस्यनिध
नंकिलएतच्छ्रुत्वामहाराजोधृष्टद्युम्नंमहारथं ३१ अब्रवीत्स्मितोतस्मांवासुदेवस्यशृण्वतः धृष्टद्युम्ननिबोधेदंयत्त्वांवक्ष्यामिमारिष ३२ नाति
क्रमंभवेत्तत्ववचनंममभाषितं भवान्सेनापतिर्मह्यंवासुदेवेनसंमतः ३३ कार्तिकेयोयथानित्यंदेवानामभवत्पुरा तथात्वमपिपांडूनांसेना
नीर्भवपार्षत ३४ सत्वंपुरुषशार्दूलविक्रम्यजहिकौरवान् अहंचत्वानुयास्यामिभीमःकृष्णश्चमारिष ३५ माद्रीपुत्रौचसहितौद्रौपदेयाश्चदंशि
ताः येचान्येपृथिवीपालाःप्रधानाःपुरुषर्षभ ३६ ततउद्धर्षयन्सर्वान्धृष्टद्युम्नोभ्यभाषत अहंद्रोणांतकःपार्थविहितःशंभुनापुरा ३७ रणेभी
ष्मंतथाद्रोणंकृपंशल्यंजयद्रथं सर्वानद्यरणेदृप्तान्प्रतियोत्स्यामिपार्थिव ३८ अथोत्क्रुष्टंमहेष्वासैःपांडवैर्युद्धदुर्मदैः समुद्यतेपार्थिवेंद्रेपार्षतेशत्रु
तापने ३९ तमब्रवीत्पुनःपार्थःपार्षतंशत्रुतापनं व्यूहःक्रौंचारुणोनामसर्वशत्रुनिषूदनः ४० यंबृहस्पतिरिंद्रायतदादेवासुरेब्रवीत तंप
थावत्सतिव्यूहंपरानीकविनाशनं ४१ अदृष्टपूर्वंराजानःपश्यंतुकुरुभिःसह तथोक्तःसहदेवेनविष्णुर्वज्रभृताइव ४२ प्रभातेसर्वसैन्यानाम
ग्रेचक्रेधनंजयं आदित्यपथगःकेतुस्तस्याद्भुतमनोहरः ४३ शासनात्पुरुहूतस्यनिर्मितोविश्वकर्मणा इंद्रायुधसवर्णाभःपताकाभिरलंकृतः
४४ आकाशगइवाकाशेगंधर्वनगरोपमः नृत्यमानइवाभातिरथचर्यासुमारिष ४५ तेनरत्नवतापार्थःसचगांडीवधन्वना बभूवपरमोपेतःस्वयं
भूरिवभानुना ४६ शिरोभूद्द्रुपदोराजामहत्यासेनयावृतः कुंतिभोजश्चचैद्यश्चचक्षुरास्तांनरेश्वर ४७ दाशार्णकाःप्रभद्राश्चदासेरकगणैःसह
आनूपकाःप्रभद्राश्चग्रीवायांभरतर्षभ ४८ पटच्चरैश्चपौंड्रैश्चपौरवानाकौरवकैस्तथा विषादैःसहितश्चापिपृष्ठमासीद्युधिष्ठिरः ४९ पक्षौतुभीम
सेनश्चधृष्टद्युम्नश्चपार्षतः द्रौपदेयाभिमन्युश्चसात्यकिश्चमहारथः ५० पिशाचादारदाश्चैवपौंड्राःकुंडीविषैः सहैयवनाधेनुकाश्चैवतंगणाःपरतंग
णाः ५१ बाह्लिकास्तित्तिराश्चैवचोलाःपांड्याश्चभारत एतेजनपदाराजन्दक्षिणंपक्षमाश्रिताः ५२ अग्निवेश्याजतुंडामलदादाशकारवः
शबराःकुंभसाश्चैववत्साश्चसहमालकैः ५३ नकुलःसहदेवश्चवामंपक्षंसमाश्रिताः रथानामयुतंपक्षःशिरस्त्रियुतंतथा ५४ पृष्ठमर्बुद

मेवासील्लक्षहस्राणिचविंशतिः ग्रीवायांनियुतंचापिसहस्राणिचसप्ततिः ५५ पक्षकोटिप्रपक्षेषुपक्षांतेषुचवारणाः जग्मुःपरिवृताराजन्चलंत
इवपर्वताः जघनंपालयामासविराटःसहकेकयैः काशिराजश्चशैब्यश्चरथानामयुतैस्त्रिभिः ५७ एवमेतंमहाव्यूहंव्यूह्यभारतपांडवाः सूर्योदयमभि
प्संतःस्थितायुद्धायदंशिताः ५८ तेषामादित्यवर्णानिविमलानिमहांतिच श्वेतच्छत्राणिशुभ्राणिवारणेषुरथेषुच ५९ इतिश्रीभीष्मपर्वणित्र्यध्यायः
५० संजयउवाच क्रौंचंततोमहाव्यूहमभेद्यंतनयस्तव व्यूढंदृष्ट्वामहाघोरंपार्थेनामिततेजसा १ आचार्यमुपसंगम्यकृपंशल्यंचमारिष सोमद
त्तिंविकर्णंचतथाश्वत्थामानमेवच २ दुःशासनादीन्भ्रातॄंश्चसर्वानेवचभारत अन्यांश्चसुबहून्शूरान्युद्धायसमुपागतान् ३ प्राहेदंवचनंकालेहर्षय
न्तनयस्तव नानाशस्त्रप्रहरणाःसर्वेशस्त्रार्थकोविदाः ४ एकैकशःसमर्थाहियूयंसर्वेमहारथाः पांडुपुत्रान्रणेहंतुंससैन्यान्किमुसंहताः ५
अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं ६ संस्थानाःशूरसेनाश्चविकर्णाःकुकुरास्तथा रेचका
स्त्रिगर्ताश्चमद्रकायवनास्तथा ७ शत्रुंजयेनसहितास्तथादुःशासनेनहि विकर्णेनसुवीरेणतथानंदोपनंदकैः ८ चित्रसेनेनसहिताःस
हितामणिभद्रकैः भीष्ममेवाभिरक्षंतुसहसैन्यपुरःसराः ९ ततोभीष्मश्चद्रोणश्चतवपुत्राश्चमारिष अव्यूहंतमहाव्यूहंपार्थानांप्रतिबा
धने १० भीष्मःसैन्येनमहतासमंतात्परिवारितः ययौप्रकर्षन्महतींवाहिनींसुरराडिव ११ तमन्वयान्महेष्वासोभारद्वाजःप्रतापवान् कुं
तलैश्चदशार्णैश्चमागधैश्चविशांपते १२ विदर्भैर्मेकलैश्चैवकर्णप्रावरणैरपि सहिताःसर्वसैन्येनभीष्ममाहवशोभिनो १३ गंधाराःसिंधु
सौवीराःशिबयोथवसातयः शकुनिश्चस्वसैन्येनभारद्वाजमपालयत् १४ ततोदुर्योधनोराजासहितःसर्वसोदरैः अश्वातकैर्विकर्णैश्चतथावामनको
सलैः १५ दरदैश्चवृकैश्चैवतथाक्षुद्रकमालवैः अभ्यरक्षंतसंहृष्टाःपांडवेयस्यवाहिनी १६ भूरिश्रवाःशलःशल्योभगदत्तश्चमारिषविंदा

नि२

त्तुविंदाचार्यसौवामंपार्श्वमपालयत् १७ सोमदत्तिःसुशर्माचकांबोजश्चसुदक्षिणः श्रुतायुश्चाच्युतायुश्चदक्षिणांपक्षमाश्रिताः १८ अश्वत्थामा
कृपश्चापिकृतवर्माचसात्वतः शकुनीपार्श्वतस्तस्यचानाजनपदेश्वराः १९ केतुमानवसुदानश्चपुत्रःकाश्यस्यवाविभुः ततस्तेतावकाःसर्वेहृष्टा
युद्धायभारत २० दध्मुःशंखान्मुदायुक्ताःसिंहनादांस्तथानदन् तेषांश्रुत्वातुहृष्टानांकुरुवृद्धःपितामहः २१ सिंहनादंविनद्योच्चैःशंखंदध्मौप्र
तापवान् ततःशंखाश्चभेर्यश्चपेशपश्चविविधाःपरे २२ आनकाश्चाहन्यंतसशब्दस्तुमुलोभवत् ततश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ २३
प्रदध्मतुःशंखवरौहेमरत्नविभूषितौ पांचजन्यंहृषीकेशोदेवदत्तंधनंजयः २४ पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः अनंतविजयंराजाकुंती
पुत्रोयुधिष्ठिरः २५ नकुलःसहदेवश्चसुघोषमणिपुष्पकौ काशिराजश्चशैब्यश्चशिखंडीचमहारथः २६ धृष्टद्युम्नोविराटश्चसात्यकिश्चमहा
रथः पांचालश्चमहेष्वासोद्रौपदेयाश्चपंचये २७ सर्वेदध्मुर्महाशंखान्सिंहनादांश्चनेदिरे सघोषःसुमहांस्तत्रवीरैस्तैःसमुदीरितः २८
नभश्चपृथिवींचैवतुमुलोभ्यनुनादयन् एवमेतेमहाराजप्रहृष्टाःकुरुपांडवाः पुनर्युद्धायसंजग्मुस्तापयानाःपरस्परं २९ इतिश्रीभीष्मपर्वणित्र्य
ध्यायः ४८ धृतराष्ट्रउवाच एवंव्यूढेष्वनीकेषुमामकेष्वितरेषुच कथंप्रहरतांश्रेष्ठाःसंप्रहारंप्रचक्रिरे १ संजयउवाच समंव्यूढेष्वनीकेषुसन्न
द्धरुचिरध्वजाः अपारमिवसंदृश्यसागरप्रतिमंबलं २ तेषांमध्येस्थितोराजन्पुत्रोदुर्योधनस्तव अब्रवीत्तावकान्सर्वान्युध्यध्वमितिदंशिताः
३ तेमनःक्रूरमास्थायसमभि[illegible]त्यक्तजीविताः पांडवानभ्यवर्तंतसर्वएवोच्छ्रितध्वजाः ४ ततोयुद्धंसमभवत्तुमुलंलोमहर्षणं ता
वकानांपरेषांचव्यतिषक्तरथद्विपं ५ मुक्तास्तुरथिभिर्बाणारुक्मपुंखाःसुतेजिताः संनिपेतुरकुंठाग्रानागेषुचहयेषुच ६ तथाप्र
वृत्तेसंग्रामेधनुरुद्यम्यदंशितः अभिपत्यमहाबाहुर्भीष्मोभीमपराक्रमः ७ सौभद्रेभीमसेनेचसात्यकौचमहारथे कैकयेचविराटेचधृष्ट

सुमेरुर्यथापर्वते ८ एतेषु नरवीरेषु वेदिमत्स्वप्रभाविषु: वयःशौर्यगुणोत्कृष्टः कुरुपितामहः ९ आकंपत महाव्यूहस्तस्मिन्वीरसमागमे सर्वेषामेव
सैन्यानां मासीद्व्यतिकरो महान् १० सादिनो ध्वजिनश्चैव हताः प्रवरवाजिनः विप्रयाता रथानीकाः समपद्यंत पांडवाः ११ अर्जुनस्तु नरव्याघ्रो
दृष्ट्वा भीष्मं महारथं वार्ष्णेयमब्रवीत्क्रुद्धो याहि यत्र पितामह १२ एष भीष्मः सुसंक्रुद्धो वार्ष्णेय मम वाहिनीं नाशयिष्यति सुव्यक्तं दुर्योधन
हिते रतः १३ एष द्रोणः कृपः शल्यः विकर्णश्च जनार्दनः धार्तराष्ट्राश्च सहिता दुर्योधनपुरोगमाः १४ पांचालान्निहनिष्यंति रक्षिता दृढधन्विना
सोहं भीष्मं वधिष्यामि सैन्यहेतोर्जनार्दन १५ तमब्रवीद्वासुदेवो यत्तो भव धनंजय एष त्वां प्रापये वीर पितामहरथं प्रति १६ एवमुक्त्वा ततो
शौरी रथं तं लोकविश्रुतं प्रापयामास भीष्मस्य रथं प्रति जनेश्वर १७ चलद्बहुपताकेन बलाकावर्णवाजिना समुच्छ्रितमहाभीमनदद्वानरके
तुना १८ महता मेघनादेन रथेनादित्यवर्चसा विनिघ्नन्कौरवानीकं शूरसेनांश्च पांडवः १९ आगच्छच्छरशो प्रश्रं सुहृदां हर्षवर्द्धनः त
मापतंतं वेगेन प्रभिन्नमिव वारणं २० त्रासयानं रणे शूरान्पातयंतं च सायकैः सैंधवप्रमुखैर्गुप्तः प्राच्यसौवीरकैकयैः २१ सहसा प्रत्यु
दीयाय भीष्मः शांतनवोर्जुनं को हि गांडीवधन्वानमन्यः कुरुपितामहात् २२ द्रोणवैकर्त्तनाभ्यां वा रथी संयातुमर्हति ततो भीष्मो महारा
ज कौरवाणां पितामहः २३ अर्जुनं सप्तसप्तत्या नाराचानां समर्पयत् द्रोणश्च पंचविंशत्या कृपः पंचाशता शरैः २४ दुर्योधनश्चतुःषष्ट्या शल्य
श्च नवभिः शरैः द्रौणिः षष्ट्या नरव्याघ्रो विकर्णश्च त्रिभिः शरैः २५ आर्त्तायनिस्त्रिभिर्भल्लैः राजन्विव्याध पांडवं सर्वतो विद्धो महेष्वासः सर्वं
तान्निशितैः शरैः २६ न विव्यथे महाबाहुर्भिद्यमान इवाचलः स भीष्मं पंचविंशत्या कृपं च नवभिः शरैः २७ द्रोणं षष्ट्या नरव्याघ्रो विकर्णं

चतुर्भिः शरैः आजघ्ने त्रिभिर्द्रोणं राजानं चापि पंचभिः प्रत्यविध्यद्रणे यत्तः किरीटी भरतर्षभ तं तात च विराटश्च धृष्टद्युम्नश्च पार्षतः २९ द्रौपदेयाभिमन्युश्च परीवव्रुर्धनंजयं ततो द्रोणं महेष्वासं गांगेयस्य प्रिये रतं ३० अभ्यवर्षत पांचाल्यः संयुक्तः सहसोमकैः भीष्मस्तु रथिनां श्रेष्ठस्तूर्णं विव्याध पांडवं ३१ अशीत्या निशितैर्बाणैस्ततोऽक्रोशंत तावकाः तेषां तु निनदं श्रुत्वा प्रहृष्टानां प्रहृष्टवत् ३२ प्रविवेश ततो मध्यं रथसिंहः प्रतापवान् तेषां तु रथसिंहानां मध्यं प्राप्य धनंजयः ३३ विक्रीडधनुषा राजन् लक्ष्यं कृत्वा महारथान् ततो दुर्योधनो राजा भीष्ममाह नरेश्वरः ३४ पीड्यमानं स्वकं सैन्यं दृष्ट्वा पार्थेन संयुगे एष पांडुसुतस्तात कृष्णेन सहितो बली ३५ पातयन् सर्वसैन्यानि मूलं नः परिकृंतति त्वयि जीवति गांगेय द्रोणे च रथिनां वरे ३६ त्वत्कृते ह्येष कर्णोऽपि न्यस्तशस्त्रो विशांपते न युध्यति रणे पार्थान् हितकामः सदा मम ३७ स तथा कुरु गांगेय यथा हन्येत फाल्गुनः एवमुक्तस्ततो राजन् पिता देवव्रतस्तव ३८ धिक् क्षत्रधर्ममित्युक्त्वा प्रायात्पार्थरथं प्रति उभौ श्वेतहयौ राजन् संसक्तौ दृश्य पार्थिवाः ३९ सिंहनादं भृशं चक्रुः शंखान् दध्मुश्च मारिष द्रौणिर्दुर्योधनश्चैव विकर्णश्च तवात्मजः ४० परिवार्य रणे भीष्मं स्थिता युद्धाय मारिष तथैव पांडवाः सर्वे परिवार्य धनंजयं ४१ स्थिता युद्धाय महते ततो युद्धमवर्तत गांगेयस्तु रणे पार्थमानर्छन्नवभिः शरैः ४२ तमर्जुनः प्रत्यविध्यत् दशभिर्मर्मभेदिभिः ततः शरसहस्रेण सुप्रयुक्तेन पांडवः ४३ अर्जुनः समरश्लाघी भीष्मस्यावारयद्दिशः शरजालं ततस्तत्तु शरजालेन पार्थिव ४४ वारयामास पार्थस्य भीष्मः शांतनवस्तदा उभौ परमसंहृष्टावुभौ युद्धाभिनंदिनौ ४५ निर्विशेषमयुध्येतां कृतप्रतिकृतैषिणौ भीष्मचापप्रयुक्तानि शरजालानि संशयः ४६

म्५८

शीर्यमाणानमहश्पंतभिन्नोर्जुनसायकैः तथैवार्जुनमुक्तानिशरजालानिसर्वशः ४७ गांगेयशरनुन्नानिन्यपतंतमहीतले अर्जुनःपंचविंशत्याभीष्ममा
र्छेछितैः शरैः ४८ भीष्मोपिसमरेपार्थंविव्याधनवभिःशरैः अन्योन्यंतौहयान्विधाध्वजौचसमहाबलौ रथेषांरथचक्रंचचिक्रीडतुरिंदमौ ततःक्रुद्धोम
महाराजभीष्मःप्रहरतांवरः ५० वासुदेवंत्रिभिर्बाणैराजघानस्तनांतरे भीष्मचापच्युतैस्तैस्तुनिविद्धोमधुसूदनः ५१ विरराजरणेराजनसपुष्पइवकिं
शुकः ततोर्जुनोभृशंक्रुद्धोनिर्विद्धंप्रेक्ष्यमाधवं ५२ गांगेयसारथिंसंख्येनिर्बिभेदत्रिभिःशरैः यतमानौततौवीरावन्योन्यस्यवधंप्रति ५३ नाशक्नुतां
तदान्योन्यमभिसंधातुमाहवे मंडलानिविचित्राणिगतप्रत्यागतानिच ५४ दर्शयामासतूराजनसूतसामर्थ्यलाघवात् अंतरंचप्रहारेषुतर्कयंतौ
विशांपते ५५ राजनंतरमार्गस्थौस्थितावास्तांमुहुर्मुहुः उभौसिंहरवोन्मिश्रंशंखशब्दंचचक्रतुः ५६ तथैवचा[illegible]पनिर्घोषंचक्रतुस्तौमहारथौ त
योःशंखप्रणादेनरथनेमिस्वनेनच ५७ दारितासहसाभूमिश्चकंपेचननादच नतयोरंतरंकश्चिद्ददृशेभरतर्षभ ५८ बलिनौसमरेशूरावन्यो[illegible]न्यसदृशाउ
भौविक्रमात्रेणाभी[illegible]प्रपश्यंतत्रकौरवाः ५९ तत्रपांडुसुताःपार्थीविक्रमात्रेणजज्ञिरे तथोन्नीवर्पोराजनहष्टताहक्पराक्रमं ६० विस्मयंसर्वभू
तानिजग्मुर्भारतसंयुगे नतयोरंतरंकश्चिद्रणेपश्यतिभारत ६१ धर्मेस्थितस्यहियथानकश्चिद्वृजिनंक्वचित् उभौहिशरजालेनतावदृश्यौबभूवतुः ६२
प्रकाशौतततस्तूर्णंबभूवतूरणेउभौ तत्रदेवाःसगंधर्वाश्चारणाःसमहर्षिभिः अन्योन्यंप्रत्यभाषंतयोदृष्ट्वापराक्रमं नशक्योधिसंरब्धौजेतुमेतौम
हारथौ ६४ सदेवासुरगंधर्वैर्लोकैरपिकथंचन आश्चर्यभूतंलोकेषुयुद्धमेतन्महाद्भुतं ६५ नैवचैताहशंयुद्धंभविष्यतिकदाचन नैवशक्योरणेजेतुंभी

तेर

ष्मःपार्थेनधीमता ॥ ६६ सधनुःसरथःसाश्वःप्रवपुस्मापकानने तथैवपांडवंयुद्धेदेवैरपिदुरासदं ६७ नविजेतुंरणेभीष्मउत्सहेतधनुर्धरं आलोकादपियु
द्धेहिसममेतद्भविष्यति ६८ इतिस्मवाचः अथैनेप्रचरंतंपस्तनस्ततः गांगेयार्जुनयोःसंख्येस्तवयुक्ताविशांपते ६९ त्वदीयास्ततयोयोधाःपांडवेयाश्च
भारत अन्योन्यंसमरेजघ्नुस्तयोस्तत्रपराक्रमे ७० शितधारैस्तथाखड्गैर्विमलैश्चपरश्वधैःशरैरन्यैश्चबहुभिःशस्त्रैर्नानाविधैर्युधि ७१ उभयोःसेनयोःशू
रान्हंतंतपरस्परं वर्त्तमानेतथाघोरेतस्मिन्युद्धेसुदारुणे ७२ द्रोणपंचाल्ययोराजन्महानासीत्समागमः ७१ इतिश्रीमहाभारतेभीष्मपर्वणिऽध्या
यः ४९ धृतराष्ट्रउवाच कथंद्रोणोमहेष्वासःपांचाल्यश्चैवपार्षतः रणेसमीयतुर्यत्तौतन्ममाचक्ष्वसंजय १ दिष्टमेवपरंमन्येपौरुषादपिसंजय यः
प्रशांतनवोभीष्मोनातरद्युधिपांडवं २ भीष्मोहिसमरेक्रुद्धोहन्याल्लोकांश्चराचरान् सकथंपांडवोयुद्धेनातरत्तरसायुधिंजयः ३ संजयउवाच शृणुराज
न्स्थिरोभूत्वायुद्धमेतत्सुदारुणं नशक्यःपांडवोजेतुंदेवैरपिसवासवैः ४ द्रोणस्तुविविधैर्बाणैर्धृष्टद्युम्नमविध्यत सारथिंचास्यभल्लेनरथनीडाद
पातयत् ५ तस्याथचतुरोवाहांश्चतुर्भिःसायकोत्तमैःपीडयामाससंक्रुद्धोधृष्टद्युम्नस्यभारत ६ धृष्टद्युम्नस्ततोद्रोणंनवत्यानिशितैःशरैःविव्याध
समरेवीरस्तिष्ठेतिचाब्रवीत् ७ ततःपुनरमेयात्माभारद्वाजःप्रतापवान् शरैःप्रच्छादयामासधृष्टद्युम्नममर्षणं ८ आददेचशरंघोरंपार्षतस्यवधंप्र
ति शक्राशनिसमस्पर्शंमृत्युदंडइवापरं ९ हाहाकारोमहानासीत्सर्वसैन्यस्यभारत तमिषुंसंधितंदृष्ट्वाभारद्वाजेनसंयुगे १० तत्राद्भुतमपश्या
मधृष्टद्युम्नस्यपौरुषं यदेकःसमरेवीरस्तस्थौगिरिरिवाचलः ११ तंचदीप्तंमहाघोरमायांतंमृत्युमात्मनःचिच्छेदशरवृष्टिंचभारद्वाजेमुमोचह १२

ततउच्चुक्रुशुर्हृष्टाः पांचालाः पांडवैः सह। धृष्टद्युम्नेन तत्कर्म कृतं दृष्ट्वा सुदुष्करं १३ ततः शक्तिं महावेगां स्वर्णवैडूर्यभूषितां। द्रोणस्य निधनाकांक्षी चिक्षेप सपराक्र
मी १४ तामापतंतीं सहसा शक्तिं कनकभूषणां। त्रिधा चिच्छेद समरे भारद्वाजो हसन्निव १५ शक्तिं विनिहतां दृष्ट्वा धृष्टद्युम्नः प्रतापवान्। ववर्ष शरवर्षाणि
द्रोणं प्रति जनेश्वर १६ शरवर्षं ततस्तत्र संनिवार्य महायशाः। द्रोणो द्रुपदपुत्रस्य मध्ये चिच्छेद कार्मुकं। स छिन्नधन्वा समरे गदां गुर्वीं महायशाः। द्रोणाय प्रेषया
मास गिरिसारमयीं बली १७ सा गदा त्वरया मुक्ता प्रायाद्द्रोणं जिघांसया। तत्राद्भुतमपश्याम भारद्वाजस्य विक्रमं १८ लाघवाद्व्यंसयामास गदां हेमविभू
षितां। व्यंसयित्वा गदां चैव प्रेषयामास मारिष २० भल्लान्सुनिशितान्पीतान् स्वर्णपुंखान् शिलाशितान्। ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे
२१ अथान्यद्धनुरादाय धृष्टद्युम्नो महामनाः। द्रोणं युधि पराक्रम्य शरैर्विव्याध पंचभिः २२ रुधिराक्तौ ततस्तौ तु शुशुभाते नरर्षभौ। वसंते पुष्पश
बलौ पुष्पिताविव किंशुकौ २३ अमर्षितस्ततो राजन्पराक्रम्य चमूमुखे। द्रोणो द्रुपदपुत्रस्य पुनश्चिच्छेद कार्मुकं २४ अथैनं छिन्नधन्वानं शरैः
संनतपर्वभिः। अवाकिरदमेयात्मा वृष्ट्या मेघ इवाचलं २५ सारथिं चास्य भल्लेन रथनीडादपातयत्। अथास्य चतुरो वाहान् चतुर्भिर्निशितैः
शरैः २६ पातयामास समरे सिंहनादं ननाद च। ततोऽपरेण भल्लेन हस्तावापमथाच्छिनत् २७ स छिन्नधन्वा विरथो हताश्वो हतसारथिः। गदापा
णिरवारोहत्ख्यापयन्पौरुषं महत् २८ तामस्य विशिखैस्तूर्णं पातयामास भारत। रथादनवरूढस्य तदद्भुतमिवाभवत् २९ ततः स विपुलं चर्म श
तचंद्रं सतारकं। खड्गं च विपुलं दिव्यं प्रगृह्य सुभुजो बली ३० अभिदुद्राव वेगेन द्रोणस्य वधकांक्षया। आमिषार्थी यथा सिंहो वने मत्तमिव द्विपं
३१ तत्राश्चर्यमपश्याम भारद्वाजस्य पौरुषं। लाघवं चास्त्रयोगेन बलं बाह्वोश्च भारत ३२ यदेकः शरवर्षेण वारयामास पार्षतं। न शशाक ततो गंतुं ब

नवानपिसंयुगे ३३ तत्रास्थितमपश्यामधृष्टद्युम्नंमहारथे वारयानंशरौघांश्चवर्मणानकनहस्तवान् ३४ ततोभीमोमहाबाहुःसहसाभ्यपतद्बली सा
ह्यय्यकारीसमरेपार्षतस्यमहात्मनः ३५ सद्रोणंनिशितैर्बाणैराजन्विव्याधसप्तभिः पार्षतंचततस्तूर्णमन्यमारोपयद्रथं ३६ ततोदुर्योधनोराजा
कलिंगंसमचोदयत् सैन्येनमहतायुक्तंभारद्वाजस्यरक्षणे ३७ ततःसामहतीसेनाकलिंगानांनरेश्वरः भीममभ्यापयेभीमातवपुत्रस्यशासना
त् ३८ पांचाल्यमपिसंत्यज्यद्रोणोपिरथिनांवरः विराटद्रुपदौवृद्धौयोधयामाससंगतौ ३९ धृष्टद्युम्नोपिसमरेधर्मराजंसमभ्ययात् ततःप्रववृतेयुद्धंतुमु
लंलोमहर्षणं ४० कलिंगानांचसमरेभीमस्यचमहात्मनः जगतःप्रक्षयकरंघोररूपंभयानकं ४१ इतिभीष्मपर्वणिऽध्यायः ५० धृतराष्ट्रउवाच तथा
प्रतिसमादिष्टःकलिंगोवाहिनीपतिः कथमद्भुतकर्माणंभीमसेनंमहाबलं १ चरंतंगदयावीरंदंडपाणिमिवांतकं योधयामाससमरेकालिंगः
सहसेनया २ संजयउवाच पुत्रेणतवराजेंद्रसतथोक्तोमहाबलः महत्यासेनयायुक्तःप्रायाद्भीमरथंप्रति ३ तांपतंतीमहतींकलिंगानांमहा
चमूं रथाश्वनागकलिलांप्रगृहीतमहायुधां ४ भीमसेनःकलिंगानामार्छद्भारतवाहिनीं केतुमंतंचनैषादिमायांतंसहचेदिभिः ५ ततः
श्रुतायुःसंक्रुद्धोराज्ञाकेतुमतासह आससादरणेभीमंव्यूढानीकेनदंशितः ६ रथैरनेकसाहस्रैःकलिंगानांजनाधिपः अयुतेनगजानांचनि
षादैःसहकेतुमान् ७ भीमसेनंमहाराजसमंतात्पर्यवारयत् चेदिमत्स्यकरूषास्तुभीमसेनपुरोगमाः ८ अभ्यवर्तंतसहसानिषादान्सहरा
जभिः ततःप्रववृतेयुद्धंघोररूपंभयानकं ९ प्रधावतांचयोधानांपरस्परजिघांसया घोरमासीत्ततोयुद्धंभीमस्यसहसायकैः १० यथें
द्रस्यमहाराजमहत्यादैत्यसेनया तस्यसैन्यस्यसंग्रामेयुध्यमानस्यभारत ११ वसवस्तुमहोघ्छ ॥ छ॥ छ॥

॥ ६

दं सागरस्येव सर्वतः अन्योन्यमभ्यतदा योधा निकृंतंतो विशांपते १२ मही चकुम्पिता सर्वा [illegible] मांसशोणितसंनिभा योधान्स्वान्परांश्चापि न
वजानन्जिघांसया १३ स्वानप्यादस्ते तु स्वाः शूराः समरदुर्जयाः विमर्दः सुमहानासीदल्पानां बहुभिः सह १४ कलिंगैः सह चेदीनां निषादैश्च
विशांपते कृत्वा पुरुषकारं तु यथाशक्ति महाबलाः १५ भीमसेनं परित्यज्य संन्यवर्तंत चेदयः सर्वैः कलिंगैरासन्नः सन्निवृत्तेषु चेदिषु १६ स्वबा
हुबलमास्थाय संन्यवर्तत पांडवः न चचाल रथोपस्थाद्भीमसेनो महाबलः १७ शितैरवाकिरन्बाणैः कलिंगानां वरूथिनी कालिंगस्तु म
हेष्वासः पुत्रस्तस्य महारथः १८ शक्रदेव इति ख्यातो जघ्नतुः पांडवं शरैः ततो भीमो महाबाहुर्विधुन्वन्रुचिरं धनुः १९ योधयामास का
लिंगान्स्वबाहुबलमाश्रितः शक्रदेवस्तु समरे विसृजन्सायकान्बहून् २० अश्वान्जघान चतुरो भीमसेनस्य सायकैः तं दृष्ट्वा विरथं तत्र भी
मसेनमरिंदम २१ शक्रदेवोभिदुद्राव किरंतं निशितैः शरैः भीमस्योपरि राजेंद्र शक्रदेवो महाबलः २२ ववर्ष शरवर्षाणि तपांते जलदो यथा
हताश्वे तु रथे तिष्ठन्भीमसेनो महाबलः शक्रदेवाय चिक्षेप सर्वशैक्यायसीं गदां स तया निहतो राजन्कालिंगस्य सुतो महान् सध्वजः सह
सूतेन जगाम धरणीतले २३ हतमात्मसुतं दृष्ट्वा कालिंगानां महारथः रथैरनेकसाहस्रैर्भीमस्यावारयद्दिशः २४ ततो भीमो महाबा
हुर्गुरुं त्यक्त्वा महाबलं उद्बबर्ह स निस्त्रिंशं चिकीर्षुः कर्म दारुणं २५ चर्म चाप्रतिमं राजन्नार्षभं पुरुषर्षभः नक्षत्रैरर्धचंद्रैश्च शातकुं
भमयैश्चितं २६ कालिंगस्तु ततः क्रुद्धो धनुर्ज्यामवमृज्य च प्रगृह्य सशरं घोरमेकं सर्पविषोपमं २७ प्राहिणोद्भीमसेनाय वधाकांक्षी
नरेश्वरः तमापतंतं वेगेन प्रेरितं निशितं शरं २८ भीमसेनो द्विधा राजंश्चिच्छेद विपुलासिना उदक्रोशच्च संहृष्टस्त्रासयानो बलं तव २९
कालिंगोथ ततः क्रुद्धो भीमसेनस्य संयुगे तोमरान्प्राहिणोत्शीघ्रं चतुर्दश शिलाशितान् ३० तानप्राप्तान्महाबाहुः खगतानेव पां
डवः चिच्छेद सहसा ॥ ६०॥

राजन्खड्गंचोत्तीवरासिना ३१ निकृत्यतुरगोभीमस्तोमरान्वैचतुर्दश मानुमंतमभिप्रेस्यप्राद्रवत्पुरुषर्षभ ३२ भानुमांस्तुततोभीमंशरवर्षेणछा
दयन् ननादबलवन्नादेनादयानोनभस्तलं ३३ ततस्समम्रष्यभीमःसिंहनादंमहारणे ततःस्वरेणमहताविननादमहास्वनः ३४ तेनशब्देनवि
त्रस्ताकलिंगानांवरूथिनी नभीमंसमरेमेनेमानुषंपुरुषर्षभ ३५ ततोभीमोमहाराजनदित्वाविपुलंस्वनं सासिर्वेगादवप्लुत्यदंताभ्यांवारणो
त्तमं ३६ आरुरोहततोमध्यंनागराजस्यमारिष खड्गेनपृथुनामध्येभानुमंतमथाच्छिनत् ३७ सोंतरायुधिनंहत्वाराजपुत्रमरिंदमः गुरुभा
रसहंस्कंधेनागस्यासिमपातयत् ३८ छिन्नस्कंधःसविनदन्पपातगजयूथपः आरुग्णःसिंधुवेगेनसानुमानिवपर्वतः ३९ पततस्त्वाप्यवप्लुत्यगजाद्भा
रतभारत खड्गपाणिरदीनात्माततस्थौभुविसंदंशितः ४० सचचारबहून्मार्गानभितःपातयन्गजान् अग्निचक्रमिवाविद्धंसर्वतःप्रत्यदृश्यत
४१ अश्ववृंदेषुनागेषुरथानीकेषुवाविभुः पदातीनांचसंघेषुविनिघ्नन्प्रत्यदृश्यत ४२ श्येनवद्व्यचरत्संख्येउद्धिभीमोमहाबलः छिंदंस्तेषां
शरीराणिशिरांसिचमहाजवः ४३ खड्गेनशितधारेणसंयुगेगजयोधिनां पदातिरेकःसंक्रुद्धःशत्रूणांभयवर्द्धनः ४४ मोहयामाससमरेतान्का
लांतकयमोपमः मूढास्तएवचारोविनदंतःसमाद्रवन् ४५ सासिमुत्तमवेगेनविचरंतंमहारणे निकृत्यरथिनामाजौरथेषांचयुगानिच ४६
जघानरथिनश्चापिबलवानरिमर्दनः भीमसेनश्चरन्मार्गान्सुबहून्प्रत्यदृश्यत ४७ भ्रांतमुद्भ्रांतमाविद्धमा[illegible]प्लुतं
प्रसृतंसृतं संपातंसमुदीर्णंचदर्शयामाससभारत ४८ केचिदग्रासिनांछिन्नाःपांडवेनमहात्मना विनेदुर्भिन्नमर्माणोनिपेतुश्चगतासव
ः ४९ छिन्नदंताग्रहस्ताश्चछिन्नकुंभास्तथापरे वियोधाःस्वान्यनीकानिजघ्नुर्भीतावारणाः निपेतुरुर्व्यांचतदाविनदंतोमहास्वनान्
छित्वांश्चतोमरान्राजन्महामात्रशिरा

सिच ५१ परिस्तोमानि चित्राणि कक्ष्याश्च कनकोज्वलाः ग्रैवेयाण्यथ पत्नीश्च पताकाः कणपांस्तथा ५२ तोमरांश्च पयंत्राणि विचित्राणि ध्व
जांश्च अप्यरिंशानि रुद्धाणि तोत्रांश्चैवांकुशैः सह ५३ घंटाश्च विविधाकारा हेमगर्भान्सरूनपि पततः पतितांश्चैव पश्यामि सहसादिभिः ५४
छिन्नगात्रावरकैर्निहतैश्चापि वारणैः आसीत्तस्मिन् रणे भूमिः पर्वतैः पतितैरिव ५५ विमर्द्यैनं महानागान्ममर्द स भरतर्षभ अश्वांश्च रथांश्चैव प
तयामास भारत ५६ तं पुरुषमवर्ती नवतें धाचमारिष खलीनानि विविचित्राणि कक्ष्याश्चैव कोज्वलाः ५७ परिस्तोमानि यंत्राश्च आषपश्च महाधनाः
कवचान्यथ चर्माणि चित्रपातितानि च ५८ तत्र तत्रापविद्धानि अपश्यं तन महाहवे प्रोथयंत्रैश्च रथैश्चैव विमलैस्तथा ५९ स चक्रे वसुधां
कीर्णां शबलां कुसुमैरिव आप्लुत्य रथिनः कांश्चिन्मराम्य महाबलः ६० पातयामास खड्गेन सध्वजानपि पांडवः मुहुरुत्पततो दिक्षु धावतश्च
गनिर्द्दे नरस्विनः ६१ समाचरत चित्राण्यथ पंथरणे जनाः निजघान पदा कांश्चिदाक्षिप्यान्यानपोथयत ६२ खड्गेनान्यांश्च चिच्छेद नादैरन्यान भी
षयत ऊरुवेगेन चाप्यन्यान्पातयामास भूतले अपरे चैनमालोक्य भयाद्विद्राविता भवन् एवं सा बहुला सेना कलिंगानां तरस्विनां ६४ परिवार्य
रणे भीष्मं भीमसेनमुपाद्रवत ततः कलिंगसेनानां प्रमुखे भरतर्षभ ६५ श्रुतायुषमभिप्रेक्ष्य भीमसेनः समभ्ययात तमापतंतमभिप्रेक्ष्य कालिंगो
नवभिः शरैः ६६ भीमसेनममेयात्मा प्रत्यविध्यत्स्तनान्तरे कालिंगबाणाभिहतस्तोत्रार्दित इव द्विपः ६७ भीमसेनः प्रजज्वाल क्रोधेनाग्निरिवेंधनैः
अथाशोकः समादाय रथं हेमपरिष्कृतं ६८ भीमं संपादयामास रथिनं रथिनां वरः तमास्थाय रथं तूर्णं कौंतेयः शत्रुसूदनः ६९ कालिंगमभिदुद्राव
तिष्ठ तिष्ठेति चाब्रवीत ततः श्रुतायुर्बलवान्भीमस्य निशितान् शरान् ७० प्रेषयामास संक्रुद्धो दर्शयन्हस्तलाघवं स कार्मुकवरोत्सृष्टैर्नवभि
र्निशितैः

शरैः ७१ समाहतो भृशं राजन्कलिंगेन महाबलः संक्रुद्धोऽथ भृशं भीमो दंडाहत इवोरगः ७२ क्रुद्धश्च चापमायम्य बलवद्बलिनां वरः कलिंगमवधीत्सा
र्थी भीमः सप्तभिरायसैः ७३ क्षुराभ्यां चक्ररक्षौ च कलिंगस्य महाबलौ सत्यदेवं च सत्यं च प्राहिणोद्यमसादनं ७४ ततः पुनरमेयात्मा नाराचैर्नि
शितैस्त्रिभिः केतुमंतं रणे भीमोऽगमयद्यमसादनं ७५ ततः कलिंगाः संक्रुद्धा भीमसेनममर्षणं अनेकैर्बहुसाहस्रैः क्षत्रियाः समवारयन् ७६
ततः शक्तिगदाखड्गतोमरर्ष्टिपरश्वधैः कलिंगाः शतशो राजन्भीमसेनमवारयन् ७७ संनिवार्य ततो राजंश्छरवृष्टिं समुत्थितां गदामादाय तर
सा परिप्लुत्य महाबलः ७८ भीमः सप्त शतान्वीराननयद्यमसादनं पुनश्चैव द्विसाहस्रान्कलिंगानरिमर्दनः प्राहिणोन्मृत्युलोकाय तदद्भुतमिवा
भवत् एवं स तान्यनीकानि कलिंगानां पुनः पुनः ८० बिभेद समरे भीमो वीरो भीमपराक्रमः हतारोहाश्च मातंगाः पांडवेन कृतारणा ८१ विप्रज
ग्मुरनीकेषु घना वातहता इव मृद्नंतः स्वान्यनीकानि विनदंतः शरातुराः ८२ ततो भीमो महाबाहुः खड्गासक्तो महाभुजः संप्रहृष्टो महाघोरं
शंखं प्रध्मापयन्बली ८३ सर्वकालिंगसैन्यानां मनांसि समकंपयत् मोहश्चापि कलिंगानामाविवेश परंतप ८४ प्राकंपंत च सैन्यानि वा
हनानि च सर्वशः भीमेन समरे राजन्गजेंद्रेणेव सर्वतः ८५ मार्गान्बहून्विचरता धावता च ततस्ततः मुहुरुत्पतता चैव संमोहः समजाय
त ८६ भीमसेनभयत्रस्तं सैन्यं तत्समकंपत क्षोभ्यमाणमसंबाधं ग्राहेणेव महासरः ८७ त्रासितेषु च वीरेषु भीमेनाद्भुतकर्मणा पुनरावर्तमा
नेषु विद्रवत्सु समंततः ८८ सर्वकालिंगयोधेषु पांडूनां ध्वजिनीपतिः अब्रवीत्स्वान्यनीकानि युध्यध्वमिति भारत ८९ सेनापतेर्वचः श्रुत्वा
शिखंडिप्रमुखा गणाः भीममेवाभ्यवर्तंत रथानीकैः प्रहारिभिः ९० धर्मराजश्च तान्सर्वानुपजग्राह पांडवः महता मेघवर्णेन नागानीकेन

स३

एद्युतः एवंमुक्तोथसर्वाणिस्वान्यनीकानिपार्षतः भीमसेनस्यजग्राहपार्ष्णिंमनुजर्षभः ९२ नहिपांचालराजस्यलोकेकश्चनविद्यतेभीमसे
नकपीरयः प्राणेभ्यःप्रियतरःतमः ९३ सोपश्यत्कलिंगेषुचरंतमरिसूदनं भीमसेनंमहाबाहुंपार्षतःपरवीरहा ९४ ननंदवहुधाराजन्हृ
ष्टश्चासीत्परंतपः शंखंदध्मौसमरेसिंहनादंननादच ९५ सचपारावताश्वस्यरथेहेमपरिष्कृते कोविदारध्वजंदृष्ट्वाभीमसेनःसमाश्वसत्
९६ धृष्टद्युम्नस्तुतंदृष्ट्वाकालिंगैःसमभिद्रुतं भीमसेनममेयात्मात्राणायाजौसमभ्ययात् ९७ तौदूरात्सात्यकिर्दृष्ट्वाधृष्टद्युम्नवृकोदरौ
कलिंगान्समरेवीरौयोधयंतौमनस्विनौ ९८ सतत्रगत्वाशैनेयोजवेनजयतांवरः पार्थपार्षतयोःपार्ष्णिंजग्राहपुरुषर्षभः ९९ सकृत्वा
कदनंतत्रप्रगृहीतशरासनः आस्थितोरौद्रमात्मानंजघानसमरेपरान् कलिंगप्रभवांचैवमांसशोणितकर्दमांरुधिरस्यंदिनींतत्र
भीमःप्रावर्तयन्नदीं १ अथांतरंकलिंगानांपांडवानांचवाहिनीं संततारसुदुस्तारांभीमसेनोमहाबलः भीमसेनंतदादृष्ट्वाप्राक्रोशंस्ता
वकानृप कालोयंभीमरूपेणकालिंगैःसहयुध्यते ३ ततःशांतनवोभीष्मःश्रुत्वातंनिनदंरणे अभ्ययात्त्वरितोभीमंव्यूढानीकःसमं
ततः ४ तंसात्यकिर्भीमसेनोधृष्टद्युम्नश्चपार्षतः अभ्यद्रवंतभीष्मस्यरथंहेमपरिष्कृतं ५ परिवार्यतुतेसर्वेगांगेयंतरसारणे त्रि
भिस्त्रिभिःशरैर्घोरैर्भीष्ममानर्छुरंजसा ६ प्रत्यविध्यत्ततान्सर्वान्पितादेवव्रतस्तव यतमानान्महेष्वासांस्त्रिभिस्त्रिभिरजिह्मगैः
ततःशरसहस्रेणसंनिवार्यमहारथान् हयान्कांचनसंनाहान्भीमस्याभ्यहनच्छरैः ८ हताश्वेतुरथेतिष्ठन्भीमसेनःप्रतापवान् श
क्तिंचिक्षेपतरसागांगेयस्यरथंप्रति ९ अप्राप्तामथतांशक्तिंपितादेवव्रतस्तव त्रिधाचिच्छेदसमरेपृथिव्यांसाव्यशीर्यत ततः

त्रि३

धृ ५१

येस्यापसव्यं पृथ्वीं प्रगृह्य महतीं गदां भीमसेनो रथात्तूर्णं पुप्लुवे मनुजर्षभः धृष्टद्युम्नस्तमारोप्य स्वरथे रथिनां वरः पश्यतां सर्वसैन्यानामपोवाह यशस्विनं
१० सात्यकोपि ततस्तूर्णं भीमस्य प्रियकाम्यया सारथिं कुरुवृद्धस्य पातयामास सायकैः ११ भीष्मस्तु निहते तस्मिन्सारथौ रथिनां वरः वातायमानैरश्वै
स्तैरपनीतो रणाजिरात् १२ भीमसेनस्ततो राजन्नपनीते महारथे प्रजज्वाल यथा वह्निर्दहन्कक्षमिवोल्बणः १३ स हत्वा सर्वकालिंगान्सेनामध्ये व्य
वस्थितः नैनमभ्युत्सहन्केचित्तावका भरतर्षभ धृष्टद्युम्नस्तमारोप्य स्वरथे रथिनां वरः पश्यतां सर्वसैन्यानामपोवाह यशस्विने १४ संपूज्यमानः पा
चालैर्मत्स्यैश्च भरतर्षभ धृष्टद्युम्नं परिष्वज्य समीपात्प्रययौ सात्यकिः १५ अथाब्रवीद्भीमसेनं सात्यकिः सत्यविक्रमः प्रहर्षयन्यदुव्याघ्रो धृष्टद्युम्नस्य पश्यतः
१६ दिष्ट्या कलिंगराजश्च राजपुत्रश्च केतुमान् शक्रदेवश्च कालिंगः कालिंगाश्च मृधे हताः १७ स्ववाहुबलवीर्येण नागाश्वरथसंकुलः महा
व्यूहः कलिंगानामेकेन मृदितस्त्वया १८ एवमुक्त्वा शिनेर्नप्ता दीर्घबाहुररिंदमः रथाद्रथमभिद्रुत्य पर्यष्वजत पांडवं ततः स्वरथमागम्य पुनरेव म
हारथः १९ तावकानवधीत्क्रुद्धो भीमस्य बलमादधत् १९ इति भीष्मपर्वणि अध्यायः ५१ संजय उवाच गतपूर्वाह्णभूयिष्ठे तस्मिन्नहनि भा
रत रथनागाश्वपत्तीनां सादिनां च महाक्षये १ द्रोणपुत्रेण शल्येन कृपेण च महात्मना समसज्जत पांचाल्यस्त्रिभिरेतैर्महारथैः २ स लोकवि
दितानश्वान्निजघान महाबलः द्रौणेः पांचालदायादः शितैर्दशभिराशुगैः ततः शल्यरथं तूर्णमास्थाय हतवाहनः द्रौणिः पांचालदायादमभ्यवर्त
त इषुभिः ३ धृष्टद्युम्नं तु संयुक्तं द्रौणिना दृष्ट्वा भारत सौभद्रोभ्यपतत्तूर्णं विकिरन्निशितान्शरान् ४ स शल्यं पंचविंशत्या कृपं च नवभिः शरैः अश्व
त्थामानमष्टाभिर्विव्याध भरतर्षभ ५ आर्जुनिं तु ततस्तूर्णं द्रौणिर्विव्याध पत्रिणा शल्यो द्वादशभिश्चैव कृपश्च निशितैस्त्रिभिः ६ लक्ष्मणस्तव पौत्र

गामा॰
२२२

वर्त्तत संक्रुद्धस्तथा पाण्डुसुतं वर्त्तत ८ दौर्योधनस्तु संक्रुद्धः सौभद्रं निशितैः शरैः विव्याध समरे राजंस्तदद्भुतमिवाभवत् ९ अभिमन्युश्च संक्रुद्धोप्या-
नं भरतर्षभ शरैः पंचशतैः क्षिप्रं क्षिप्रहस्तोभ्यविध्यत ९ लक्ष्मणोपि ततस्तस्य धनुश्छित्त्वेषुदर्पितः मुष्टिदेशे महाराज तत उच्चुक्रुशुर्जनाः
१० तद्विहाय धनुश्छिन्नं सौभद्रः परवीरहा अन्यदादत्तवांश्चित्रं कार्मुकं वेगवत्तरं ११ तौ तत्र समरे युक्तौ कृतप्रतिकृतैषिणौ अन्योन्यं निशि-
तैस्तीक्ष्णैर्जघ्नतुः पुरुषर्षभौ १२ ततो दुर्योधनो राजा दृष्ट्वा पुत्रं महाबलं पीडितं तव पुत्रेण प्रायात्तत्र जनेश्वरः १३ संनिवृत्ते तवस्तेत सर्वे एव ज-
नाधिपाः अर्जुनं रथवंशेन समेता समवारयन् १४ स तैः परिवृतः शूरैः शूरो युधिष्ठिरदुर्जयः न स्म प्रव्यथते राजन् कृष्णतुल्यपराक्रमः १५
सौभद्रमथ संप्रेक्ष्य दृष्ट्वा तत्र धनंजयः अभिदुद्राव संक्रुद्धस्त्रातुकामः स्वमात्मजं १६ ततः सरथनागाश्वा भीष्मद्रोणपुरोगमाः अभ्यवर्त्त
न्त राजानः सहसा सव्यसाचिनं १७ उद्धूतं सहसा भौमं नराश्वरथसादिभिः दिवाकरपथं प्राप्य रजस्तीव्रमदृश्यत। तानि नागसहस्राणि भूमि
पालशतानि च तस्य बाणपथं प्राप्य नाभ्यवर्त्तन्त सर्वशः १८ प्रणेदुः सर्वभूतानि बभूवुस्तिमिरा दिशः कुरूणामनयस्तीव्रः समदृश्यत
नरावराः १९ नाप्यन्तरिक्षं न दिशो न भूमिर्न च भास्करः प्राज्ञायत नरश्रेष्ठ शरसंघैः किरीटिनः २० सादितध्वजनागास्तु हताश्वा रथिनो भृशं
विप्रद्रुता रथाः केचिद्दृश्यन्ते रथयूथपाः २१ विरथा रथिनस्त्वन्ये धावमानास्ततस्ततः तत्र तत्रैव दृश्यन्ते सायुधाः साङ्गदैर्भुजैः २२ हयारो
हा हयांस्त्यक्त्वा गजारोहाश्च दन्तिनः अर्जुनस्य भयाद्राजन् समन्ताद्विप्रदुद्रुवुः २३ रथेभ्यश्च गजेभ्यश्च हयेभ्यश्च नराधिपाः पतिताः पा
त्यमानाश्च दृश्यन्तेर्जुनसायकैः २४ सगदानुद्यतान्बाहून्सखड्गांश्च विशांपते सप्रासांश्च तूणीरान्सशरासनान् २५ साङ्कुशा
न्सपताकांश्च तत्रार्जुनो नराणां विचकर्त्त शरैरुग्रै रौद्रं बिभ्रद्वपुस्तदा २६ परिघाणां विशीर्णानां मुद्गराणां च मारिष

[illegible] प्रासानां भिण्डिपालानां निस्त्रिंशानां च संयुगे २७ पाश्वधानां तीक्ष्णानां तोमराणां च भारत प्रसीहानां कषाणां च पाश्वा-
णां चापि मारिष २८ राशयस्समदृश्यन्ते विकीर्णा धरणीतले नासीत्तत्र पुमान्कश्चित्तव सैन्यस्य मारिष २९ योऽर्जुनं समरे शूरं प्रत्युद्यायात्कथंचन
यो यो हि समरे पार्थं प्रत्युद्याति विशांपते स स वै विशिखैस्तीक्ष्णैः परलोकाय नीयते ३० तेषु विद्रवमाणेषु तव योधेषु सर्वशः ३१ अर्जुनो वासु-
देवश्च शंखौ दध्मतुरुत्तमौ तत्प्रभग्नं बलं दृष्ट्वा पिता देवव्रतस्तव ३२ अब्रवीत्समरे शूरं भारद्वाजं स्मयन्निव एष पाण्डुसुतो वीरः कृष्णेन सहितो
बली ३३ तथा करोति सैन्यानि यथा कुर्याद्धनंजयः न ह्येष समरे शक्यो जेतुमद्य कथंचन ३४ यथास्य दृश्यते रूपं कालान्तकयमोपमं न निव-
र्तयितुं चापि शक्येयं महती चमूः ३५ अन्योन्यप्रेक्षया पश्य द्रवतीयं वरूथिनी एष चास्तं गिरिश्रेष्ठं भानुमान्प्रतिपद्यते ३८ चक्षूंषि स-
र्वलोकस्य संहरन्निव सर्वथा तत्रावहारं संप्राप्तं मन्येऽहं पुरुषर्षभ ३९ श्रान्ता भीताश्च ये योधा न योत्स्यन्ति कदाचन एवमुक्त्वा ततो भी-
ष्मो द्रोणमाचार्यसत्तमं ४० अवहारमथो चक्रे तावकानां महारथः ततोऽवहारः सैन्यानां तव तेषां च मारिष ४१ अस्तं गच्छति सूर्ये-
ऽभूत्संध्याकाले च वर्तति ४१ इति श्रीभीष्मपर्वणि द्वितीयदिवसयुद्धे अध्यायः ५१ संजय उवाच समागतायां तु शर्वर्यां भीष्मः शान्तनवस्ततः
अनीकान्यनुसंयाने व्यादिदेश परंतपः १ गाङ्गेयं च महाव्यूहं चक्रे शान्तनवस्तदा पुत्राणां ते जयाकांक्षी वृद्धः कुरुपितामहः २ गरु-
डस्य स्वयं तुण्डे पिता देवव्रतस्तव चक्षुषी च भरद्वाजः कृतवर्मा च सात्वतः ३ अश्वत्थामा कृपश्चैव शिरस्यास्तां यशस्विनौ त्रिग-
र्तैर्मत्स्यकैकेयैर्वाटधानैश्च संयुतैः ४ भूरिश्रवाः शलः शल्यो भगदत्तश्च मारिष मद्रकाः सिन्धुसौवीरास्तथा पञ्चनदाश्च
ये ५ जयद्रथेन सहिता ग्रीवायां संनिवेशिताः पृष्ठे दुर्योधनो राजा सोदर्यैः सानुगैर्वृतः श्रीगणेशाय नमः ॥

६ विरानुविरावावंसौ कांबोजाश्च शकैः सह पुंड्रमालवमहाराजस्तस्येशोनाश्च मारिष ७ मागधाश्च कलिंगाश्च दासेरकगणैः सह दक्षिणं
पक्षमासाद्य स्थितास्ते व्यूहस्य दंशिताः ८ कारूषाश्च विकुंजाश्च मुंडाः कौंडीवृषास्तथा बृहद्बलेन सहिता वामपार्श्वमुपाश्रिताः ९ दृष्ट्वा तु दृष्ट्
वा तु तत्सैन्यमस्यसाची परंतपः धृष्टद्युम्नेन सहितः प्रत्यव्यूहत संयुगे १० तावकानां तु तं व्यूहं सम व्यूहंत पांडवाः अर्धचंद्रेण व्यूहेन व्यूहेन तेनाति
दारुणा ११ दक्षिणं शृंगमास्थाय भीमसेनो व्यरोचत नानाशस्त्रौघसंपन्नै देशैर्नैर्नृपैर्वृतः १२ तदन्वेव विराटश्च द्रुपदश्च महारथः तदनंतरमे
व चानीलो नीलायुधैः सह १३ नीलादनंतरश्चैव धृष्टकेतुर्महारथः चेदिकाशिककरूषैश्च पौरवैश्चाभिसंवृतः १४ धृष्टद्युम्नः शिखंडी च पांचाला
श्च प्रभद्रकाः मध्ये सैन्येन महता स्थिता युद्धाय भारत १५ तत्रैव धर्मराजोपि गजानीकेन संवृतः ततस्तु सात्यकी राजन् द्रौपद्याः पंच चात्मजाः
१६ अभिमन्युस्ततस्तूर्णमिरावांश्च ततः परं भैमसेनिस्ततो राजन् केकयाश्च महारथाः १७ ततोर्धं द्विपदां श्रेष्ठो वामपार्श्वमुपाश्रितः सर्व
स्य जगतो गोप्ता यस्य गोप्ता जनार्दनः १८ एवमेतं महाव्यूहं प्रत्यव्यूहंत पांडवाः वधार्थं तव पुत्राणां तत्पक्षे च ये स्थिताः १९ ततः प्र
वृते युद्धं व्यतिषिक्तरथद्विपं तावकानां परेषां च निघ्नतामितरेतरं २० हयौघाश्च रथौघाश्च तत्र तत्र विशांपते संपतंतः स्म दृश्यं
ते निघ्नंतस्ते परस्परं २१ धावतां च रथौघानां पृथक् ततां च पृथक् पृथक् बभूव तुमुलः शब्दो विमिश्रो दुंदुभिस्वनैः २२ दिवस्पृङ् नरवी
राणां निघ्नतामितरेतरं संप्रहारे सुतुमुले तव तेषां च भारत २३ इति श्रीभीष्मपर्वणि एकपंचाशोध्याय ५१ संजय उवाच ततो रथेषु
नीकेषु [illegible] तावकैः धनंजयो रथानीकमवधीत्तव भारत १ शरैरतिरथो युद्धे पातयन् रथयूथपान् ते वध्यमानाः पार्थे
न कालेनेव युगक्षये २ धार्तराष्ट्रा रणे यत्ना पांडवान् प्रत्ययोधयन् प्रार्थयाना यशो दीप्तं मृत्युं कृत्वा निवर्तनं ३ एकाग्रमनसो भू

छ्रितसेकुवर

ध्वानांबरस्पिनी बभंजुर्वहुशो गाजेति चापजं तत्र संयुगे ४ द्वन्द्विरथ्य मनैश्व स्वपाविनिर्द्विखच पौरवैः कौरवैयैश्च नप्राज्ञायत किंचन ५ उदतिष्ठद्रजो
भौमं घोरं पांशुरवाकरं न दिशः प्रदिशः स्थापितत्रैजुः कथंचन अनुमानेन संज्ञाभिर्नामगोत्रैश्च संयुगे ६ वर्त्ततेस्म तदा युद्धं तत्र तत्र विशांपते
नव्यूहोभिद्यते तत्र कौरवाणां विशांपते रक्षितं सत्यसंधेन भारद्वाजेन मारिष तत्थैव यथा उवेपानां रक्षितः सव्यसाचिना नाभिद्यत महाव्यूहे भी
मेन च सुरक्षितः सेनाग्रादस्य निष्पत्य प्रायुध्यंस्तत्र मानवाः उभयोः सेनयो राजन्व्यतिषिक्ता रथ्यक्षिपाः १० हयारोहैः पारोहाः पासतेस्म महाहवे ऋष्टि
भिर्विमलाग्राभिः प्रासैरपि च संयुगे ११ रथी रथिन मासाद्य वीरौ कनकभूषणौ पातयामास समरे तस्मिन्नति भयंकरे १२ गजारोहा गजारोहा
न्नाराचशरतोमरैः संयुक्ताः पातयामासु तेषां च संयशः १३ पत्तिसंघा रणे पत्तीन्भिंडिपालपरश्वधैः न्यपातयंत संहृष्टाः परस्पर कृता
गमः १४ रथी नेम समरे राजन्नासाद्य गजयोधिनं सगजं पातयामास गजी च रथिनं तदा १५ रथिनं च हयारोहाः प्रासेन भरतर्षभ पातयामा
स समरे रथी च हयसादिनं १६ न्यपातयच्छितैः शस्त्रैः सेनयोरुभयोरपि गजारोहा हयारोहान्पातयामासुराहवे १७ हयारोहा गजस्थांश्च तद
भुतमिवाभवत् गजारोहैश्च श्रापितवत तत्र पदातयः पतिताः समदृश्यंत तै स्थापि गजयोधिनः पत्तिसंघा हयारोहैः सादिसंघाश्च पत्तिभिः १९
पसमाना व्यदृश्यंत शतशोथ सहस्रशः ध्वजैस्तत्राप विद्धैश्च कार्मुकैस्तोमरैस्तथा
२० प्रासैस्तथा गदाभिश्च परिघैः कंपनैस्तथा शक्तिभिः कवचैश्चित्रैः कणपैरंकुशैरपि २१ निस्त्रिंशैर्विपुलैश्चैव स्वर्णपुंखैः शरैस्तथा
परिस्तोमैः कुथाभिश्च कंवलैश्च महाधनैः २२ भूर्भाति भारत स्रग्दामैश्च विचित्रिता नराश्वकायैः पतितैर्दंतिभिश्च महाहवे २३ अगम्य
रूपा पृथिवी मांसशोणितकर्दमा प्रशशाम रजो भौमं व्युक्षितं

नरशोणितैः २४ दिशश्च विमलाः सर्वाः समपद्यंत भारत उत्थितान्यगणेयानि कबंधानि समंततः २५ चिह्नभूतानि जगतो विनाशार्थाय भारत तस्मि
न्युद्धे महारौद्रे वर्तमाने सुदारुणे २६ प्रत्यदृश्यंत रथिनो धावमानाः समंततः ततो भीष्मश्च द्रोणश्च सैंधवश्च जयद्रथः २७ पुरुमित्रो विकर्ण
श्च शकुनिश्चापि सौबलः एते समरदुर्धर्षाः सिंहतुल्यपराक्रमाः २८ पांडवानामनीकानि बभंजुः समरे स्थिताः तथैव भीमसेनोपि राक्षसश्च
घटोत्कचः २९ सात्यकिश्चेकितानश्च द्रौपदेयाश्च भारत तावकांस्तव पुत्रांश्च सहितान्सर्वराजभिः ३० द्रावयामासुराजिस्थांस्त्रिदशा
दानवानिव तथा ते समरे न्योन्यं निघ्नंतः क्षत्रियर्षभाः ३१ रक्तोक्षिता घोररूपा विरेजुर्दानवा इव विजित्य च रिपून्वीराः सैन्ययोरुभयोरपि
३२ व्यदृश्यंत महामात्रा यथा ग्रहा नभस्तले ततो रथसहस्रेण पुत्रो दुर्योधनस्तव ३३ अभ्ययात्पांडवान्युद्धे राक्षसं च घटोत्कचं तथैव पां
डवाः सर्वे महत्या सेनया सह ३४ भीष्मद्रोणौ रणे यत्तौ प्रत्युद्ययुररिंदमौ किरीटी तु ययौ क्रुद्धः समंतात्पार्थिवोत्तमान् ३५ आर्जुनिः सात्यकि
श्चैव प्ययातां सौबलं बलं ततः प्रववृते भूयः संग्रामो लोमहर्षणः ३८ तावकानां परेषां च जिगीषूणां परस्परं ३६ इति भीष्मपर्वणि अध्याय ५१

७३ संजय उवाच ततस्ते पार्थिवाः क्रुद्धाः फाल्गुनं वीक्ष्य संयुगे रथैरनेकैः साहस्रैः समंतात्पर्यवारयन् १ अथैनं रथवंशेन कोष्ठकीकृत्य भारत शरैः
सुबहुसाहस्रैः समंतात्पर्यवारयन् २ शक्तीश्च विमलास्तीक्ष्णा गदाश्च परिघैः सह प्रासान्परश्वधांश्चैव मुद्गरान्मुसलानपि ३ चिक्षिपुः समरे क्रु
द्धाः फाल्गुनस्य रथं प्रति शस्त्राणामथ तां वृष्टिं शलभानामिवायतीं ४ रुरोध सर्वतः पार्थः शरैः कनकभूषणैः तत्र तल्लाघवं दृष्ट्वा बीभत्सोरति
मानुषं ५ देवदानवगंधर्वाः पिशाचोरगराक्षसाः साधु साध्विति राजेंद्र फाल्गुनं प्रत्यपूजयन् ६ सात्यकिश्चाभिमन्युश्च महत्या सेनया सह गां

धारानसमरेशूरान्ररुधुःसहसौबलान् ७ ततःसौबलकाःशूरावार्ष्णेयस्यरथोत्तमं तिलशश्चिच्छिदुःक्रोधाच्छरैर्नतविधैरपि ८ सात्यकिस्तुरथंत्य
क्त्वावर्त्तमानेमहाहवे अभिमन्योरथंतूर्णमारुरोहपरंतपः ९ तावेकरथसंयुक्तौसौबलेयस्यवाहिनीं नघ्नतुर्निशितैस्तूर्णंशरैःसन्नतपर्वभिः १०
द्रोणभीष्मौरणेयत्तौधर्मराजस्यवाहिनीं नाशयेतांशरैस्तीक्ष्णैःकङ्कपत्रपरिच्छदैः ११ ततोधर्मसुतोराजामाद्रीपुत्रौचपाण्डवौ मिषतांसर्वसैन्यानांद्रोणानी
कमुपाद्रवन् १२ तत्रासीत्सुमहद्युद्धंतुमुलंलोमहर्षणं यथादेवासुरंयुद्धंपूर्वमासीत्सुदारुणं १३ कुर्वाणौतुमहत्कर्मभीमसेनघटोत्कचौ दुर्यो
धनस्ततोऽभ्येत्यतावुभावप्यवारयत् १४ तत्राद्भुतमपश्यामहैडिम्बस्यपराक्रमं अतीत्यपितरंयुद्धेयदयुध्यतभारत १५ भीमसेनस्तुसंक्रुद्धोदु
र्योधनममर्षणं हृदिविव्याधपृषत्केनप्रहसन्निवपाण्डवः ततोदुर्योधनोराजाप्रहारवरपीडितः निषसादरथोपस्थेकश्मलंचजगामह १७ तंविसं
ज्ञमथोदृष्ट्वात्वरमाणोऽस्यसारथिः अपोवाहरणाद्राजंस्ततःसैन्यमभज्यत १८ ततस्तांकौरवींसेनांद्रवमाणांततस्ततः निघ्नन्भीमःशरैस्तीक्ष्णैःपृष्ठतोऽन्व
व्राजद्दृष्टतः १९ पार्षतस्तुरथश्रेष्ठोधर्मपुत्रश्चपाण्डवः द्रोणस्यपश्यतःसैन्यंगाङ्गेयस्यचभारत २० जघ्नतुर्विशिखैस्तीक्ष्णैःपरानीकविनाशनैः
द्रवमाणंततःसैन्यंतवपुत्रस्यसंयुगे २१ नाशक्नुतांवारयितुंभीष्मद्रोणौमहारथौ वार्यमाणंचभीष्मेणद्रोणेनचमहात्मना २२ विद्रवत्येवतत्
सैन्यंपश्यतोर्द्रोणभीष्मयोः ततोरथसहस्रेषुविद्रवत्सुततस्ततः २३ तावास्थितावेकरथंसौभद्रशिनिपुङ्गवौ सौबलिंसमरेसेनांनाशयेतांपरंतप
२४ शुशुभातेततस्तौतुशैनेयकुरुपुङ्गवौ अमावास्यांगतौयद्वत्सोमसूर्यौनभस्तले २५ अर्जुनस्तुततःक्रुद्धस्तवसैन्यंविशांपते ववर्षशरवर्षे
णधाराभिरिवतोयदः २६ वध्यमानंततस्तत्तुशरैःपार्थस्यसंयुगे दुद्रावकौरवंसैन्यंविषादभयकंपितं २७ द्रवतस्तान्समालोक्यभीष्मद्रोणौ।

पि४

स्तु

महाबलौ न्यवारयेतां संक्रुद्धौ दुर्योधनहितैषिणौ ततो दुर्योधनो राजा समभ्यास्य विशांपते स्वैरनीकैस्तस्मैन्यं रूचमाणां समीपतः २९ यत्र यत्र स्तु तेन
म्ययोधः पश्यति भारत तत्र तत्र स्म वर्त्तन्ते क्षत्रियाणां महारथाः ३० नाभिवृत्तान्समीक्ष्यैव ततो भीष्मपीतो रजनाः अन्योन्यस्पर्द्धया राजंल्लुब्ध्वे यानेव निश्चि
ते ३१ पुनरेव न्यवर्त्तन्त तेषां वेगमसौ विशांपते पपौ सागरस्येव चंद्रमा रपनं प्रति ३२ सन्निवृत्तांस्ततस्तां दृष्ट्वा राजा सुयोधनः अब्रवीत्त्वरितो ग
त्वा भीष्मं शांतनवं वचः ३३ पितामह निबोधेदं यत्त्वां वक्ष्यामि भारत नानुरूपमहं मन्ये त्वयि जीवति कौरव ३४ द्रोणे चास्त्रविदां श्रेष्ठे सपुत्रे सुहृज्जने
कृपे चैव महेष्वासे स्थितेषु हस्तिनी न पांडवाप्रतिबलास्तव मन्ये कथंचन ३५ तथा द्रोणस्य संग्रामे द्रोणस्यापि कृपस्य च अनुमंतव्याः पा
ण्डुसुतान्नूनं तव पितामह ३६ यथेमान्क्षमसे वीर वध्यमानां वरूथिनीं सोऽस्मि वाच्यस्त्वया राजन्पूर्वमेव समागमे ३७ न योत्स्ये पाण्डवान्संख्ये
नापि मा सात्यकिपार्षतौ श्रुत्वा हि वचनं तुभ्यमाचार्यस्य च भारत ३८ कर्णेन सहितः कृत्यं चिंतयानस्तदैव हि यदि नाहं परित्याज्यो युवाभ्यामिह
संयुगे ३९ विक्रमे[illegible]णानुरूपेण युध्यतां पुरुषर्षभौ एतच्छ्रुत्वा वचो भीष्मः प्रहसन्वै मुहुर्मुहुः ४० अब्रवीत्तनयं तुभ्यं क्रोधादुद्वृत्य चक्षु
षी बहुशोऽसि महाराज न पथ्यमुक्तो हितं वचः ४१ अजेयाः पाण्डवा युद्धे देवैरपि सवासवैः यत्तु शक्यं मया कर्तुं वृद्धेनाद्य नृपोत्तम ४२ करिष्या
मि यथाशक्ति प्रेक्षेदानीं सबांधवः अद्य पांडुसुतान्सर्वान्ससैन्यान्सह बंधुभिः ४३ मिषतो वारयिष्यामि सर्वलोकस्य पश्यतः एवमुक्त
स्तु भीष्मेण पुत्रस्तव जनेश्वरः ४४ दध्मौ शंखान्मुदा युक्तो भेरीः प्रघ्नन् समंततः पाण्डवा अपि ते राजन् श्रुत्वा तं निनदं महत् ४५ दध्मुः शंखांश्च
भेरीश्च मुरजांश्चाप्यवादयन् ४६ इति श्रीभीष्मपर्वणि अध्यायः १०३ धृतराष्ट्र उवाच प्रतिज्ञाते तु तस्मिन्युद्धे भीष्मेण दारुणे ॥

सु४

स५ त१

ममपुत्रस्यवासैन्यंक्रोधितेनविशांपते १ भीष्मःकिमकरोत्तत्रपांडवेषुसंजय पितामहेवापांचालास्तन्ममाचक्ष्वसंजय २ संजयउवाच गतपू
र्वाह्णेभूयिष्ठेतस्मिन्नहनिभारत पश्चिमांदिशमास्थायप्रविष्टेचदिवाकरे ३ जयंप्राप्तेषुहृष्टेषुपांडवेषुमहात्मसु सर्वधर्मविशेषज्ञःपितादेवव्रतस्तव
४ अभ्ययाज्जवनैरश्वैःपांडवानामनीकिनी महत्यासेनयागुप्तस्तवपुत्रैश्चसर्वशः प्रावर्ततततोयुद्धंतुमुलंलोमहर्षणं अस्माकंपांडवैःसार्द्धमनयात्ते
र्वभारत ६ धनुषांकूजतांतत्रतलानांचाभिहन्यतां महानासीत्तुमुलःशब्दोगिरीणामिवदीर्यतां ७ तिष्ठस्थितोस्मिविद्ध्येनंनिवर्तस्वस्थिरोभव स्थि
तोस्मिप्रहरस्वेतिशब्दाःश्रूयंतसर्वतः ८ कांचनेषुतनुत्रेषुकिरीटेषुध्वजेषुच शिलानामिवशैलेषुपततांनामभूत्स्वनः ९ पतितान्युत्तमांगानि
बाहवश्चविभूषिताः व्यचेष्टंतमहींप्राप्यशतशोथसहस्रशः १० हृतोत्तमांगाःकेचित्तुतथैवोद्यतकार्मुकाः प्रगृहीतायुधाश्चैवतस्थुःपुरुषर्ष
भाः ११ प्रावर्ततमहावेगानदीरुधिरवाहिनी मातंगांगशिलाघोरामांसशोणितकर्दमा १२ वराश्वनरनागानांशरीरप्रभवातदापरलोका
र्णवमुखीगृध्रगोमायुमोदिनी १३ नदृष्टंनश्रुतंचापियुद्धमेतादृशंनृप यथातवसुतानांचपांडवानांचभारत नासीद्रथपथस्तत्रयोधैर्युधि
निपातितैः गजैर्निपतितैर्नीलैर्गिरिशृंगैरिवावृतं १५ विकीर्णैःकवचैश्चित्रैःशिरस्त्राणैश्चमारिष शुशुभेतद्रणस्थानंशारदंवनभस्तलं १६ सैस
विनिर्भिन्नानराःकेचित्प्रकाशीउमकर्षिताः अदीनाःसमरेशत्रूनभ्यधावंतदर्पिताः १७ तातभ्रातःसखेबंधोवयस्यममताल मामापरित्य
जचुक्रुशुःपतितारणे अभ्यागच्छसमागच्छकिंभीतोसिक्वयास्यसि स्थितोहंसमरेमाभैरितिचान्येविचुक्रुशुः १८ तत्रभीष्मःशांतनवोनि
त्यंमंडलकार्मुकः मुमोचबाणान्दीप्ताग्रानहीनाशीविषोपमान् २० शरैरेकायनीकुर्वन्दिशःसर्वायतव्रतः जघानपां॥छ॥ श्री

स३ तं३

दूरस्थानादिशः प्रदिश्य भारत २१ न संधाने रथमार्गेषु दर्शयन् पाणिलाघवं अलातचक्रवद्राजंस्तत्र तत्र स्म दृश्यते २२ तमेकं समरे शूरं पांडवाः संजयैः
सहअनेकशतसाहस्रं समपश्यंत लाघवं २३ मायाकृतात्मानमिति भीष्मं तत्र स्म मेनिरे पूर्वस्यां दिशि तं दृष्ट्वा प्रतीच्यां ददृशुर्जनाः २४ उदीच्यां चैनमा
लोक्य दक्षिणस्यां तथैव च प्रतिदृश्यत्समरे गांगेयः प्रत्यदृश्यत २५ नचैव पांडवेयानां कश्चिच्छक्नोति वीक्षितुं विशिखानेव पश्यंति भीष्मचापच्युता
न्बहून् २६ कुर्वाणं समरे कर्म सूदयानं च वाहिनीं व्याक्रोशंत रणे तत्र वीरा बहुविधं बहु २७ अमानुषेण रूपेण चरंतं पितरं तव शलभा इव रा
जानः पतंति स्म समोहिताः २८ भीष्माग्निमभिसंक्रुद्धं विनाशाय सहस्रशः न हि मोघः शरः कश्चिदासीद्भीष्मस्य संयुगे २९ नरनागाश्वकायेषु बहु
त्वाह्लघुयोधिनः भिनत्त्येकेन बाणेन सुमुक्तेन पतत्रिणा ३० गजं कंकटसंछन्नं वज्रेणेव शिलोच्चयं द्वौ त्रीनपि गजारोहान् पिंडितान् वर्मितानपि ३१
नाराचेन सुतीक्ष्णेन निजघान पितामह यो यो भीष्मं नरव्याघ्रमभ्येति युधि कश्चन ३२ मुहूर्तदृष्टः स मया पातितो भुवि दृश्यते एवं सा धर्मराजस्य
वध्यमाना महाचमूः ३३ भीष्मेणातुलवीर्येण व्यशीर्यत सहस्रधा प्रकाल्यमाना महासेना शरवर्षाभिपीडिता ३४ पश्यतो वासुदेवस्य पार्थस्य च
महात्मनः यतमाना अपि ते वीरा द्रवमाणान् महारथान् ३५ नाशक्नुवन् वारयितुं भीष्मबाणप्रपीडितान् महेंद्रसमवीर्येण भज्यमाना महा
चमूः ३६ अभज्यत महाराज न च द्वौ सह धावतः आविद्धनरनागाश्वं पतितध्वजकूबरं ३७ अनीकं पांडुपुत्राणां हाहाभूतमचेतनं जघाना
त्र पिता पुत्रं पुत्रश्च पितरं तथा ३८ प्रियं सखायं चाक्रंदे सखा दैवबलात्कृतः विमुच्य कवचांस्त्वन्ये पांडुपुत्रस्य सैनिकाः ३९ प्रकीर्य केशान्
धावंतः प्रत्यदृश्यंत भारत तद्गोकुलमिवोद्भ्रांतमुद्भ्रांतरथयूथपं ददृशे पांडुपुत्राणां सैन्यमार्तस्वनं तदा प्रभज्यमानं सैन्यं च दृष्ट्वा

पत्र२ ता३

इवांतकः ४१ उवाचपार्थंवार्ष्णेयस्तस्मिन्संग्रामसंकुले अयंसकालःसंप्राप्तः पार्थयःकांक्षितस्तव ४२ प्रहर्तव्योस्यनरव्याघ्रनचेन्मोहाद्विमुह्य
से यत्पुराकथितंवीरत्वयाराज्ञांसमागमे भीष्मद्रोणमुखान्सर्वान्धार्त्तराष्ट्रस्यसैनिकान् सानुबंधान्हनिष्यामियेमांयोत्स्यंतिसं
युगे ४४ इतितत्कुरुकौंतेयसत्यंवाक्यमरिंदम बीभत्सोपश्यसैन्यंस्वंभज्यमानंसमंततः ४५ द्रवतश्चमहीपालान्पश्ययौधिष्ठिरेबले
दृष्ट्वाहिसमरेभीष्मंव्यात्ताननमिवांतकं ४६ भयार्त्ताःसंप्रणश्यंतिसिंहंक्षुद्रमृगाइव एवमुक्तःप्रत्युवाचवासुदेवंधनंजयः ४७ चोदयाश्वा
न्यतोभीष्मोविगाह्यैतद्बलार्णवं पातयिष्यामिदुर्धर्षंवृद्धंकुरुपितामहं ४८ ततोश्वान्रजतप्रख्यांश्चोदयामासमाधवः यतोभीष्मरथो
राजन्दुःप्रेक्ष्योरश्मिवानिव ४९ ततस्तत्पुनरावृत्तंयुधिष्ठिरबलंमहत दृष्ट्वापार्थंमहाबाहुंभीष्मायोद्यंतमाहवे ५० ततोभीष्मःकुरु
श्रेष्ठःसिंहवद्विनदन्मुहुः धनंजयरथंतूर्णंशरवर्षैरवाकिरत् ५१ क्षणेनसरथस्तस्यसहयःसहसारथिः शरवर्षेणमहतासंछन्नोनप्रका
शते ५२ वासुदेवस्त्वसंभ्रांतोधैर्यमास्थायसत्ववान् चोदयामासतानश्वान्वितुन्नान्भीष्मसायकैः ५३ ततःपार्थोधनुर्गृह्यदिव्यंजल
दनिस्वनं पातयामासभीष्मस्यधनुश्छित्वाशितैःशरैः ५४ सच्छिन्नधन्वाकौरव्यःपुनरन्यन्महद्धनुः निमेषांतरमात्रेणसज्जंचक्रेपितातव
५५ विचकर्षततोदोर्भ्यांधनुर्जलदनिस्वनं अथास्यतदपिक्रुद्धश्चिच्छेदधनुरर्जुनः ५६ तस्यतत्पूजयामासलाघवंशांतनोःसुतः साधु
पार्थमहाबाहोसाधुभो॥ श्रीरामचंद्रजीसहाय श्रीगंगाजीसाहाय श्रीहनुमानजीसाहाय श्रीभीमसेनजीसहाय॥ अनपुर्णाजीसाहाय॥॥

राम॰

पांडुनंदन ५७ त्वय्येवैतद्युक्तरूपं महत्कर्म धनंजय प्रीतोस्मि सुदृढं पुत्र कुरु युद्धं मया सह ५८ इति पार्थं प्रशस्याथ प्रगृह्यान्यन्महद्धनुः मु
मोच समरे वीरः शरान्पार्थरथं प्रति ५९ अदर्शयद्वासुदेवो हययाने परं बलं मोघान्कुर्वञ्शरांस्तस्य मंडलान्यचरल्लघु तथापि भीष्मः
सुदृढं वासुदेवधनंजयौ विव्याध निशितैर्बाणैः सर्वगात्रेषु मारिष शुशुभाते नरव्याघ्रौ तौ भीष्मशरविक्षतौ ६० गोवृषाविव नर्दंतौ
विषाणोल्लिखितांकितौ पुनश्चापि सुसंक्रुद्धः शरैः शतसहस्रशः कृष्णयोर्युधि संक्रुद्धो भीष्मश्चावारयद्दिशः वार्ष्णेयं च शरैस्ती
क्ष्णैः कंपयामास रोषितः ६२ मुहुरभ्युत्स्मयन्भीष्मः प्रहस्य स्वनवत्तदा ततः कृष्णस्तु समरे दृष्ट्वा भीष्मपराक्रमं ६३ संप्रेक्ष्य च महाबा
हुः पार्थस्य मृदुयुध्यतो भीष्मं च शरवर्षाणि सृजंतमनिशं युधि ६४ प्रतपंतमिवादित्यं मध्यमासाद्य सेनयोः वरान्वरान्विनिघ्नंतं पांडुपुत्रस्य
सैनिकान् ६५ युगांतमिव कुर्वाणं भीष्मं यौधिष्ठिरे बले अमृष्यमाणो भगवान्केशवः परवीरहा ६६ अचिंतयदमेयात्मा नास्ति यौधि
ष्ठिरं बलं एकाह्ना हि रणे भीष्मो नाशयेद्देवदानवान् ६७ किमु पांडुसुतान्युद्धे सबलान्सपदानुगान् द्रवते च महत्सैन्यं पांडवस्य महा
त्मनः ६८ एते च कौरवास्तूर्णं प्रभग्नान्दृश्य सोमकान् प्राद्रवंति रणे हृष्टा हर्षयंतः पितामहं ६९ सोहं भीष्मं निहन्म्यद्य पांडवार्थाय दं
शितः भारमेतं विनेष्यामि पांडवानां महात्मनां ७० अर्जुनोपि हि शरैस्तीक्ष्णैर्वध्यमानो हि संयुगे कर्तव्यं नाभिजानाति रणे भीष्मस्य
गौरवात् ७१ तथा चिंतयतस्तस्य भूय एव पितामहः प्रेषयामास संक्रुद्धः शरान्पार्थरथं प्रति ७२ तेषां बहुत्वाद्धि भृशं शराणां
दिशोथ सर्वाः पिहिता बभूवुः न चांतरिक्षं न दिशो न भूमिर्न भास्करो दृश्यति रश्मिमाली ववुश्च वातास्तुमुलाः सधूमा दिशश्च सर्वाः
क्षुभिता बभूवुः द्रोणो विकर्णो ॥ ७ भी ॥

पत्रे ५

सजयद्रथश्च भूरिश्रवाः कृतवर्मा कृपश्च ७३ श्रुतायुर्वेष्ठपतिश्च राजा विंदानुविंदौ च सुदक्षिणाश्च प्राच्याश्च सौवीरगणाश्च सर्वे वृषसेनपु
त्सुदक्षिणामालवाश्च ७४ किरीटिनं त्वरमाणा विसत्तुनिदेशगाः शांतनवस्य राज्ञः नेवक्षिपार्हातिरथौ जैलेरनेकसाहस्रशतैर्वृष्टौ ७५ किरी
टिनं स्वपरिचार्य मारणो शिनेर्नप्रावारणाय यय्येश्च ततस्य दृष्ट्वार्जुनवासुदेवौ पदाति नागाश्व रथैः समंतात ७६ अभिद्रुतौ शस्त्रमतां
वरिष्ठो शिनिप्रवीरोभिससार तूर्णं सनान्यनीकानि धनुष्मतां वरः शिनिप्रवीरः सहसाभिपत्य ७७ चकार साहाय्यमथार्जुनस्य विकृष्य
चापं च निहत्य तस्य विशीर्ण नागाश्व रथ ध्वजौघं भीष्मेण विक्रासित सर्वयोधं ७८ युधिष्ठिरानीकमभिद्रवंतं प्रोवाच संहृष्य शिनि
प्रवीरः क्व क्षत्रिया यास्यथ नैष धर्मः सतां पुरस्तात्कथितः पुराणैः ७९ मा स्म प्रतिज्ञां त्यजत प्रवीराः स्ववीरधर्मानुप्रतिपालयध्वं
तान्वासवानंतरजो निशम्य नरेंद्रमुख्यान् द्रवतः समंतात् पार्थस्य दृष्ट्वा मृदुयुध्यतां च भीष्मं च संख्ये समुदीर्यमाणं अमर्षमाणस्तत
तो महात्मा यशस्विने सर्वदशार्हभर्त्रा ८१ उवाच शैनेयमभिप्रशंसन् दृष्ट्वा कुरून् आपततः समंतात् ये यांति ते यो त्वेव शिनिप्रवीर ये पि स्थिताः
सात्वत ते पि यांतु ८२ भीष्मं रथात्पश्य निपात्यमानं द्रोणं च संख्ये सगणं मयाद्य न मे बले सात्वत कौरवाणां क्रुद्धस्य युद्धे न रतो पि कश्चि
त ८३ तस्मादहं गृह्य रथांगमुग्रं प्राणो हनिष्यामि महाव्रतस्य निपत्य भीष्मं सगणं तथाजौ द्रोणं च शैनेय रथप्रवीर ८४ प्रीतिं करिष्यामि
धनंजयस्य राज्ञश्च भीमस्य तथाश्विनोश्च निहत्य सर्वान् धृतराष्ट्रपुत्रान् तत्पक्षिकापेच ॥ ५ ॥ ५ ॥

नेंद्रमुख्यःस्वराज्येनराजानमजातशत्रुंसंपालयिष्यस्यहमद्यहृष्टः ततःसुनाभंवसुदेवपुत्रःसूर्यप्रभंवज्रसहस्रतुल्यं ८६ क्षुरांतमुद्यम्यभुजेनचक्रंरथादवप्लुत्यविसृज्यवाहान् सं-
कंपयन्गांचरणैर्महात्मावेगेनकृष्णःप्रससारभीष्मं ८७ मदांधमाजौसमुदीर्णदर्पंसिंहोजिघांसन्निववारणेंद्रं सोभ्यद्रवद्भीष्ममनीकमध्येक्रुद्धोमहेंद्रावरजःप्रमाथी ८८ व्यालंबिपीतांत-
पटश्चकाशेघनोयथाखेचिरभापिनद्धः सुदर्शनंचास्यरराजशौरेस्तच्चक्रपद्मंसुभुजोरुनालं ८९ यथादिपद्मंतरुणार्कवर्णंरराजनारायणनाभिजातं तत्कृष्णकोपोदयसूर्यबुद्धंक्षु-
रांततीक्ष्णाग्रसुजातपत्रं ९० तस्यैवदेहोरुसरःप्ररूढंरराजनारायणनाभिनालं तमात्तचक्रंप्रणदंतमुच्चैःक्रुद्धंमहेंद्रावरजंसमीक्ष्य ९१ सर्वाणिभूतानिभृशंविनेदुःक्षयंकुरू-
णामितिचिंतयित्वा सवासुदेवःप्रगृहीतचक्रःसंवर्तयिष्यन्निवजीवलोकं ९२ अभ्युत्पतन्लोकगुरुर्बभासेभूतानिधक्ष्यन्निवधूमकेतुः तमापतंतंप्रगृहीतचक्रंसमीक्ष्यदेवंद्विपदां
वरिष्ठं ९३ असंभ्रमात्कार्मुकबाणपाणीरथेस्थितःशांतनवोभ्युवाच एह्येहिदेवेशजगन्निवासनमोस्तुतेशार्ङ्गगदासिपाणे ९४ प्रसह्यमांपातयलोकनाथरथोत्त-
माद्भूतशरण्यसंख्ये त्वयाहतस्येहममाद्यकृष्ण श्रेयःपरस्मिन्निहचैवलोके ९५ संभावितोस्म्यंधकवृष्णिनाथलोकैस्त्रिभिस्त्वत्प्रथितप्रभावः रथादवप्लुत्यततस्त्वरावान्
पार्थःपदानुद्रुत्ययदुप्रवीरं ९६ जग्राहपीनोत्तमलंबबाहुंबाह्वोर्हरिंव्यायतपीनबाहुः निगृह्यमाणस्तुतदादिदेवोभृशंसरोषःकिलचात्मयोगी ९७ आदायवेगेनजगामवि-
ष्णुर्जिष्णुंमहावातइवैकवृक्षं पार्थस्तुविष्टभ्यबलेनपादौभीष्मांतिकंतूर्णमभिद्रवंतं ९८ ॥बलान्निजग्राहशनैर्महात्मापदेचराजन्दशमेकथंचित् अवस्थितंच
प्रणिपत्यकृष्णंप्रीतोर्जुनःकांचनचित्रमाली ९९ उवाचकोपंप्रतिसंहरेतिगतिर्भवान्केशवपांडवानां नहास्यतेकर्मयथाप्रतिज्ञंपुत्रैःशपेकेशवसोदरैश्च १०० अं

तंगभिष्यामियथाकुरूणांत्वयाहमिंद्रानुजसंप्रयुक्तः ततःप्रतिज्ञांसमयंचतस्यजनार्दनःप्रीतमनानिशम्य १ स्थितःप्रियेकौरवसैन्यमध्येसवज्रपुनरागतोह सतानभीष्टस्तुना
रदानःप्रगृह्यशंखंहृदयंतोनिहंता २ निनादयामासदिशोनभश्चसयोचअन्यस्यरवेणशोरिः क्रियाधनिधांशन्दकुंडलेतरंजोधिकीर्णांचितपत्रनेत्रं ३ विशुद्धदेहंप्रणवःहीतशोखंवि
वकुश्चःप्रेस्यकुरुप्रवीराः महेंद्रभेरीपटहप्रणादानेमिस्वनान्दुंदुभिनिस्वनाश्च ४ समिद्धनाश्च बभूवुस्तनाः सर्वेघ्नानिकेषुततःकुरूणां गोष्ठीवघोषस्तनपित्तुकलोजगामपार्थस्य
न भोदिशश्च ५ जग्मुश्चवाणाविमलाःप्रसन्नाःसर्वादिशःपांडवचापमुक्ताः तेकौरवाणामधिपोबलेनभीष्मेणभूरिश्रवसाचसार्धं ६ प्रत्युद्ययावुद्यतवाणपाणिः कस्मिंवि
धक्षान्निवधमकेतुः आथार्जुनायप्रजहारभल्लान्भूरिश्रवाःसप्तसुवर्णपुंखान् ७ दुर्योधनस्तोमरमुग्रवेगंशल्योगदांशांतनवश्चशक्तिं स सप्तभिःसप्तशरप्रवे
गान्संवार्यभूरिश्रवसाप्रयुक्तान् ८ सितेनदुर्योधनबाहुमुक्तंक्षुरेणतत्तोमरमुन्ममाथ ततःशुभामापततींचशक्तिंविद्युत्प्रभांशांतनवेनमुक्तां ९ गदांचमद्राधिप
बाहुमुक्तांहाभ्यांशराभ्यांनिचकर्तवीरः ततोभुजाभ्यांबलवद्विकृष्यचित्रंधनुर्गांडिवमप्रमेयं १० महेंद्रमस्त्रंविधिवत्सुघोरंप्रादुश्चकाराद्भुतमंतरिक्षे ततोत्तमास्त्रेण न
॥तोमहात्मासवरिपनीकानिमहाध॥

नुष्मान् ११ शरौघजालैर्विमलाग्निवर्णैर्निवारयामास किरीटमाली शिलीमुखाःपार्थधनुर्विमुक्ताःरथान्ध्वजान्नागरथान्धनंषिवाहून् १२ निकृत्यदेहान्विविशुःपरेषां
नरेंद्रनागेंद्रतुरंगमाणां ततोदिशः सोनुदिशश्चपार्थः शरैःसुधारैर्निशितैर्वितत्य १३ गांडीवशब्देनमनांसितेषां किरीटमाली व्यथयांचकार तस्मिंस्तथाघोरतमास्वयु
द्धेशंखस्वनोदुंदुभिनिःस्वनाश्च १४ अंतर्हिता गांडीवनिःस्वनेन बभूवुरुत्कस्वरयप्रणादाः गांडीवशब्दं तमथोविदित्वा विराटराजप्रमुखानीवीराः १५ पांचालराजोद्रु
पदश्चवीरस्तद्देशमाजग्मुरदीनसत्वाः सर्वाणिसैन्यानितुतावकानि यतोयतोस्यांध्विजस्यनादः १६ ततस्ततः संनतिमेव जग्मुर्नतं प्रतीयोभिससारकश्चित् तस्मिन्सुघोरे
पसंप्रहारेहताःप्रवीराःसरथाश्वसूताः १७ गजाश्वनाराचनिपातनस्ताम्महापताकाःशुभरुक्मकक्षाःपरीतसत्वाःसहसानिपेतुःकिरीटिनोन्नविभिन्नकायाः १८ दृढाह्वाः
पत्रिभिरुत्तमैःपार्थेनभल्लैर्निशितैःशितास्त्रैः निकृत्तयन्त्रा निहतेंद्रजालाःध्वजान्यपातांध्वजिनीमुखेषु १९ पदातिसंघाश्चरथाश्चसंख्येहयाश्चनागाश्चधनंजयेन
बाणाहतास्तूर्णमपेतसत्वाविमस्यशस्त्राणिनिपेतुरुर्व्यां २० रौद्रेणतेनास्त्रवरेणराजन्महाहवेभिन्नतनुत्रकायाः ततःशरैर्धैर्निशितैः किरीटिनान्देहशस्त्रक्षतलो
हितोदा २१ नदीसघोरानरमेदफेनाप्रवर्तिताततत्ररणाजिरेवै वेगेनसातीवमुसुप्रवाहापरेतनागाश्वशरीरतीरा २२ नरांत्रमज्जोद्भुतघोरपंकाप्रभूतरक्षोगणभूतसेविता
॥ २३ ॥ शिरःकपालाकुलकेशशाड्वला ॥

ग्ग ५

ना१ ष२

लाशरीरसंघातसहस्रमालिनी विकीर्णनानाकवचोर्मिसंकुला नरास्थिनागास्थिशरीरसंकुला विशालपर्यंतमुखीभयावहा २४ गोमायुमालाबककंकगृध्रैःक्र
व्यादसंघैश्चतरक्षुभिश्च उपेतकूलां ददृशुर्मनुष्याः क्रूरां महावैतरणीप्रकाशां २५ प्रवर्तितामर्जुनबाणसंघैर्मेदोवसासृग्वहांसुभीमां हतप्रवीरांचतथैवदृष्ट्वासेनां
कुरूणामथफाल्गुनेन २६ तेचेदिपांचालकरूषमत्स्याः पार्थाश्चसर्वेसहिताःप्रणेदुः जयप्रगल्भाःपुरुषप्रवीराः संत्रासयंतःकुरुवीरयोधान् २७ हतप्रवीराणिबला
निदृष्ट्वाकिरीटिनाशत्रुभयावहेन वित्रासयन्सेनांध्वजिनीपतीनांसिंहोमृगाणामिवयूथसंघान् २८ विनेदतुस्तावतिहर्षयुक्तौगांडीवधन्वाचजनार्दनश्च ततोरविंसंहृतरश्मि
जालंदृष्ट्वाभृशंशस्त्रपरिक्षतांगाः २९ तदैंद्रमस्त्रंविततंचघोरमसह्यमुद्वीक्ष्ययुगांतकल्पं अथापयानंकुरवःसभीष्माःसद्रोणदुर्योधनबाह्लिकाश्च ३० चक्रुर्निशां
संधिगतांसमीक्ष्यविभावसोर्लोहितराजयुक्तां अवाप्यकीर्तिंचयशश्चलोकेविजित्यशत्रूंश्चधनंजयोपि ३१ ययौनरेंद्रैःसहसोदरैश्चसमाप्तकर्माशिबिरंनिशायांततः
प्रजज्ञेतुमुलःकुरूणांनिशामुखेघोरतरःप्रणादः रणेरथानामयुतंनिहत्यहतागजाःसप्तशतार्जुनेन प्राच्याश्चसौवीरगणाश्चसर्वेनिपातिताःक्षुद्रकमालवाश्च ३२
महत्कृतंकर्मधनंजयेनकर्तुंयथानार्हतिकश्चिदन्यः श्रुतायुरंबष्ठपतिश्चराजातथैवदुर्मर्षणचित्रसेनौ ३३ द्रोणःकृपःसैंधवबाह्लिकौचभूरिश्रवाःशल्यशलौचराज
न॥ अन्येचयोधाःशतशःसमेताःक्रुद्धेनपार्थेनरणस्यमध्ये ३४ स्वबाहुवीर्येणजिताःसभीष्माःकिरीटिनालोकमहारथेन इतिब्रुवंतःशिबिराणिजग्मुःसर्वेगणाभारत
पार्थिवीयाः ३५ उल्कासहस्रैश्चसुसंप्रदीप्तैर्विभ्राजमानैश्चतथाप्रदीपैः किरीटिवित्रासितसर्वयोधाचक्रेनिवेशं ॥ ॥ ॥ ॥

प३   ६२

ध्वजिनी कुरूणां ३६ इति श्रीभीष्मपर्वणि अध्यायः ५४ तृतीयदिवसयुद्धं संजय उवाच व्युष्टां निशां भारत भारतानामनीकिनीनां प्रमुखे महात्मा ययौ सपत्नान्प्र
तिजातकोपस्ततः समग्रेण बलेन भीष्मः १ तं द्रोणदुर्योधनवाल्हिकाश्च तथैव दुर्मर्षणचित्रसेनौ जयद्रथश्चाति बलो बलौघैर्नृपास्तथान्ये प्रययुः समंतात् २ स तैर्मह
द्भिश्च महारथैश्च तेजस्विभिर्वीर्यवद्भिश्च राजन् रराज राजोत्तमराजमध्ये मध्ये सुराणामिव देवराजः ३ तस्मिन्ननीकप्रमुखे विषक्ता दोधूयमानाश्च महापताकाः सुरक्त
पीतासितपांडुराभा महागजस्कंधगता विरेजुः ४ सा वाहिनी शांतनवेन राज्ञा महारथैर्वारणवाजिभिश्च बभौ सविद्युत्स्तनयित्नुकल्पा जलागमे द्यौरिव जातमेघा ५
ततो रणायाभिमुखी प्रयाता प्रत्यर्जुनं शांतनवाभिगुप्ता सेना महोग्रा सहसा कुरूणां वेगो यथा भीम इवापगायाः ६ तं व्याधनानाविधगूढसारं गजाश्वपदातरथौघपक्षं
व्यूहं महामेघसमं महात्मा ददर्श दूरात्कपिराजकेतुः ७ स निर्ययौ केतुमता रथेन नरर्षभः श्वेतहयेन वीरः वरूथिनीनां प्रमुखे महात्मा बलेन हंतः सर्वसपत्नसेनां ८ सोप
स्करं सोत्तरबंधबंधुरं यत्तं यदूनामृषभेण संख्ये कपिध्वजं प्रेक्ष्य विषेदुराजौ सहैव पुत्रैस्तव कौरवेयाः ९ प्रकर्षता गुप्तमुदायुधेन किरीटिना लोकमहारथेन तं व्यूहराजं
ददृशुस्त्वदीयाश्चतुश्चतुर्व्यालसहस्रकीर्णं १० यथा हि पूर्वेऽहनि धर्मराज्ञा व्यूहः कृतः कौरवसत्तमेन तथा न भूतो भुवि मानुषेषु न दृष्टपूर्वो न च विश्रुतश्च ११ ततो महा
वेगसमाहतानि भेरीसहस्राणि विनेदुराजौ शंखस्वनास्तूर्यरवाश्च जज्ञुः सर्वेष्वनीकेषु च सिंहनादाः १२ ॥ ॥ १२ ॥ ॥ १२ ॥ १२

ततःसवाणानिमहास्वनानि विस्फार्यमाणानिधनंषिवीरैः स्वनेनभेरीपणवप्रणादानंतर्दधुःशंखमहास्वनाश्च १३ तद्धंरवशब्दाद्वृत्तमंतरिक्षंसमुद्धूतभौमद्रुतरेणु
जालं महावितानाभ्वततःप्रकाशमालोकवीराःहसानिपेतुः १४ रथीरथेनाभिहतःससूतःपपातसाश्वःसरथःसकेतुःगजोगजेनाभिहतःपपातपदातिनाचाभिह
तःपदातिः १५ आवर्त्तमानान्यभिवर्त्तमानैर्घोराकृतीन्यद्भुतदर्शनानि प्रासैश्चखड्गैश्चसमाहतानिसदश्ववृंदानिसदश्ववृंदैः १६ सुवर्णतारागणभूषितानिसर्प
प्रभावाणिशरावराणि विदीर्यमाणानिपरश्वधैश्चप्रासैश्चखड्गैश्चनिपेतुरुर्व्यां १७ गजोविषाणोर्वरहस्तरुग्णाःकेचित्ससतारथिनःप्रपेतुः गजर्षभाश्चापिर
थर्षभेणनिपेतुर्बाणाहताःपृथिव्यां १८ गजौघवेगोद्धतमर्दितानांश्रुत्वाविषेदुर्बहुधामनुष्याः आर्त्तस्वरंसादिपदातियंतांविषाणगात्रावरताडितानां १९ सं
भ्रांतनागाश्वरथेसुहृन्नेमहाक्षयेसादिपदातियत्ताः महारथैःसंपरिवार्यमाणोददर्शभीष्मःकपिराजकेतुं २० तंपंचतालोच्छ्रिततालकेतुःसदश्ववेगाद्भुतवीर्ययातं
महास्त्रबाणाशनिदीप्तमंतंकिरीटिनंशांतनवोभ्यधावत् २१ तथैवशक्रप्रतिमानकल्पमिंद्रात्मजंद्रोणमुखाभिसस्रुः कृपश्चशल्यश्चविविंशतिश्चदुर्योधनः
सोमदत्तिश्चराजन् २२ ततोरथानीकमुखादुपेत्यसर्वास्त्रवित्कांचनचित्रवर्मा जवेनशूरोभिससारसर्वांस्तानर्जुनस्यात्मसुतोभिमन्युः २३ तेषांमहास्त्राणि
महाबलानामसह्यकर्मा विनिहत्यकार्ष्णिः बभौमहामंत्रहुतार्चिमालीसदोगतःसभगवानिवाग्निः २४ ततःस ॥ २४ ॥ ॥ २४ ॥

रैथ१

तरंगांसिधे केनांक्षत्वानदींतांसमरेरिपुत्राणां जगाम सौभद्रमतीत्यभीष्मो महारथंपार्थमहीनसत्वः २५ ततःप्रगृह्याद्भुतदर्शनेन गांडीव निर्ह्रादमहास्वनेन विपाट
जालेन महास्त्रजालं विनाशयामास किरीटमाली २६ तमुत्तमं सर्वधनुर्धराणामसक्तकर्मा कपिराजकेतुः भीष्मं महात्मा ववृषे मयःशरैः स्तीक्ष्णै विमले श्वभ
ल्लैः २७ तथैव भीष्माहृतमंतरिक्षे महास्त्रजालं कपिराजकेतोः विशीर्यमाणं ददृशुस्त्वदीया दिवाकरेणेव तमोभिभूतं २८ एवंविधं कार्मुकभीमनादमदीन
वत्सत्पुरुषोत्तमाभ्यां ददर्शलोकःकुरुसृंजयाश्च तद्द्वैरथं भीष्मधनंजयाभ्यां २९ इतिश्रीभीष्मपर्वणिअध्यायः ५५ संजयउवाच द्रोणिर्भूरिश्रवाःशल्यश्चित्र
सेनश्च मारिष पुत्रः सांयमनश्चैव सौभद्रं समयोधयन् १ संसक्तमतितेजोभिस्तमेकं ददृशुर्जनाः पंचभिर्मनुजव्याघ्रैर्गजैःसिंहशिशुंयथा २ नाभिलक्ष्यतया क
श्चिन्नशौर्येन पराक्रमे बभूव सदृशःकार्ष्णेर्नास्त्रेणापि चलाघवे ३ तथातमात्मजंयुद्धे विक्रमंतमरिंदम दृष्ट्वा पार्थोरणे यत्तः सिंहनादमथानदत् ४ पीडयानं
चतेसैन्यं पौत्रंतव विशांपते दृष्ट्वात्वदीयाराजेंद्र समंतात्पर्यवारयन् ५ ध्वजिनीधार्तराष्ट्राणांदीनशत्रुरदीनवत् प्रत्युद्ययौसुसौभद्रस्तेजसाचबलेनच ६
तस्यलाघवमार्गस्थमादित्यसदृशप्रभं प्रादृश्यतमहच्चापंसमरेयुध्यतःपरैः ७ सद्रौणिमिषुणैकेन विध्वा शल्यंचपंचभिः ध्वजंसांयमनेश्चापि सोष्टाभिरपवर्जे
यत् ८ रुक्मदंडमहाशक्तिंप्रेषितांसौमदत्तिना शितेनोरगसंकाशांपत्रिणाभिजहारतां ९ शल्यस्यचमहाघोरानस्यतः ॥ ॥ ॥

शतशः शरान् निवार्यार्जुनदायादो जघान चतुरो हयान् १० भूरिश्रवाश्च शल्यश्च द्रौणिः सांयमनिः शलः नाभ्यवर्तन्त संरब्धाः कार्ष्णिर्बाहुबलोछ्रयं ११
ततस्त्रिगर्तो राजेंद्र मद्राश्च सह केकयैः पंचविंशतिसाहस्रास्तव पुत्रेण चोदिताः १२ धनुर्वेदविदो मुख्या अजेयाः शत्रुभिर्युधि सहपुत्रं जिघांसंतं परिवव्रुः
किरीटिनं १३ तौ तु तत्र पिता पुत्रौ परिक्षिप्तौ रथर्षभौ ददर्श राजन् पांचाल्यः सेनापतिरमित्रजित् १४ स वारणरथौघानां सहस्रैर्बहुभिस्ततः वाजिभिः पत्तिभि
श्चैव ततः शतसहस्रशः १५ धनुर्विस्फार्य संक्रुद्धश्चोदयित्वा च वाहिनीं ययौ तन्मद्रकानीकं केकयांश्च परंतपः १६ तेन कीर्तिमता गुप्तमनीकं दृढधन्वना ॥
प्रयुक्तरथनागाश्वं योत्स्यमानमशोभयत् १७ सोर्जुनं प्रमुखे यांतं पांचाल्यकुलवर्द्धनः त्रिभिः शारद्वतं बाणैर्जत्रुदेशे समर्पयत् १८ ततः स मद्रकान् हि
त्वा दशभिर्निशितैः शरैः हृष्ट एको जघानाशु भल्लेन कृतवर्मणः १९ दमनं चापि दायादं कौरवस्य महात्मनः जघान विपुलाग्रेण नाराचेन परंतपः २०
ततः सांयमनेः पुत्रः पांचाल्यं युद्धदुर्मदं अविध्यद्दशभिर्बाणैर्दशभिश्चास्य सारथिं २१ सोतिविद्धो महेष्वासः सृक्किणी परिलेलिहन् भल्लेन भृशतीक्ष्णे
न चकर्तास्य च कार्मुकं २२ तथैनं पंचविंशत्या क्षिप्रमेव समर्पयत् अश्वांश्चास्यावधीद्राजन्नुभौ तौ पार्ष्णिसारथी २३ हताश्वे स रथे तिष्ठन् ददर्श भरत
र्षभ पुत्रः सांयमनेः पुत्रं पांचाल्यस्य यशस्विनः २४ स प्रगृह्य महाघोरं निस्त्रिंशवरमायसं पदातिस्तूर्णमान्छद्रथस्थं द्रुपदात्मजं २५ ॥

जा१ म

तंमहौघमिवायांतंखात्पतंतमिवोरगं क्रोधरागा निस्त्रिंशंकालोत्सृष्टमिवांतकं २६ दीप्यमानमिवादित्यंमत्तवारणविक्रमं अपश्यन्पांडवास्तत्र धृष्टद्युम्नस्यपा
र्षतः २७ तस्यपांचाल्यपुत्रस्तुप्रतीपमभिधावतः शितनिस्त्रिंशहस्तस्यशरावरणधारिणः २८ वाणवेगमतीतस्यतथाभ्याशमुपेयुषः त्वरन्सेनापतिःक्रुद्धोविभे
दगदयाशिरः २९ तस्यराज्ञःसनिस्त्रिंशंसुप्रभंचशरावरं हतस्यपततःहस्तात्सोत्सेधमपतद्भुवि ३० तंनिहत्यगदाग्रेण लेभेसपरमंयशः पुत्रःपांचालराजस्यमहा
त्माभीमविक्रमः ३१ तस्मिन्हतेमहेष्वासेराजपुत्रेमहारथे हाहाकारोमहानासीत्तवसैन्यस्यमारिष ३२ ततःसोयमनिःक्रुद्धोदृष्ट्वानिहतमात्मजं अभिदुद्रा
ववेगेनपांचाल्यंयुद्धदुर्मदं ३३ तौतत्रसमरेवीरौसमेतौरथिनांवरौ ददृशुःसर्वराजानःकुरवःपांडवास्तथा ३४ ततःसोयमनिःक्रुद्धःपार्थंतंपरवीरहा आ
जघानत्रिभिर्वाणैस्तोत्रैरिवमहाद्विपं ३५ तथैवपार्थंतंभूरिशल्यःसमितिशोभनः आजघानोरसिक्रुद्धस्ततोयुद्धमवर्तत ३६ इतिश्रीभीष्मपर्वणि अध्यायः
५६ धृतराष्ट्रउवाच दैवमेवपरंमन्येपौरुषादपिसंजय यत्सैन्यंममपुत्रस्यपांडुसैन्येनवध्यते १ नित्यंहिमामकांस्तुहतानेवहिशंससि अव्यग्रांश्चप्रहृ
ष्टांश्चनित्यंशंससिपांडवान् २ हीनान्पुरुषकारेणमामकानघसंजयः पतितान्पात्यमानांश्चहतानेवचशंससि युध्यमानान्यथाशक्तिघटमानान्जयंप्रति
पांडवाविजयंत्येवहीयंतेचैवमामकाः ४ सोहंतीव्राणिदुःखानिदुर्योधनकृतानिच अ ऽ ३१ ऽ ऽ ऽऽ ऽ ऽ ऽ ऽ

श्रोषंसततंतात्तदुः सहानिबहूनिव ५ तमुयायंनपश्यामिद्वीयेरथेनपांडवाः मामकाश्चाजयंयुद्धेप्राप्नुयुर्येनसंजय ६ संजयउवाच क्षयंमनुष्यदेहानां राजवा
जिरथक्षयं श्रणुराजन्स्थिरोभूत्वात्वैवापनयोमहान् ७ धृष्टद्युम्नं शल्येनपीडितोनवभिःशरैः पीडयामाससंक्रुद्धोमद्राधिपतिमायसैः तत्राद्भुतमपश्या
मपार्षतस्यपराक्रमं न्यवारयतयत्तूर्णंशल्यंसमितिशोभनं ९ नांतरंददृशेकश्चित्तयोःसंरब्धयोरणे मुहूर्त्तमिवतद्युद्धंतयोःसमभवत्तदा ततःशल्योम
हाराजधृष्टद्युम्नस्यसंयुगे धनुश्चिच्छेदभल्लेनपीतेननिशितेनच ११ अथैनंशरवर्षेणछादयामासभारत गिरिंजलागमेयद्वज्जलदाजलधारिणः १२
अभिमन्युस्तुसंक्रुद्धोधृष्टद्युम्नेनपीडिते अभिदुद्राववेगेनमद्रराजरथंप्रति १३ ततोमद्राधिपरथंकार्ष्णिःसंप्राप्यकोपनः आर्त्तायनिममेयात्माविव्याधनि
शितैस्त्रिभिः १४ ततस्तावकाराजन्परीप्संतोर्जुनिंरणे मद्रराजरथंतूर्णंपरिवार्यावतस्थिरे १५ दुर्योधनोविकर्णश्चदुःशासनविविंशती दुर्मर्षणोदुःसहश्च
चित्रसेनःसदुर्मुखः १६ सत्यव्रतःपुरुमित्रोविकर्णश्चमहायशः एतेमद्राधिपरथंपालयंतस्थितारणे १७ तान्भीमसेनःसंक्रुद्धोधृष्टद्युम्नश्चपार्षतः द्रौपदेया
भिमन्युश्चमाद्रीपुत्रौचपांडवौ १८ धार्त्तराष्ट्रान्दशरथानद्दशैवप्रत्यवारयन् नानारूपाणिशस्त्राणिविसृजंतोविशांपते १९ अभ्यवर्त्तंतसंक्रुद्धाःपरस्पर
॥ वधैषिणः तेवैसमीयुःसंग्रामेराजन्दुर्मंत्रितेतव २० तस्मिन्द ॥

शरव्येष्वेवर्त्तमानेमहाभये तावकानांपरेषांचप्रेक्षकारथिनोभवन् २१ शस्त्राण्यनेकरूपाणिविसृजंतोमहारथाः अन्योन्यमभिनर्दंतःसंप्राहारंप्रचक्रिरे तेनदा
जातसंरंभाःसर्वेन्योन्यंजिघांसवः अन्योन्यमभिनर्दंतस्पर्द्धमानापरस्परं अन्योन्यस्पर्द्धयाराजन्ज्ञातयःसंगतामिथः २२ महास्त्राणिविसृजंतःसमायेतुरमर्षणाः
दुर्योधनस्तुसंक्रुद्धोधृष्टद्युम्नंमहारणे विव्याधसमरेबाणैश्चतुर्भिःसमरेद्रुतं दुर्मर्षणस्त्वविंशत्याचित्रसेनश्चसप्तभिः विविंशतिःपंचभिस्तुत्रिभिर्दुःशासनस्तथा २६
तान्प्रत्यविध्यद्राजेंद्रपार्षतः शत्रुतापनः एकैकंपंचविंशत्यादर्शयन्हस्तलाघवं २७ सत्यव्रतंचसमरेपुरमित्रंचभारत अभिमन्युरविध्यत्तुदशभिर्दशभिःशरैः
२८ माद्रीपुत्रौतुसमरेमातुलंमातनंदनौ छादयंतौशरैस्तीक्ष्णैस्तदद्भुतमिवाभवत् २९ ततःशल्योमहाराजस्वस्रीयौरथिनांवरौ शरैर्बहुभिरानर्छत्कृतप्रति
कृतैषिणौ ३० छाद्यमानौनतस्तौतुमाद्रीपुत्रौनचेलतुः अथदुर्योधनंदृष्ट्वाभीमसेनोमहाबलः ३१ विधित्सुःकलहस्यांतंगदांजग्राहपांडवः तमुद्यतगदंदृ
ष्ट्वाकैलासमिवशृंगिणं ३२ भीमसेनंमहाबाहुंपुत्रास्तेप्राद्रवन्भयात् दुर्योधनस्तुसंक्रुद्धोमागधंसमचोदयत् ३३ अनीकंदशसाहस्रंकुंजराणांतरस्वि
नां गजानीकेनसहितस्तेनराजासुयोधनः ३४ मागधंपुरतःकृत्वाभीमसेनमथाभ्ययात् आपतंतंचतंदृष्ट्वागजानीकंवृकोदरः ३५ गदापाणिरवारोहद्
रथात्सिंहइवोन्नदन् अद्रिसारमयींगुर्वींप्रगृह्यमहतींगदां ३६ अभ्यधावद्गजानीकंव्यादितास्यइवांतकः सगजान्गदयानिघ्नन्समरेव्यचरद्बली ३७ भीमसेनो
महाबाहुर्वृत्रहादानवेष्विव तस्यनादेनमहतामनोहृदयकंपिना ३८ व्यतिष्ठंतसंहत्यगजाभीमस्यनर्दतः ततस्तुद्रौप ऽ ऽ ऽ ऽ ऽऽः

७२

द्रु १ स्थ

द्रीपुत्राः सौभद्रश्च महारथः ३९ नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ४९ भीमस्य रथं ततः शरवर्षेण वारणान् ४० अभ्यधावंत वर्षंतो मेघा इव गिरीनथ क्षुरैः
क्षुरप्रैर्भल्लैः पीतैरंजलिकैः शितैः ४१ आहरन्नुत्तमांगानि पांडवो गजयोधिनां शिरोभिः प्रपतद्भिश्च बाहुभिश्च विभूषितैः ४२ अश्मवृष्टिरिवाभाति पाणिभिश्च स-
हांकुशैः कृत्तोत्तमांगाः स्कंधेषु गजानां गजयोधिनः ४३ अदृश्यंताचलाग्रेषु द्रुमा भग्नशिखा इव धृष्टद्युम्नहतानन्यानपश्याम महागजान् ४४ पतितान् पा-
त्यमानांश्च पार्षतेन महात्मना मागधोथ महीपालो गजमैरावतोपमं ४५ प्रेषयामास समरे सौभद्रस्य रथं प्रति तमापतंतं संप्रेक्ष्य मागधस्य महागजं ४६
निजघ्नेषुणा वीरः सौभद्रः परवीरहा तस्यावर्जितनागस्य कार्ष्णिः परपुरंजयः ४७ राज्ञो रजतपुंखेन भल्लेनापहरच्छिरः विगाह्य तद्गजानीकं भीमसेनोपि
पांडवः ४८ व्यचरत्समरे मृद्नन् गजानिंद्रो गिरीनिव एकप्रहाराभिहतान् भीमसेनेन दंतिनः ४९ अपश्याम रणे तस्मिन् गिरीन् वज्रहतानिव भग्नदंतान् भ-
ग्नकरान् भग्नसक्थांश्च वारणान् । भग्नपृष्ठत्रिकानन्यान्निहतान् पर्वतोपमान् । नदतः सीदतश्चान्यान् विमुखान् समरे गजान् वित्रस्तान् भयसंविग्नान् भया-
न्विशकृतो महान् । भीमसेनस्य मार्गेषु गतासून् पर्वतोपमान् अपश्यन्निहतान्नागान् राजन्निष्ठीवतोपरान् ५० वमंतो रुधिरं चान्या भिन्नकुंभा महागजाः
विह्वलंतो गता भूमिं शैला इव धरातले ५१ मेदोरुधिरदिग्धांगो वसामज्जासमुक्षितः व्यचरत्समरे भीमो दंडपाणिरिवांतकः ५२ गजानां रुधिराक्तां गदां बि-
भ्रद्वृकोदरः घोरः प्रतिभयश्चासीत् पिनाकीव पिनाकधृक् ॥ निर्मथ्यमाना क्रुद्धेन भीमसेनेन दंतिनः सहसा प्राद्रवन् शिष्टा मृद्नंतस्तव वाहिनीं ५४ तं हि वीरं म-
हेष्वासाः सौभद्रप्रमुखा रथाः पर्यरक्षंत युध्यंतं वज्रायुधमिवामराः ५५ शोणिताक्तां गदां बिभ्रदुक्षितो गजशोणितैः कृतांत इव रौद्रात्मा भीमसेनो व्यदृश्यत ५६
॥ व्यायच्छमानं गदया दिक्षु सर्वासु भारत भीमसेनमपश्याम ॥

राम

तंतमिवशंकरं ५७ यमदंडोपमां गुर्वी मिंद्राशनिसमस्वनां अपश्याम महाराज रौद्रीं विशसनीं गदां ५८ चुन्निश्चांके शामज्जाभिः प्रदिग्धां रुधिरेण च पिना

कमिव हृष्टस्य क्रुद्धस्याभिद्रुतः पशून् यथा पशूनां संघातं यष्ट्या पालः प्रकालयेत् तथा भीमो गजानीकं गदया पर्यकालयत् ६० गदया वध्यमानाश्च मार्गणैश्च ते

समंततः स्वान्स्य नागान्विमर्दतः प्राद्रवन्कुंजरास्ततः ६१ महावात इवाभ्राणि विधमित्वा स वारणान् अतिष्ठत्समरे भीमः स्मशान इव शूलभृत् इति श्री

भीष्मपर्वणि अध्यायः ५७ संजय उवाच हते तस्मिन्गजानीके पुत्रो दुर्योधनस्तव भीमसेनं घ्नतेत्येवं सर्वसैन्यान्यचोदयत् १ ततः सर्वाणि सैन्यानि पुत्रस्य तव

शासनात् अभ्यद्रवंभीमसेनं नदंतं भैरवान् रवान् २ तं बलौघमपर्यंतं देवैरपि दुरुत्सहं आपतंतं सुदुष्पारं समुद्रमिव पर्वणि ३ रथनागाश्वकलिलं शंख

दुंदुभिनादितं अनंतरथपादातं रजसा संवृतोद्धतं ४ स भीमसेनः समरे महोदधिमिवापरं सेनासागरमक्षोभ्यं वेलेव समवारयत् ५ तदाश्चर्यमपश्याम

पांडवस्य महात्मनः भीमसे[illegible]नस्य समरे राजन्कर्मातिमानुषं ६ उदीर्णान्पार्थिवान्सर्वान्साश्वान्सरथकुंजरान् असंभ्रमं भीमसेनो गदया समवा

रयत् ७ स संवार्य बलौघांस्तान्गदया बलिनां वरः अतिष्ठत्तुमुले भीमो गिरिर्मे[illegible]रिवाचलः ८ तस्मिन्सुतुमुले घोरे रणे परमदारुणे भ्रातरश्चैव पु

त्राश्च धृष्टद्युम्नश्च पार्षतः ९ द्रौपदेयाभिमन्युश्च शिखंडी चापराजितः न प्राजहन्भीमसेनं भये जाते महाबलं १० ततश्शैक्यायसीं गुर्वी प्रगृह्य महतीं गदां अ

।।धावत्तावकान्योधान्दंडपाणिरिवांतकः ११ पोथयन्रथहं।।

नआग्नीनि दि३

हानिवाजिवृंदानिवाविभुः व्यचरत्समरेभीमोयुगांतेपावकोयथा २२ विनिघ्नन्समरेयोधान्युगांतेकालवह्निभुः ऊरुवेगेनसंकर्षन्रथजालानिपांडवः २३
बलानिचममर्दाशुनड्वलानिवकुंजरः सदून्रथेभ्योरथिनोगजेभ्योगजयोधिनः २४ सादिनश्चाश्वपृष्ठेभ्योभूमौचापिपदातिनः गदयाव्यहनत्सर्वान्वातोवृक्षा
निवौजसा २५ भीमसेनोमहावाहुस्तवपुत्रस्यवैवले सावैमज्जवसामांसैर्प्र [illegible]क्षाररुधिरेणच अदृश्यतमहारौद्रीगदानागाश्वघातिनी तत्रतत्रहतैश्चापिमनु
ष्यगजसादिभिः २७ रणांगणंतद्दृभवन्मृत्योराघातसंनिभं पिनाकमिवरुद्रस्यक्रुद्धस्याभिघ्नतःपशून् २८ यमदंडोग्रयमाशुमनामिंद्राशनिसमप्रभां ददृशु
र्भीमसेनस्यरौद्रीविशसनीगदां २९ आविध्यतोगदांतस्यकौंतेयस्यमहात्मनः वभौरूपंमहाघोरंकालस्येवयुगक्षये ३० तंतथामहतींसेनांद्रावयंतंपुनःपु
नः दृष्ट्वामृत्युमिवायंतंसर्वेविमनसोभवन् ३१ यतोयतःप्रेक्षतेस्मगदामुद्यम्यपांडवः तेनतेनस्मदीर्यंतेसर्वसैन्यानिभारत ३२ नसमानमनीकानिव्यादि
तास्यमिवांतकं तंतथाभीमकर्माणंप्रगृहीतमहागदं ३३ दृष्ट्वावृकोदरंभीष्मःसहसैवसमभ्ययात् महतारथघोषेणरथेनादित्यवर्चसा ३४ छादय
न्शरवर्षेणपर्जन्यइववृष्टिमान् तमायांतंतथादृष्ट्वाव्यात्तास्यमिवांतकं ३५ भीमसेनोमहावाहुःप्रत्युदीयादमर्षितः तस्मिन्क्षणेसात्यकिःसत्यसं
धःशिनिप्रवीरोभ्यपतत्पितामहं ३६ निघ्नन्नमित्रांधनुषादृढेनसंकंपयंस्तवपुत्रस्यसेनां ३६ तंयांतमश्वैरजतप्रकाशैःशरान्वपंतंनि

शितान्सुपुंखान्नाशक्नुवंवारयितुंतान्तानीसर्वेगणाभारतयेत्वदीयाः २७ अविध्यसेनंदशभिःपृषत्कैरत्नंवुघोरास्ससोसौतदानी शरैश्चतुर्भिःप्रतिविध्यतं
चनसाशिनेरभ्यपतद्रथेन २८ अन्वागतंह हिमवीरंनिशम्यमध्येरिपूणांपरिवर्तमानं प्रावर्त्तयंतंकुरुपुंगवांश्चपुनःपुनश्चप्रणादंतमाजौ २९ योधास्त्वदी
याःशरवर्षैरवर्षन्मेघायथाभूधरमंबुवेगैः नाशक्नुवंवारयितुंवरिष्ठंमध्यंदिनेसूर्यमिवातपंतं ३० नतत्रकश्चिन्नविषंसमासीद्धतेराजन्सोमदत्तस्य
पुत्रात् सत्त्वादृशानोधनुरुग्रवेगंभूरिश्रवाभारतसौमदत्तिः ३१ दृष्ट्वारथान्स्वानपनीयमानान्प्रत्युद्ययौसात्यकिंयोद्धुमिच्छन् इतिश्रीभीष्मपर्वणिसात्र
ध्यायः ५८ संजयउवाच ततोभूरिश्रवाराजन्सात्यकिंनवभिःशरैः अविध्यद्भृशसंक्रुद्धस्तोत्रैरिवमहाद्विपं १ कौरवंसात्यकिश्चापिशरैःसन्न
तपर्वभिः अवारयदमेयात्मासर्वलोकस्यपश्यतः २ ततोदुर्योधनोराजासोदर्यैःपरिवारितः सौमदत्तिंरणेयत्तंसमंतात्पर्यवारयन् ३ तथैवपां
डवाःसर्वेसात्यकिंतरसारणे परिवार्यास्थिताःसंख्येसमंतात्सुमहौजसः ४ भीमसेनस्तुसंक्रुद्धोगदामुद्यम्यभारत दुर्योधनमुखाःसर्वेपुत्रा
स्तेपर्यवारयन् ५ रथैरनेकसाहस्रैःक्रोधामर्षसमन्विताः नंदकस्तवपुत्रस्तुभीमसेनंमहाबलं ६ विव्याधनिशितैस्तीक्ष्णैःकंकपत्रैःशिलाशितैः दु
र्योधनस्तदाराजन्भीमसेनंमहाहवे ७ आजघानोरसिक्रुद्धोमार्गणैर्नवभिःशरैः ततोभीमोमहाबाहुःस्वरथंसुमहाबलः ८ आरुरोहरथश्रेष्ठंवि

॥शोकंचेदमब्रवीत् एतेमहारथाः॥

भी०
२३६

शूराधार्त्तराष्ट्रमहावलाः ९ मामेवमभिसंक्रुद्धाहंतुमभ्युद्यतायुधि एतानघहनिष्यामिपश्यतस्तेनसंशयः १० तस्मान्ममार्श्वसंग्रामेपततः संयच्छसार
थे एवमुक्त्वाततःपार्थःपुत्रंतवविशांपते ११ विव्याधदशभिस्तीक्ष्णैःशरैःकनकभूषणैः नैरकेविस्त्रिभिर्वाणैःप्रत्यविध्यत्स्तनांतरे १२ तंतुदुर्योधनः
षष्ट्याविध्वाभीमंमहावलं त्रिभिरन्यैःसुनिशितैर्विशोकंप्रत्यविध्यत १३ भीमस्यचरणेराजन्धनुश्छिच्छेदभास्वरं मुष्टिदेशेशरैस्तीक्ष्णैस्त्रिभिराजौहसन्निव
१४ भीमस्तुप्रेक्ष्ययंतारंविशोकंसंयुगेतदा पीडितंविशिखैस्तीक्ष्णैस्तवपुत्रेणधीमता १५ अमृष्यमाणःसंक्रुद्धोधनुर्दिव्यंपरामृशत् पुत्रस्यतेमहारा
जवधार्थंपुरुषर्षभः १६ समाधत्तचसंरब्धःक्षुरप्रंलोमवाहिनं तेनचिच्छेदनृपतेर्भीमःकार्मुकमुत्तमं १७ अपास्यतुधनुश्छिन्नंपुत्रस्तेक्रोधमूर्छितः अ
न्यत्कार्मुकमादायसत्वरंवेगवत्तरं १८ संधायविशिखंघोरंकालमृत्युसमप्रभं तेनाजघानसंक्रुद्धोभीमसेनंस्तनांतरे १९ सगाढविद्धोव्यथितो
स्यंदनोपस्थआविशत् निषसादरथोपस्थेमूर्छांचाभिजगामह २० तंदृष्ट्वाव्यथितंभीममभिमन्युपुरोगमाः नामृष्यंतमहाभागाःपांडवानांमहा
रथाः २१ ततःसुतुमुलांवृष्टिंशराणामुग्रतेजसां पातयामासुरव्यग्राःपुत्रस्यतवमूर्द्धनि २२ प्रतिलभ्यततःसंज्ञांभीमसेनोमहावलः दुर्योधनंत्रिभि
र्विध्वापुनर्विव्याधपंचभिः २३ शल्यंचपंचविंशत्याशरैर्विव्याधपांडवः रुक्मपुंखैर्महेष्वासःसविद्धोव्यपयाद्रणात् २४ प्रत्युद्ययुस्ततोभीमंतवपुत्रा

मु २ ॥ चतुर्दश सेनापतिःसुषेणश्चजलसंधःसुलोचनः २५ ॥ भी

१९३

राम०
२३६

मसेनमभिद्रुत्य विव्यधुः सहिताः शरैः पुत्रांस्तु तव संप्रेक्ष्य भीमसेनो महाबलः २६ सृक्किणी विलिहन् वीरः पशुमध्ये वृको यथा अभिपत्य महाबाहु
र्गरुत्मानिव वेगितः २७ सेनापतेः क्षुरप्रेण शिरश्चिच्छेद पांडवः संप्रहृष्यश्च दृष्ट्वा त्वत्रिभिर्वीरो महाभुजः २८ जलसंधं विनिर्भिद्य सोनयद्यमसादनं
सुषेणं च ततो हत्वा प्रेषयामास मृत्यवे २९ उग्रस्य सशिरस्त्राणं शिरश्चंद्रोपमं भुवि पातयामास भल्लेन कुंडलाभ्यां विभूषितं ३० वीरबाहुं च सप्त
त्या साश्वकेतुं ससारथिं विनाय समरे भीमः परलोकाय पांडवः भीमं भीमरथं चोभौ भीमसेनो हसन्निव भ्रातरौ रभसौ युद्धे त्वनयद्यमसादनं ३२
ततः सुलोचनं भीमः क्षुरप्रेण महामृधे मिषतां सर्वसैन्यानामनयद्यमसादनं ३३ पुत्रास्तु तव तं दृष्ट्वा भीमसेनपराक्रमे शेषा ये त्वभवंस्तत्र भी
मस्य भयपीडिताः ३४ विप्रद्रुता दिशो राजन् वध्यमाना महात्मना ततोऽब्रवीच्छांतनवः सर्वानेव महारथान् ३५ यथाप्रास्मान्यथावीरान्यथाश
रांश्च संगतान् निपातयेत्तं धन्वानं प्रगृह्णीत पांडवं ३६ एवमुक्तास्ततः सर्वे धार्तराष्ट्रस्य सैनिकाः अभ्यद्रवंत संक्रुद्धा भीमसेनं महाबलं ३७
भगदत्तः प्रभिन्नेन कुंजरेण विशांपते अपतत्सहसा तत्र यत्र भीमो व्यवस्थित ३८ आपतन्नेव च रणे भीमसेनं शिलाशितैः अदृश्यं समरे चक्रे जीमू
तं इव भास्करं ३९ अभिमन्युमुखास्तत्र नामृष्यंत महारथाः भीमस्याच्छादनं संख्ये स्वबाहुबलमा ॥ ॥ ॥ ॥ ॥ ॥

स ३

ते ५

श्रिताः ४० ततस्तंशरवर्षेणसमंतात्पर्यवारयन् गजंचशरवृष्ट्यातुविभिदुस्तेसमंततः ४१ सशरौघवृष्ट्याभिहतःसमस्तैस्तैर्महारथैः प्राग्ज्योतिषग
जोराजन्नानालिंगैःस्वतेजनैः ४२ संजातरुधिरोत्पीडःप्रेक्षणीयोभवद्रणे गभस्तिभिर्विवार्कस्यसंस्यूतोजलदोमहान् ४३ सचोदितोमदस्रा
वीभगदत्तेनवारणः अभ्यधावततान्सर्वान्कालोत्सृष्टइवांतकः ४४ द्विगुणंजवमास्थायकंपयंश्चरणैर्महीं तस्यतत्सुमहद्रूपंदृष्ट्वासर्वेमहारथाः
४५ असह्यंमन्यमानाश्चतेविप्रमनसोभवन् ततस्तुनृपतिःक्रुद्धोभीमसेनस्तनांतरे ४६ आजघाननरव्याघ्रःशरेणानतपर्वणा सोतिविद्धो
महेष्वासोतेनराज्ञामहारथः ४७ मूर्छयाभिपरीतांगोध्वजयष्टिमुपाश्रितः तांस्तुभीतांसमालक्ष्यभीमसेनंचमूर्छितं ४८ नानादंबलवन्नादं
भगदत्तःप्रतापवान् ततोघटोत्कचोराजन्दृष्ट्वाभीमंतथागतं ४९ संक्रुद्धोराक्षसोघोरस्तत्रैवांतरधीयत सकृत्वादारुणांमायांभीरूणांभय
वर्द्धिनीं ५० अदृश्यतनिमेषार्धेघोरंरूपंसमाश्रितः ऐरावतंसमारुह्यस्वयंमायामयंकृतं ५१ तस्यचान्येपिदिङ्नागाबभूवुरनुयायिनः अंज
नोवामनश्चैवमहापद्मश्चसुप्रभः ५२ त्रयएतेमहानागाराक्षसैः समहाबलैः परिपेतुःससंक्रुद्धाश्चतुर्दंताश्चतुर्दिशं ५३ भगदत्तस्यतेन

गंधिवाशेरोरवपीडयन सर्वानमानवैस्तेनोगौर्वेदनार्त्तैः शराहतः ५४ अनदत्सुमहानादंसिंहनादविसमंततः तस्यतंनदतोनादंसुघोरंभीमनिस्वनं ५५ श्रुत्वा
भीष्मोब्रवीद्द्रोणंराजानंचसुयोधनं एषयुध्यतिसंग्रामेहैडिंबेनदुरात्मना ५६ भगदत्तोमहेष्वासःकृछ्रेचपरिवर्त्तते राक्षसश्चमहाकायःसचराजातिको
पनः ५८ ध्रुवंसमेतौसमरेकालमृत्युसमावुभौ श्रूयतेह्येषहृष्टानांपाण्डवानांमहास्वनः ५९ हस्तिनश्चैवसुमहान्भीतस्यहदितध्वनिः तत्रगच्छामभ
द्रंवोराजानंपरिरक्षितुं ६० अरक्ष्यमाणःसमरेक्षिप्रंप्राणान्विमोक्ष्यति त्वरध्वंमहावीर्याश्चिरंकुरुतानघाः ६१ महान्हिवर्त्ततेरौद्रःसंग्रामोलोमहर्षणः
भक्तश्चकुलपुत्रश्चशूरश्चपृतनापतिः ६२ युक्तंतस्यपरित्राणंकर्त्तुमस्माभिरच्युताः भीष्मस्यतद्वचःश्रुत्वाभारद्वाजपुरोगमाः ६३ सहिताःसर्वराजानोभ
गदत्तपरीप्सया उत्तमंजवमास्थायप्रययुर्यत्रसोभवत् ६४ तान्प्रयातान्समालोक्ययुधिष्ठिरपुरोगमाः पांचालाःपांडवैःसार्द्धंपृष्ठतोनुययुःपरान्
६५ तान्यनीकान्यथालोक्यराक्षसेंद्रःप्रतापवान् ननादसुमहानादंनादयानोनभस्तलं ६६ तस्यापितंनिनदंश्रुत्वाहस्त्वानागांश्चयुध्यतः भीष्मःशां
तनवोभूयोभारद्वाजमभाषत ६७ नरोचतेमेसंग्रामोहैडिंबेनदुरात्मना बलवीर्यसमाविष्टःससहायश्चसांप्रतं ६८ नैषशक्योयुधाजेतुमपिवज्रभृता

॥स्वयं लवुधलस॥

प्रहारीचवयंचश्रांतवाहनाः ६९ पांचालैःपांडवैश्चैवदिवसंहतविस्मताः तन्मेनरोचतेयुद्धंपांडवैर्जितकाशिभिः ७० पुष्यतामवहारोद्यश्वोयो
त्स्यामःपरैःसह पितामहवचःश्रुत्वातथाचक्रुःप्रहर्षिताः ७१ उपायेनापयानास्ते घटोत्कचभयार्दिताः कौरवेषुनिवृत्तेषुपांडवाजितकाशिनः ७२
सिंहनादमकुर्वंतशंखवेणुस्वनैःसहः सर्वेतदभवद्युद्धंदिवसेभरतर्षभ ७३ पांडवानांकुरूणांचपुरस्कृत्यघटोत्कचं कौरवास्ततनस्तरणंप्रययुः
शिविरंस्वकं ७३ व्रीडमानानिशाकालेपांडवेयैःपराजिताः शरविक्षतगात्रास्तुपांडुपुत्रामहारथाः ७४ युद्धेसुमनसोराजन्जग्मुःस्वशिविरंप्रतिपु
रस्कृत्यमहाराजभीमसेनघटोत्कचौपजयंतोमहाराजमुदापरमयायुताः नदंतोविविधान्नादांस्तूर्यस्वनविमिश्रितान् ७६ सिंहनादांश्चकुर्वाणांवि
मिश्रांश्चस्वनिःस्वनैः ॥ ॥ ॥ ॥ विनदंतोमहात्मानःकंपयंतश्चमेदिनी ॥ ॥ ७७ ॥ ॥ घट्टयंतश्चमर्माणितवपुत्रस्य
मारिष ॥ ॥ ॥ ॥ प्रयाताःशिविरायैवनिशाकालेपरंतपाः ॥ ततःकृत्वा धिसर्वेशिविरस्ययथाविधिप्रदध्यौशोकसंतप्तोभ्रातृवध्य
व्यसनकर्शितः ॥ ॥ ॥ ८० ॥ ॥ ॥ इतिश्रीभीष्मपर्वणीचतुर्थदिवसयुद्धे ५९ ॥ ५९

१ X दुर्योधनस्तुनृपतिर्दीनो भ्रातृवधेनच मुहूर्तंपापध्यामासर्वेरसुशोकसमाकुलः ७९
भ्रात

धृतराष्ट्र उवाच भयंमेसुमहज्जातंविस्मयश्चैवसंजय श्रुत्वापांडुकुमाराणांकर्मदेवैःसुदुष्करं १ पुत्राणांचपराभावंश्रुत्वासंजयसर्वशः चिंतामेमहतीभू
ताभविष्यतिकथंत्विति २ ध्रुवंविदुरवाक्यानिधक्ष्यंतिहृदयंमम यथाहिदृश्यतेसर्वंदैवयोगेनसंजय ३ यत्रभीष्ममुखांछूरानस्त्रज्ञान्योधसत्तमान् पांडवा
नामनीकेषुयोधयंतिप्रहारिणः ४ किंतेऽवध्यामहात्मानःपांडुपुत्रामहाबलाः किंतेदत्तवरास्तातकिंवाज्ञानंवि[illegible]दंतिते ५ येनक्षयंनगच्छंतिदिवितारागणाइवपुनः
पुनर्नमृष्यामिहतंसैन्यंचपांडवैः ६ मय्येवदंडःपतितोदैवात्परमदारुणः यथावध्याःपांडुसुतायथावध्याश्चमेसुताः ७ एतन्मेसर्वमाचक्ष्वयथातत्वेनसंजय
नहिपारंप्रपश्यामिदुःखस्यास्यकथंचन ८ समुद्रस्येवमहतोभुजाभ्यांप्रतरन्नरः पुत्राणांव्यसनंमन्येध्रुवंप्राप्तंसुदारुणं ९ घातयिष्यतिमेपुत्रान्सर्वान्भी
मोनसंशयः नहिपश्यामितंवीरंयोमेरक्षेत्सुतान्रणे १० ध्रुवंविनाशःसमरेपुत्राणांममसंजय तस्मान्मेकारणंसूतयुक्तंचैवविशेषतः ११ पृच्छतोवैयथा
तत्वेसर्वमाख्यातुमर्हसि दुर्योधनस्तुयच्चक्रेदृष्ट्वास्वान्विमुखान्रणे १२ भीष्मद्रोणौकृपश्चैवसौबलेयोजयद्रथः द्रौणिर्वापिमहेष्वासोविकर्णोवामहाबलः
[illegible] १३ निश्चयोवापिकस्तेषांतदाह्यासीन्महात्मनां विमुखेषुमहाप्राज्ञममपुत्रेषुसंजय संजय उवाच शृणुराजन्नवहितःश्रुत्वाचैवावधारय नैवमंत्रकृतं
किंचिन्नैवमायांतथाविधां १५ नवैविभीषिकांकांचिद्राजन्कुर्वंतिपांडवाः युद्धंतेतेयथान्यायंशक्तिमंतश्चसंयुगे १६ धर्मेणसर्वकार्याणिजीवितादीनिभा
रत आरभंतेसदापार्थाःप्रार्थयानामहद्यशः १७ नतेयुद्धान्निवर्तंतेधर्मोपेतामहाबलाः श्रियापरमयायुक्तायतोधर्मस्ततोजयः १८ तेनावध्यारणेपार्था
जययुक्ताश्चपार्थिव तवपुत्रादुरात्मानःपापेष्वभिरताःसदा १९ निष्ठुराहीनकर्मा ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽऽ

णास्तेनहीयंतिसंयुगे सवह निनर्शं सानिपुत्रैस्तवजनेश्वर २० निकृतानीह पांडूनां नीचैरिवयथानरैः सर्वंचैतदनाहत्यपुत्राणांतवकिल्बिषं २१ सापह्नुवास्त
थेवान्याय्येवापांडुपूर्वज नचैवतांल्लुहमन्यंतेपुत्रैस्तवविशीर्यते २२ तस्यपापस्यसततंक्रियमाणस्यकर्मणः संप्राप्तंसुमहद्घोरंफलंकिंपाकसंनिभं २३
ततद्भुंक्ष्वमहाराजसपुत्रःससुहृज्जनः नावबुध्यसियद्राजन्वार्यमाणःसुहृज्जनैः २४ विदुरेणाथभीष्मेणद्रोणेनचमहात्मनातथामयाचाप्यसकृ
र्यमाणोनगृह्णासि २५ वाक्यंहितंचपथ्यंचमर्त्यःपथ्यमिवौषधं पुत्राणांमतमास्थायजितान्मन्यसिपांडवान् २६ शृणुभूयोयथातत्वंयन्मांत्वमनुपृच्छसि कारणंम
तश्रेष्ठपांडवानांजयंप्रति २७ तत्तेहंकथयिष्यामियथाश्रुतमरिंदम दुर्योधनेनसंपृष्टएतमर्थंपितामहः २८ दृष्ट्वाभ्रातृन्रणेसर्वान्निर्जितान्सुमहारथान् शोक
संमूढहृदयोनिशाकालेस्मकौरव २९ पितामहं [illegible] प्राज्ञंविनयेनोपगम्यह यदब्रवीत्सुतस्तेसौतन्मेशृणुजनेश्वरः ३०
दुर्योधनउ० द्रोणश्चशल्यश्चकृपोद्रौणिस्तथैवच कृतवर्माचहार्दिक्यःकांबो[illegible]सुदक्षिणः ३१ भूरिश्रवाविकर्णश्चभगदत्तश्चवीर्यवान् महा
रथाःसमाख्याताःकुलपुत्रास्तनुत्यजः ३२ त्रयाणामपिलोकानांपर्याप्ताइतिमेमतिः पांडवानांसमस्ताश्चनतिष्ठंतिपराक्रमे ३३ तत्रमेसंशयोजातस्तन्म
माचक्ष्वपृच्छतः यंसमाश्रित्यकौंतेयाजयंत्यस्मान्पदेपदे ३४ भीष्मउवाच शृणुराजन्वचोमह्यंयत्त्वांवक्ष्यामिकौरव बहुशश्चमयोक्तोसिनचमेतंतत्व
याश्रुतं ३५ क्रियतांपांडवैःसार्धंशमोभारतसत्तम एतत्क्षेममहंमन्येपृथिव्यास्तववाविभो ३६ भुंक्ष्वेमांपृथिवींराजन्भ्रातृभिःसहितःसुखीसुहृ
द्दस्तर्पयन्सर्वान्नंदयंश्चापिबांधवान् ३७ नचमेक्रोशतस्तातश्रुतवानसिवैपुरा तदिदंसमनुप्राप्तंयत्पांडून्नवमन्यसे ३८ यश्चहेतुरवध्य ॥ ३ ॥ ३ ॥

त्वेतेषां मल्लिकष्टकर्मणां तं श्रृणुष्व महाराज मम कीर्त्तयतः प्रभो ३९ नास्ति लोकेषु तद्भूतं भविता नो भविष्यति योजयत्यं स्वात्सर्वो न्यालिताछाद्रे धन्वना ४०
यत्तु मे कथितं तात मुनिभिर्भावितात्मभिः पुराणार्थं तं धर्मज्ञ तच्छृणुष्व यथातथं ४१ पुरा किल सुराः सर्वे ऋषयश्च समागताः पितामहमुपासेदुः पर्वते गंधमाद
ने ४२ तेषां मध्ये समासीनः प्रजापतिरपश्यत विमानं जाज्वलद्भासा स्थितं प्रवरमंबरे ४३ ध्यानेनावेद्य तद्दृष्ट्वा हृत्वा चनिपतो ऽञ्जलिं नमस्कारं तु सृष्टात्मापु
रुषं परमेश्वरं ४४ ऋषयस्त्वथ देवाश्च दृष्ट्वा ब्रह्माणमुच्छ्रितं स्थिताः प्रांजलयः सर्वे पश्यंतो महदद्भुतं ४५ यथावज्ज्ञ नमस्कृत्य ब्रह्मा ब्रह्मविदां वरः जगाद जगतः स्र
ष्टा परं परमधर्मवित् ४५ विश्वावसुर्विश्वमूर्त्ते विश्वेशो विष्वक्सेनो विश्वकर्मा वशी च विश्वेश्वरो वासुदेवोसि तस्माद्योगात्मानं दैवतं त्वामुपैमि ४६ जय विश्व
महादेव जय लोकहिते रत जय योगीश्वर विभो जय योगपरावर ४७ पद्मगर्भ विशालाक्ष जय लोकेश्वरेश्वर भूत भव्य भवन्नाथ जय सौम्यात्मजात्मज ४८
असंख्येय गुणाधार जय सर्वपरायण नारायण सुदुष्पार जय शार्ङ्गधनुर्धर ४९ जय सर्वगुणोपेत विश्वमूर्त्ते निरामय विश्वेश्वर महाबाहो जय लोकार्थ
तत्पर ५० महोरगवराहाद्य हरिकेश विभो जय हरिवासं दिशामीश विश्ववासामिताव्ययः ५१ व्यक्ताव्यक्तामितस्थान नियतेंद्रिय सत्क्रिय असंख्येयात्मभा
वज्ञ जय गंभीर कामद अनंत विदित ब्रह्मन् लोकजनप्रिय निसर्गसर्गनिरत कामेश परमेश्वर ५४ अमृतोद्भव सद्भाव मुक्तात्मन् विजयप्रद प्रजापतिपते
देव पद्मनाभ महाबल ५५ आत्मभूत महाभूत कर्मात्मन् जय सर्वद पादौ तव धरा देवी दिशो बाहुर्दिवं शिरः ५६ मूर्त्तिस्ते हं सुराः कायश्चंद्रादित्यौ च चक्षु
षी बलं तपश्च सत्यं च धर्मः कर्मात्मजं तव ५७ तेजोग्निः पवनः श्वास आपस्ते स्वेदसंभव अश्विनौ श्रवणौ नित्यं देवी जिह्वा सरस्वती ॥ ५८ वेदाः ॥ ॥ ॥

॥५

भक्तानां ३

संस्कारनिष्ठा हि त्वदीयं जगदश्नुते नसंख्यानपरीमाणां न तेजो न पराक्रमं ५९ नवलं योगयोगीशजानीमस्तेनसंभवं त्वद्भक्तिनिरतादेवनियमैस्त्वांसमाश्रिताः ६० अर्च
यामसदाविष्णुंपरमेशंमहेश्वरं ऋषयोदेवगंधर्वायक्षराक्षसपन्नगाः ६१ पिशाचामानुषाश्चैवमृगपक्षिसरीसृपाः एवमादिमयासृष्टं पृथिव्यांत्वत्प्रसादजं ६२ पद्मनाभ
विशालाक्षकृष्णदुःस्वप्ननाशन त्वंगतिःसर्वभूतानांत्वंनेतात्वंजगन्मुखं त्वत्प्रसादेनदेवेशसुखिनोविबुधाःसदा पृथिवीनिर्भयादेवत्वत्प्रसादात्सदाभवत् ६३
तस्माद्धिविशालाक्षयदुवंशविवर्धनः धर्मसंस्थापनार्थायदैतेयानांवधायच जगतोधारणार्थायविज्ञाप्यंकुरुमेविभो यत्तत्परमकंगुह्यंत्वत्प्रसादादिदंप्रभो ६५
वासुदेवतदेतत्तेमयोद्गीतंयथातथं सृष्ट्वासंकर्षणंदेवंस्वयमेवात्मनात्मना कृष्णत्वमात्मनास्राक्षीःप्रद्युम्नंचात्मसंभवं ६७ प्रद्युम्नाच्चानिरुद्धंत्वंविदुर्विष्णु
मव्ययं अनिरुद्धोसृजन्मांवैब्रह्माणंलोकधारिणं ६८ वासुदेवमयःसोहंत्वयैवास्मिविनिर्मितः विभज्यभागशोत्मानंव्रजमानुषतांविभो ६९ तत्रासुरवधंकृत्वासर्व
लोकसुखायवै धर्मंस्थाप्ययशःप्राप्ययोगंप्राप्स्यसितत्त्वतः ७० त्वांहिब्रह्मर्षयोलोकेदेवाश्चामितविक्रम तैस्तैश्चनामभिर्युक्तागायंतिपरमात्मकं ७१ स्थिताश्च
सर्वेत्वयिभूतसंघाःकृत्वाश्रयंत्वांवरदंसुबाहो अनादिमध्यांतमपारयोगंलोकस्यसेतुंप्रवदंतिविप्राः ७२ इतिभीष्मपर्वणि ६० भीष्मउवाच ततःसभगवान्दे
वोलोकानामीश्वरेश्वरः ब्रह्माणंप्रत्युवाचेदंस्निग्धगंभीरयागिरा १ विदितंतातयोगान्मेसर्वमेतत्तवेप्सितं तथातद्भवितेत्युक्त्वातत्रैवांतरधीयत २ ततोदेवर्षिगं
धर्वाविस्मयंपरमंगताः कौतूहलपराःसर्वेपितामहमथाब्रुवन् ३ कोन्वयंयोभगवताप्रणम्यविनयाद्विभो वाग्भिःस्तुतोवरिष्ठाभिःश्रोतुमिच्छामतंवयं ४ एवमुक्तस्तु

॥भगवान्प्रत्युवाचपितामहः देवब्रह्मर्षिगंधर्वान्सर्वान्मधुरयागिरा॥

पयत्तत्परंभविष्यंचभविता यच्चयत्परं भूतात्मायः प्रभुश्चैवब्रह्मयच्चपरंपदं ६ तेनास्मिन्कृतसंवादःप्रसन्नेनसुरर्षभाः जगतोनुग्रहार्थायायाचितोमेजगत्पतिः ७
मानुषंलोकमास्थायवासुदेवइतिश्रुतिः असुराणांवधार्थायसंभवस्वमहीतले ८ संग्रामेनिहतायेतेदैत्यदानवराक्षसाः तइमेनृषुसंभूताघोररूपामहाबलाः
९ तेषांवधार्थंभगवान्नरेणसहितोवशी मानुषींयोनिमास्थायचरिष्यति [illegible] महीतले १० नरनारायणौयौतौपुराणावृषिसत्तमौ अजेयौहि
रणेयत्तौसमेतावमरैरपि ११ सहितौमानुषेलोकेसंभूतावमितद्युती मूढास्तौतौनजानंतितेनरनारायणाह्वयौ १२ यस्याहमात्मजःपुत्रःसर्वस्यजगतःपतिःवासु
देवोनुनेयोवःसर्वलोकमहेश्वरः १३ तथामनुष्योयमितिकदाचित्सुरसत्तमाः नावज्ञेयोमहावीर्यःशंखचक्रगदाधरः १४ एतत्परमकंगुह्यमेतत्परमकंपदं
एतत्परमकंब्रह्मएतत्परमकंयशः १५ एतदक्षरमव्यक्तमेतच्छाश्वतमेवच एतत्पुरुषसंज्ञोवैगीयतेज्ञायतेनच १६ एतत्परमकंतेजएतत्परमकंसुखं एतत्पर
मकंसत्यंकीर्तितंविश्वकर्मणा १७ तस्मात्सुरासुरैःसर्वैःसेंद्रैरमितविक्रमः नावज्ञेयोवासुदेवोमानुषोयमितिप्रभुः १८ यश्चमानुषमात्रोयमितिब्रूयात्सुमं
दधीःहृषीकेशमवज्ञानात्तमाहुःपुरुषाधमं १९ योगिनंतंमहात्मानंप्रविष्टंमानुषींतनुं अवमन्येद्वासुदेवंतमाहुस्तामसंजनाः २० देवंचराचरात्मानंश्रीव
त्सांकंसुवर्चसं पद्मनाभंनजानातितमाहुस्तामसंजनाः २१ किरीटकौस्तुभधरंमित्राणामभयंकरं अवजानन्महात्मानंघोरेतमसिमज्जति २२ एवंवि
दित्वातत्त्वार्थंलोकानामीश्वरेश्वरः वासुदेवोनमस्कार्यःसर्वलोकैःसुरोत्तमाः २३ एवमुक्त्वासभगवान्सुरर्षिगणैस्तदा विसृज्यसर्वभूतानिजगामभव
नंस्वकं २४ ततोदेवाःसगंधर्वामुनयोप्सरसोपिच कथांतांब्रह्मणागीतांश्रुत्वाप्रीतादिवंययुः २५ एवंश्रुत्वामयातातआर्षी ॥ ॥ ॥

गांभावितात्मनां वासुदेवं कथयतां समवाये पुरातनं २६ जामदग्न्यस्य रामस्य मार्कंडेयस्य धीमतः व्यासनारदयोश्चापि श्रुतं श्रुतविशारद २७ एतमर्थं च विज्ञाय
श्रुत्वा च प्रभुमव्ययं वासुदेवं महात्मानं लोकानामीश्वरं प्रभुं २८ यस्यासौ ह्यात्मजो ब्रह्मा सर्वस्य जगतः पिता कथं न वासुदेवोयमर्च्य इज्यश्च मानवैः २९ वारितोसि पुरा
तात मुनिभिर्भावितात्मभिः मा गच्छ संयुगं तेन वासुदेवेन धन्विना ३० पांडवैः सार्द्धमिति यत्तत्त्वं मोहान्न बुध्यसे मन्ये त्वां राक्षसं क्रूरं तथा चाविष्टतमोवृतः ३१ तस्माद्द्वि
षसि गोविंदं पांडवं च धनंजयं नरनारायणौ देवौ कोन्यो हि द्विष्यान्मानवः ३२ तस्मादब्रवीमि ते राजन्नेष वै शाश्वतोव्ययः सर्वलोकमयो नित्यः शास्ता धाता धरो ध्रुवः ३३
लोकान्धारयते यस्त्रींश्च चराचरगुरुः प्रभुः योद्धा जयश्च जेता च सर्वप्रकृतिरीश्वरः ३४ राजन्सत्त्वमयो ह्येष तमोरजोविवर्जितः यतः कृष्णस्ततो धर्मो यतो धर्मस्ततो जयः
३५ तस्य माहात्म्ययोगेन योगेनात्ममयेन च धृताः पांडुसुता राजन्जयश्चैषां भविष्यति ३६ श्रेयोयुक्तां सदा बुद्धिं पांडवानां दधाति यः बलं चापि रणे नित्यं भये
भ्यश्चैव रक्षति ३७ स एष शाश्वतो दिव्यः सर्वभूतमयः शिवः वासुदेव इति प्रोक्तो यन्मां पृच्छसि भारत ३८ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः सोर्च्यतेभ्य
र्च्यते चैव नित्ययुक्तैः स्वकर्मभिः ३९ द्वापरस्य युगस्यांते आदौ कलियुगस्य च सात्वतं विधिमास्थाय गीतः संकर्षणेन यः ४० स एष सर्वं सुरमर्त्यलोकं समुद्रकक्षांत
रिताः पुरीश्च युगे युगे मानुषं चैव वासं पुनः पुनः सृजते विश्वकर्मा ४१ इति श्रीभीष्मपर्वणि ६८ दुर्योधन उवाच वासुदेवो महद्भूतं सर्वलोकेषु कथ्यते तस्यागमं प्रति
ष्ठां च ज्ञातुमिच्छे पितामह १ भीष्म उवाच वासुदेवो महद्भूतं सर्वदैवतदैवतं न परं पुंडरीकाक्षाद्दृश्यते भरतर्षभ २ मार्कंडेयश्च गोविंदं कथयत्यद्भुतं मह
त् सर्वभूतानि भूतात्मा महात्मा पुरुषोत्तमः आपो वायुश्च तेजश्च त्रयमेतदकल्पयत् पृथिवीं देवः सर्वलोकेश्वरः प्रभुः ॥ ॥ ॥ ॥
ससृ

४ अप्सुवैशायनंचक्रेमहात्मापुरुषोत्तमः सर्वतेजोमयोदेवोयोगात्सुष्वापतत्रह मुखतःसोग्निमसृजत्प्राणाद्वायुरथासृजत् सरस्वतींचवेदांश्चवासुदेवोमहामते ६ स
र्वलोकान्ससर्जादौदेवांश्चर्षिगणैःसह निधनंचैवमृत्युंश्चप्रजानांप्रभवोव्ययः ७ एषधर्मश्चधर्मात्मावरदःसर्वकामदः एषकर्त्ताचकार्यंचपूर्वदेवःस्वयंप्रभुः ८ भूतंभव्यंभ
विष्यंचपूर्वमेतदकल्पयत् उभेसंध्येदिशःखंचनियमंचजनार्दनः ९ ऋषींश्चैवचगोविंदस्तपश्चैवाकथकल्पयत् प्रजापतिश्चजगतोवरदःप्रभुरव्ययः १० अग्रजंसर्वभूता
नांसंकर्षणामकल्पयत् शेषंचाकल्पयद्देवमनंतमितियंविदुः ११ योधारयतिभूतानिधरांचेमांसपर्वतां ध्यानयोगेनविप्राश्चतंवदंतिमहौजसः कर्णस्रोतोभवंचापिमधुंनाम
महौजसं १२ तमुग्रमुग्रकर्माणमुग्रांबुद्धिंसमाश्रितं ब्रह्मणोपचितिंयात्तुंजघानपुरुषोत्तमः १३ तस्यतातवधाद्देवाऋषिदानवमानवाः मधुसूदनमित्याहुऋषयश्चजना
र्दनं १४ वराहश्चैवसिंहश्चत्रिविक्रमगतिःप्रभुः एषमातापिताचैवसर्वेषांप्राणिनांहरिः १५ परंहिपुंडरीकाक्षान्नभूतंनभविष्यति मुखतोजनयद्विप्रान्बाहुभ्यांक्षत्रियां
स्तथा १६ वैश्यांश्चाप्युरुतोराजंछूद्रान्पादात्तथैवच तपसानियतोदेवोविधानंसर्वदेहिनां १७ ब्रह्मभूतामावास्यांपौर्णमास्यांतथैवच योगभूतंपरिचरन् कृष्णो
यस्यप्रसीदेतलोकस्तेनाक्षयाजिताः यश्चैवैनंभयस्थानेकेशवंशरणंव्रजेत् ससानरःपठश्चेदंस्वस्तिमान्ससुखीभवेत् २१ येचकृष्णंप्रपद्यंतेतेनमुह्यंतिमानवाः
भयेमहतिमग्नांश्चत्रातिनित्यंजनार्दनः २२ एवंयुधिष्ठिरोज्ञात्वायथातथ्येन भारत सर्वात्मनामहात्मानंकेशवंजगदीश्वरं २३ प्रपन्नःशरणंराजन्योगाना
मीश्वरंप्रभुं २४ इतिभीष्मपर्वणि ६२ भीष्मउवाच शृणुचेदंमहाराजब्रह्मभूतस्तवंमम ब्रह्मर्षिभिश्चदेवैश्च ऽ ऽ ऽ ऽ ऽ ऽ ऽ

४X

स्था २ देव२

पःपुराकथितोमुनि १ साध्यानामपिदेवानांदेवदेवेश्वरप्रभुः लोकभावनभावज्ञइतित्वां नारदोब्रवीत् २ भूतंभव्यंभविष्यंचमार्कंडेयोभ्युवाचह यज्ञंत्वांचैवयज्ञानां
तपश्चतपसामपि ३ देवानामपिदेवंचत्वामाहभगवान्भृगुः पुराणंचैवपरमं विष्णोरूपंतवेतिच ४ वासुदेवोवसूनांत्वंशक्रं पयितातथा देवोसिदेवानामिति
द्वैपायनोब्रवीत् ५ पूर्वेप्रजापतेःसर्गे दक्षमाहुःप्रजापतिं स्रष्टारंसर्वभूतानामंगिरास्त्वांतथाब्रवीत् ६ अव्यक्तंतेशरीरंव्यक्तंतेमनसिस्थितं देवानांसंभवश्चेति
देवलस्त्वसितोब्रवीत् ७ शिरसातेदिवंव्याप्तंबाहुभ्यांपृथिवीधृता जठरंतेत्रयोलोकाःपुरुषोसिसनातनः ८ एवंत्वामभिजानंतितपसाभावितानराः आत्मदर्शनतृप्ता
नामृषीणामसिसत्तमः राजर्षीणामुदाराणामाहवेष्वनिवर्तिनां सर्वधर्मप्रधानानां त्वंगतिर्मधुसूदन १० इतिनित्यंयोगविद्भिर्भगवान्पुरुषोत्तमः सनत्कुमारप्रमुखैस्त्व
यतेभ्यर्च्यतेहरिः ११ एषतेविस्तरस्तात संक्षेपश्चप्रकीर्तितः केशवस्ययथातत्त्वंसुप्रीतोभवकेशवे १२ संजयउवाच पुण्यंश्रुत्वैतदाख्यानंमहाराजसुतस्तव केशवं
बहुमेनेसपांडवांश्चमहारथान् १३ तमब्रवीन्महाराजभीष्मःशांतनवःपुनः माहात्म्यंतेश्रुतंराजन्केशवस्यमहात्मनः १४ नरस्यचयथातत्त्वंयन्मांत्वंपरिपृच्छसि
यदर्थंनृषुसंभूतौनरनारायणावुभौ १५ अवध्यौचमहावीरौसर्वयुद्धेष्वपराजितौ यथाचपांडवाराजन्नवध्यायुधिकस्यचित् १६ प्रीतिमान्हिदृढंकृष्णःपांडवे
षुयशस्विषु तस्माद्ब्रवीमिराजेंद्रशमोभवतुपांडवैः १७ पृथिवींभुंक्ष्वराजेंद्रसहितोभ्रातृभिर्बली नरनारायणौदेवाववज्ञायविनंक्ष्यसि १८ एवमुक्त्वातवपिता
तूष्णीमासीद्विशांपते व्यसर्जयच्चराजानंशयनंचविवेशह १९ राजाचशिबिरंप्राप्यप्रणिपत्यमहात्मने शिश्येचशयनेशुभ्रेतांरात्रिंभरतर्षभ २० इतिभीष्मप
र्वणि संजयउवाच व्युषितायांचशर्वर्यामुदितेचदिवाकरे उभेसेनेमहाराजयुद्धायैवसमीयतुः १ अभ्यधावंश्चसंक्रुद्धाःपरस्परजिगीषवः तेसर्वेसहितायुद्धेसमा

॥लोकपरस्परं १॥

त्वं ५

पांडवाधार्तराष्ट्राश्चराजन्दुर्मंत्रितेतव यद्धौचक्रुस्तसन्नद्धाः संप्रहृष्टाः प्रहारिणः ३ अरक्षन्मकरव्यूहंभीष्मोराजन्समंततः तथैवपांडवाराजन्नरक्षन्व्यूहमात्मनः ४
सनिर्ययौमहाराजपितादेवव्रतस्तव महतारथवंशेनसंवृतोरथिनांवरः ५ इतरेतरमन्वयुःसर्वेयथास्थानमवस्थिताः रथिनःपत्तिनश्चैवदंतिनःसादिनस्तथा ६
तान्दृष्ट्वोद्यतान्संख्येपांडवाश्चयशस्विनः श्येनेनव्यूहराजेनतेनाजय्येनसंयुगे ७ अशोभतमुखेतस्यभीमसेनोमहाबलः नेत्रेशिखंडीदुर्द्धर्षोधृष्टद्युम्नश्चपार्ष
तः ८ शीर्षेतस्याभवद्वीरःसात्यकिःसत्यविक्रमः विधुन्वन्गांडीवंपार्थोग्रीवायामभवत्तदा ९ अक्षौहिण्यासमग्रायावामःपक्षोभवत्तदा महात्माद्रुपदःश्रीमा
न्सहपुत्रेणसंयुगे १० दक्षिणश्चाभवत्पक्षःकैकेयोक्षौहिणीपतिः ११ ततोद्रौपदेयाश्चसौभद्रश्चापिवीर्यवान् ११ पृष्ठेसमभवच्छ्रीमान्स्वयंराजायुधिष्ठिरः
भ्रातृभ्यांसहितोवीरोयमाभ्यांचारुविक्रमः १२ प्रविश्यतुरणेभीमोमकरंमुखतस्तदा भीष्ममासाद्यसंग्रामेछादयामाससायकैः १३ ततोभीष्मोमहास्त्राणि
पातयामासवीर्यवान् मोहयन्पांडुपुत्राणांव्यूहेसैन्यंमहाहवे १४ समुत्पातितरासैन्येत्वरमाणोधनंजयः भीष्मंशरसहस्रेणविव्याधरणमूर्द्धनि १५ पु
धिसंधायचास्त्राणिभीष्ममुक्तानिसंयुगे स्वेनानानीकेनहृष्टेनयुद्धायसमवस्थितः १६ ततोदुर्योधनोराजाभारद्वाजमभाषत पूर्वंदृष्ट्वावधंघोरंवलस्य
वलिनांवरः १७ भ्रातॄणांवधंसंख्येत्वरमाणोमहारथः आचार्यसततंत्वंहिहितकामोमयानघ १८ वयंहित्वांसमाश्रित्यभीष्मंचैवपितामहं देवानपि
रणेजेतुंप्रार्थयामोनसंशयः १९ किमुपांडुसुतान्युद्धेहीनवीर्यपराक्रमान् तत्तथाकुरुभद्रंतेयथावध्यंतिपांडवाः २० एवमुक्तस्ततोद्रोणस्तवपुत्रेण

७२ ॥संयुगे अभिनत्पांडवानीकंप्रेक्षमा॥

ब्रा

एम:

गाम्यसात्यकेः सात्यकिश्चततोद्रोणंवारयामासभारतः ततःप्रववृतेयुद्धंघोररूपंभयानकं २२ शैनेयंतुरणेक्रुद्धोभारद्वाजःप्रतापवान् अविध्यद्दशभि
र्बाणैर्जत्रुदेशेस्मयन्निव भीमसेनस्ततःक्रुद्धोभारद्वाजमविध्यत २३ सरक्षन्सात्यकिंराजन्द्रोणान्शस्त्रभृतांवरात् ततोद्रोणश्चभीष्मश्चतथाशल्यश्चमारिष
२४ भीमसेनंरणेक्रुद्धाश्छादयांचक्रिरेशरैः अथाभिमन्युःसंक्रुद्धोद्रौपदेयाश्चमारिष २५ विव्यधुर्निशितैर्बाणैःसर्वांस्तानुद्यतायुधान् भीष्मद्रोणौतुसंक्रु
द्धावापतंतौमहाबलौ २६ प्रत्युद्ययौशिखंडीचमहेष्वासोमहाहवे प्रगृह्यबलवद्वीरोधनुर्जलदनिःस्वनं २७ अभ्यवर्षच्छरैस्तूर्णंछादयानोदिवाकरं शि
खंडिनंतथासाद्यभरतानांपितामहः २८ अवर्जयतसंग्रामेस्त्रीत्वंतस्यानुसंस्मरन् ततोद्रोणोमहाराजअभ्यद्रवततंरणे २९ रक्षमाणस्ततोभीष्मंत
वपुत्रेणचोदितः शिखंडीतुसमासाद्यद्रोणंशस्त्रभृतांवरं ३० अवर्जयतसंत्रस्तोयुगांताग्निमिवोज्ज्वलं ततोबलेनमहतापुत्रस्तवविशांपते ३१
जुगोपभीष्ममासाद्यप्रार्थयानोमहद्यशः तथैवपांडवाराजन्पुरस्कृत्यधनंजयं ३२ भीष्ममेवाभ्यवर्तंतजयेकृत्वादृढांमतिं तद्युद्धमभवद्घोरंदेवा
नांदानवैरिव ३३ जयमाशंसतांसंख्येयशश्चपरमहाद्भुतं इतिभीष्मपर्वणि संजयउवाच अकरोत्तुमुलंयुद्धंभीष्मःशांतनवस्तदा १ भीम
सेनभयादिच्छन्पुत्रांस्तारयितुंतव पूर्वाह्णेतन्महारौद्रंराज्ञांयुद्धमवर्तत २ कुरूणांपांडवानांचमुख्यशूरविनाशने तस्मिन्नाकुलसंग्रामेवर्तमा
नेमहाभये ३ अभवत्तुमुलःशब्दःसंस्पृशन्गगनंमहान् नदद्भिश्चमहानागैर्हेषमाणैश्चवाजिभिः ४ भेरीशंखनिनादैश्चतुमुलंसमपद्यत युयुत्सव
स्तेविक्रांताविजयायमहाबलाः ५ अन्योन्यमभिगर्जंतोगोष्ठेष्विवमहर्षभाः शिरसांपात्यमानानांसमरेनिशितैःशरैः ६ अश्मवृष्टिरिवाकाशेबभूवभरतर्ष
भ कुंडलोष्णीषधारीणिजातरूपोज्ज्वलानिच ७ पतितानिस्मदृश्यंतेशिरांसिभरतर्षभ विशिखोन्मथितैर्गात्रैः शिरोभिश्चसकुंडलैः ८ सहस्ताभरणैश्चान्यैरभव
च्छादिता ॥

महीं कवचोपहितैर्गात्रैर्भुजैश्च समलंकृतैः ९ मुखैश्चन्द्रसंकाशैः शरकान्तनयनैस्तथा गजवाजिमनुष्याणां सर्वगात्रैश्च भूपते १० आसीत्सर्वो समाकीर्णा मुहूर्तेन वसुंधरा रजो
मेघैश्च तुमुलैः शस्त्रविद्युत्प्रकाशिभिः ११ आयुधानां च निर्घोषः स्तनयित्नुसमोऽभवत् स संप्रहारस्तुमुलः कटुकः शोणितोदकः प्रावर्तत कुरूणां च पांडवानां च भारत
तस्मिन्महाभये घोरे तुमुले लोमहर्षणे १३ ववर्षुः शरजालानि क्षत्रिया युद्धदुर्मदाः क्रोशन्ति कुंजरास्तत्र शरवर्षप्रतापिताः १४ तावकानां परेषां च संयुगे भरतोत्तम
संरब्धानां च वीराणां [illegible] वीराणाममिततेजसां १५ धनुर्ज्यातलघोषेण न प्राज्ञायत किंचन उत्थितेषु कबंधेषु सर्वतः शोणितोदके १६ अपरे पर्यधावन्त नृपा रि
पुवधोद्यताः शरशक्तिगदाभिश्च खड्गैश्चामिततेजसः १७ विजघ्नुः समरेऽन्योन्यं शूराः परिघबाहवः बभ्रमुः कुंजरास्तत्र शरैर्मुक्ता निरंकुशाः १८ अश्वाश्च पर्यधा
वन्त हतारोहा दिशो दिश उत्पत्य निपतन्त्यन्ये शरघातप्रपीडिताः १९ तावकानां परेषां च पर्यधावन् समुद्यताः शरशक्तिगदाभिश्च खड्गैश्च पतितैर्भुवि २०
गदानां परिघाणां च हस्तानां चोरुभिः सह पादानां भूषणानां च केयूराणां च सर्वशः २१ राशयस्तत्र दृश्यन्ते भीमभीष्मसमागमे अश्वानां धावमानानां कुंजरा
णां निवर्तता २२ संघाताः संप्रदृश्यन्ते तत्र तत्र विशांपते गदाभिरसिभिः प्रासैर्बाणैश्चानतपर्वभिः २३ जघ्नुः परस्परं तत्र क्षत्रियाः कालचोदिताः अपरे बा
हुभिर्वीरा नियुद्धकुशला युधि २४ बहुधा समसज्जन्त आयसैः परिघैरिव मुष्टिभिर्जानुभिश्चैव तलैः कीलैर्विशांपते २५ अन्योन्यं जघ्निरे वीरास्तावकाः
पांडवैः सह पतितैः पात्यमानैश्च विचेष्टद्भिश्च भूतले २६ घोरमायोधनं जज्ञे तत्र तत्र नरेश्वर विरथा रथिनश्चात्र निस्त्रिंशवरधारिणः २७ अन्योन्यमभ्यधाव
न्त परस्परवधैषिणः ततो दुर्योधनो राजा कलिंगैर्बहुभिर्वृतः २८ पुरस्कृत्य रणे भीष्मं पांडवानभ्यवर्तत तथैव पांडवाः सर्वे परिवार्य वृकोदरं २९ भीष्ममभ्यद्रवन्
क्रुद्धा रणे रभसवाहनाः इति भीष्मपर्वणि संजय उवाच दृष्ट्वा भीष्मेण संसक्तान् भ्रातॄनन्यांश्च पार्थिवान् समभ्यधावद्गां ॥ ॥ ॥ ॥ ॥

चित्रंच तेसहि

गेयमुपतास्त्रो धनंजयः १ पांचजन्यस्य निर्घोषं धनुषो गांडिवस्य च धजं च दृष्ट्वा पार्थस्य सर्वान्नो भयमाविशत् २ सिंहलांगूलमाकाशे ज्वलंतमिव पर्वतं अस
ज्जमानं वृक्षेषु धूमराशिमिवोच्छ्रितं ३ बहुवर्णं च चित्रं च दिव्यं वानरलक्षणं अपश्याम महाराज गांडीवधन्वनः ४ विद्युतं मेघमध्यस्थां भ्राजमानामिवांबरे ददृ शु
गांडिवं योधा रुकाष्टं महामृधे ५ आशुश्रुम स्वरं चास्य शक्रस्येवाभिगर्जतः सुघोरं तलयोः शब्दं निघ्नंतस्तव वाहिनीं ६ चंडवातो यथा मेघः सविद्युत्स्तनयित्नुमान्
दिशः संप्लावयामास शरवर्षैः समंततः ७ अभ्यधावद्गांगेयं भैरवास्त्रो धनंजयः दिशं प्राचीं प्रतीचीं च न जानीमो स्त्रमोहिताः ८ कांदिग्भूताः श्रांतपत्रा हताश्वा ह
तचेतसः अन्योन्यमभिसंश्लिष्य योधास्ते भरतर्षभ ९ भीष्ममेवाभिलीयंत सह सर्वैस्तवात्मजैः तेषामार्तायनमभूद्भीष्मः शांतनवो रणे १० समुत्पतंत वित्रस्ता रथे
भ्यो रथिनस्तथा सादिनश्चाश्वपृष्ठेभ्यो भूमेश्चापि पदातयः ११ श्रुत्वा गांडीवनिर्घोषं विस्फूर्जितमिवाशनेः सर्वसैन्यानि भीतानि व्यवलीयंत भारत १२ अथ कांबो
जजैरश्वैर्महद्भिः शीघ्रगामिभिः गोपानां बहुसाहस्रैर्बलैर्गोपायनैर्वृतः १३ मद्रसौवीरगांधारैस्त्रैगर्तैश्च विशांपते सर्वकालिंगमुख्यैश्च कालिंगाधिपतिः सह १४ नानानरगणौ
घेन दुःशासनपुरःसरः जयद्रथश्च नृपतिः सहितः सर्वराजभिः १५ हयारोहवराश्चैव तव पुत्रेण चोदिताः चतुर्दश सहस्राणि सौबलं पर्यवारयन् १६ ततस्ते सहिताः
सर्वे विभक्तरथवाहनाः पांडवाः समरे जघ्नुस्तावकान्भरतर्षभ १७ रथिभिर्वारणैरश्वैः पादातैश्च समीरितं घोरमायोधनं जज्ञे महाभ्रसदृशं रजः १८ तोमरप्रासनाराच
गजाश्वरथयोधिनां बलेन महता भीष्मः समसज्जत्किरीटिना १९ आवंत्यः काशिराजेन भीमसेनेन सैंधवः अजातशत्रुर्मद्राणामृषभेण यशस्विना सहपुत्रः सहामात्यः श
ल्येन समसज्जत विकर्णः सहदेवेन चित्रसेनः शिखंडिना मत्स्या दुर्योधनं जग्मुः शकुनिं च विशांपते २० द्रुपदश्चेकितानश्च सात्यकिश्च महारथः द्रोणेन समसज्जंत सपुत्रेण
महात्मना २१ कृपश्च कृतवर्मा च धृष्टद्युम्नमभिद्रुतौ एवं प्रव्र जितास्वानि ध्वांत नागरथानि च २२ समसज्जंत युद्धानि तत्र तत्र समंततः ꣽ ꣽ ꣽ ꣽ ꣽ ꣽ

नरगद

नगरी

निरस्त्रे विघत्तस्तीव्रा दिशश्च राजसत्तम २३ प्रादुरासन्महोल्काश्च सनिर्घाता विशांपते प्रादुर्वभौ महावातः पांसुवर्षं पपात च २४ नभ तरेधेस्तूर्यः सैन्येन रजसावृतः प्र
मोहः सर्वभूतानाम स्त्रजालैश्च पद्हतां २५ वीरवाहुविसृष्टानां सर्वावरणभेदिनां संह्रादः शरजालानामतीव समपद्यत २६ प्रकाशं चक्रुराकाशमुद्यतानि भुजोत्तमैः
न क्षत्रविमलाभानि शस्त्राणि भरतर्षभ २७ आर्षभाणि विचित्राणि रुक्मजालावृतानि च संपेतुर्दिक्षु सर्वासु चर्माणि भरतर्षभ २८ सूर्यवर्णैश्च निस्त्रिंशैः पात्यमाना
नि सर्वशः दिक्षु सर्वास्वपश्यन्त शरीराणि शिरांसि च भग्नचक्राक्षनीडाश्च निपातितमहाध्वजाः २८ हताश्वाः पृथिवीं जग्मुस्तत्र तत्र महारथाः परिपेतुर्हयाश्चात्र के
चित्तु स्वक्षतव्रणाः २९ रथान्विपरिवर्तन्ते हतेषु रथयोधिषु शरार्ता भिन्नदेहाश्च योक्त्राह्वयोत्तमाः ३० युगानि पर्यकर्षन्त तत्र तत्र हि भारत अदृश्यन्त सतांश्च साश्वाः
सारथयोधिनः ३१ एकेन वलिना राजन्वारणेन हता रणे गंधहस्तिमदस्रावमाघ्राय बहवो रणे सन्निपतते वलौघानां वातमाहरिरे गजाः सतोरणमहामात्रैः पत
द्भिश्च गतासुभिः ३३ वभूवायोधनं छन्नं नाराचाभिहतैर्गजैः संनिपाते वलौघानां चोदितैर्वरवारणैः ३४ निपेतुर्युधि संभग्नाः सयोधाः सर्वतो गजाः नागराजो
पमैर्हस्तैर्नागैराक्षिप्य संयुगे ३५ व्यदृश्यन्त महाराज संलग्नरथकूवराः विशीर्णा रथजालाश्च केशेष्वाक्षिप्य दंतिभिः ३६ द्रुमशाखा इवाविध्य निष्पिष्टा रथिनो
रणे रथेषु च रथान्युद्धे संसक्तान्वरवारणाः ३७ विकर्षन्तो दिशः सर्वाः संपेतुः सर्वशब्दगाः तेषां तथा कर्षतां च गजानां रूपमावभौ ३८ सरस्सु नलिनीजालं विषक्तमिव
कर्षतां एवं संछादितं तत्र वभूवायोधनं महत् ३९ सादिभिश्च पदातैश्च सध्वजैश्च महारथैः इति भीष्मपर्वणि संजय उवाच शिखंडी सह मत्स्येन विराटेन वि
शांपते १ भीष्ममाशु महेष्वासं मा ससाद सुदुर्जयं द्रोणं कृपं च कर्णं च महेष्वासान्महावलान् २ राज

वि

उलूकं शकुपुत्रः

श्व

श्वान्पाचरोअग्रात्वहूनाक्षेहन्नंजयः सैंधवंचमहेष्वासंसामात्यंसहबंधुभिः ३ प्राच्यांश्चदाक्षिणात्यांश्चभूमिपान्भूमिपर्षभ पुत्रंचतेमहेष्वासंदुर्योधनममर्षणं ४
दुःसहंचैवसमरेभीमसेनोन्यवर्तयत् सहदेवंचशकुनिमुलूकंचमहारथं ५ पितापुत्रौमहेष्वासावभ्यवर्ततंतद्रणे युधिष्ठिरोमहाराजगजानीकंमहारथः ६ समव
र्ततसंयंतामेपुत्रेणानिकृतस्तवमाद्रीपुत्रस्तुनकुलःशूरःसंक्रंदनोयुधि ७ त्रिगर्तानांरथोदारैःसमसज्जतपांडवाः अभ्यवर्ततदुर्धर्षाःसमरेशाल्वकेकयान् ८
सात्यकिश्चेकितानश्चसौभद्रश्चमहाबलः धृष्टकेतुश्चसमरेराक्षसश्चघटोत्कचः ९ पुत्राणांतेरथानीकंप्रत्युद्ययुरुदाहवे सेनापतिरमेयात्मा धृष्टद्युम्नोमहा
रथः १० द्रोणेनसमरेराजन्समियायेंद्रकर्मणा एवमेतेमहेष्वासास्तावकाःपांडवैःसह समेत्यसमरेशूराः संप्रहारंप्रचक्रिरे मध्यंदिनगतेसूर्येनभस्याकुल
तांगते ११ कुरवःपांडवेयाश्चनिजघ्नुरितरेतरं ध्वजिनोहेमचित्रांगाविचरंतोरणाजिरे १३ सपताकारथारेजुर्वैयाघ्रपरिवारणाः समेतानांचसमरेजिगीषू
णांपरस्परं १४ बभूवतुमुलःशब्दःसिंहानामिवगर्जतां तत्राद्भुतमपश्यामसंप्रहारंसुदारुणं १५ यदकुर्वन्रणेवीराःसृंजयाःकुरुभिःसहनैवखंनदिशोराजन्न
सूर्यंशत्रुतापनः १६ विदिशोवाप्यपश्यामशरैर्मुक्तैःसमंततः शक्तीनांविमलाग्राणांतोमराणांतथास्यतां १७ निस्त्रिंशानांचपीतानांनीलोत्पलनिभाः
प्रभाःकवचानांविचित्राणांभूषणानांप्रभास्तथा १८ खंदिशःप्रदिशश्चैवभासयामासुरोजसा वपुर्भिश्चनरेंद्राणांचंद्रसूर्यसमप्रभैः १९ विरराजतदा
राजंस्तत्रतत्ररणांगणं रथसिंहानरव्याघ्राःसमयातश्चसंयुगे २० विरेजुःसमरेराजन्ग्रहाइवनभस्तले भीष्मस्तुरथिनांश्रेष्ठोभीमसेनंमहाबलं
२१ अवारयतसंक्रुद्धःसर्वसैन्यस्यपश्यतः ततोभीष्मविनिर्मुक्ताःरुक्मपुंखाःशिलाशिताः २२ अभ्यघ्नन्समरेभीमंतैलधौताःसुतेजनाः तस्यशक्तिंम
॥हावेगांभीमसेनोमहाबलः २३ क्रुद्धाशीविषसंकाशांप्रे॥

भिव

२ हणांग

भी

पयामास भरत तामापतंतीं सहसा रुक्मदंडां दुरासदां २४ चिछेद समरे भीष्मः शरैः संनतपर्वभिः ततोपरेण भल्लेन पीतेन निशितेन च २५ कार्मुकं भीमसेनस्य द्वि
धा चिछेद भारत सात्यकिस्ततस्तूर्णं भीष्ममासाद्य संयुगे २६ शरैर्बहुभिरानर्छ मित्तरं तेजनेश्वर ततः संधाय वै तीक्ष्णं शरं परमदारुणं २७ वार्ष्णेयस्य रथाद्भी
ष्मस्यापातयामास सारथिं तस्याश्वाः प्रद्रुता राजन् निहिते रथसारथौ २८ तेन तेनैव धावंति मनोमारुतरंहसः ततः सैन्यस्य सर्वस्य निस्वनस्तुमुलो भवत् २९
हाहाकारश्च संजज्ञे पांडवानां महात्मनां अभिद्रवत गृह्णीत हयान्यच्छत धावत ३० इत्यासीत्तुमुलः शब्दो युयुधानरथं प्रति एतस्मिन्नेव काले तु भीष्मः शांत
नवस्तदा ३१ अवधीत्पांडवीं सेनामासुरीमिव वृत्रहा ते वध्यमाना भीष्मेण पांचालाः सोमकैः सह ३२ आर्यां युद्धे मतिं कृत्वा भीष्ममेवाभिदुद्रुवुः धृष्टद्युम्नमु
खाश्चापि पार्थाः शांतनवं रणे ३३ अभ्यधावञ्जिघांसंतस्तव पुत्रस्य वाहिनीं तथैव तावका राजन्भीष्मद्रोणमुखाः परान् ३४ अभ्यधावंत वेगेन ततो युद्धमवर्त
त इति भीष्मपर्वणि संजय उवाच विराटोथ त्रिभिर्बाणैर्भीष्ममार्छन्महारथः विव्याध तुरगांश्चास्य त्रिभिर्बाणैर्महारथः १ तं प्रत्यविध्यद्दशभिर्भीष्मः
शांतनवः शरैः रुक्मपुंखैर्महेष्वासः कृतहस्तो महाबलः २ द्रौणिर्गांडीवधन्वानं भीमधन्वा महारथः अविध्यदिषुभिः षड्भिर्दृढहस्तः स्तनांतरे ३ कार्मु
कं तस्य चिछेद फाल्गुनः परवीरहा अविध्यच्च भृशं तीक्ष्णैः पत्रिभिः शत्रुकर्शनः ४ सोन्यत्कार्मुकमादाय वेगवत्क्रोधमूर्छितः अमृष्यमाणः
पार्थेन कार्मुकच्छेदमाहवे ५ अविध्यत्फाल्गुनं राजन्नवत्या निशितैः शरैः वासुदेवं च सप्तत्या विव्याध परमेषुभिः ६ ततः क्रोधाभिताम्राक्षः सह कृष्णेन फाल्गु
नः दीर्घमुष्णं च निःश्वस्य चिंतयित्वा मुहुर्मुहुः ७ धनुः संपीड्य वामेन करेणामित्रकर्शनः गांडीवधन्वा संक्रुद्धः शितान्संनतपर्वणः ८ जीवितांतकरान्घो
रान्समादत्त शिलीमुखान् तैस्तूर्णं समरे विव्याध द्रौणिं बलवतां वरः ९ तस्य ते कवचं भित्वा ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ ऽऽऽ

सु२

मी०
२४६

पत्युः शोणितमाहवे नविव्यथे विनिर्भिन्नो द्रोणिर्गांडीवधन्वना १० तथैव च शरान्पार्थे प्रतिमुंचन्नविह्वलः तस्थौ स समरे राजंस्त्रातुमिच्छन्महाव्रतं ११ तस्य तत्सुम
हत्कर्म शशंसुः कुरुसत्तमाः यत्कृष्णाभ्यां समेताभ्यामभ्यापतत संयुगे १२ स हि नित्यमनीकेषु युध्यतेभयमास्थितः अस्त्रग्रामं ससंहारं द्रोणात्प्राप्य सुदुर्लभं १३
ममाचार्यसुतोत्यंतं द्रोणस्यातिप्रियः सुतः ब्राह्मणश्च विशेषेण माननीयो ममेतिच १४ समास्थाय मतिं वीरो बीभत्सुः शत्रुतापनः कृपां चक्रे रथश्रेष्ठो भारद्वाज
सुतं प्रति १५ द्रौणिं त्यक्त्वा ततो युद्धे कौंतेयः श्वेतवाहनः युयुधे तावकान्निघ्नंस्त्वरमाणः पराक्रमी १६ दुर्योधनस्तु दशभिर्गार्ध्रपत्रैः शिलाशितैः भीमसेनं म
हेष्वासं रुक्मपुंखैः समर्पयत् १७ भीमसेनस्तु संक्रुद्धः परासुकरणं दृढं चित्रं कार्मुकमादत्त शरांश्च निशितान्दश १८ आकर्णप्रहितैस्तीक्ष्णैर्वेगितैस्तिग्म
तेजितैः अविध्यत्तूर्णमव्यग्रः कुरुराजं महोरसि १९ तस्य कांचन सूत्रस्तु शरैः परिवृतो मणिः रराजोरसि वै सूर्यो ग्रहैरिव समावृतः २० पुत्रस्तु त
व तेजस्वी भीमसेनेन ताडितः नामृष्यत यथा नागस्तलशब्दं समीरितं २१ ततः शरैर्महाराज रुक्मपुंखैः शिलाशितैः भीमं विव्याध संक्रुद्धस्त्रासयानो वरू
थिनीं २२ तौ युध्यमानौ समरे भृशमन्योन्यविक्षतौ पुत्रौ ते देवसंकाशौ व्यरोचेतां महाबलौ २३ चित्रसेनं नरव्याघ्रः सौभद्रः परवीरहा अविध्यन्निशि
तैर्बाणैः पुरुमित्रं च सप्तभिः २४ सत्यव्रतं च सप्तत्या विद्ध्वा शक्रसमो युधि नृत्यन्निव रणे वीर आर्तिं नः समजीजनत् २५ तं प्रत्यविध्यद्दशभिश्चित्रसेनः
शिलीमुखैः सत्यव्रतश्च नवभिः पुरुमित्रश्च सप्तभिः २६ स विद्धो विक्षरन्रक्तं शत्रुसंवारणं महत् चिच्छेद चित्रसेनस्य चित्रं कार्मुकमार्जुनिः २७ भित्वा
चास्य तनुत्राणं शरेणोरस्यताडयत् ततस्ते तावका वीरा राजपुत्रा महारथाः २८ समेत्य युधि संरब्धा विव्यधुर्निशितैस्तदा तांश्च सर्वाञ्छरैस्तीक्ष्णै
र्जघान परमास्त्रवित् २९ तस्य दृष्ट्वा तु तत्कर्म परिवव्रुः सुतास्तव दहंतं समरे योधान्वने कक्षं यथोल्बणं ३० अथेत शिशिरकाले समिद्धमिव पावकं

॥श्रम्पः॥ १२५१

गम०
२४६

रोचत्ततसौभद्रस्तवसैन्यानिशातयत् ३१ तत्तस्यचरितंदृष्ट्वापौत्रस्तवविशांपते लक्ष्मणोभ्यपतत्तूर्णं सात्वतीपुत्रमाहवे ३२ अभिमन्युस्ततःसंक्रुद्धोलक्ष्मणंशुभल
क्षणं विव्याधविशिखैःषड्भिःसारथिंचत्रिभिःशरैः ३३ तथैवलक्ष्मणोराजन्सौभद्रंनिशितैःशरैः अविध्यत्तमहाराजतदद्भुतमिवाभवत् ३४ तस्याश्वांश्चतुरोहत्वासारथिंच
चमहारथः अभ्यद्रवत्तसौभद्रोलक्ष्मणंनिशितैःशरैः ३५ हताश्वेतुरथेतिष्ठन्लक्ष्मणःपरवीरहा शक्तिंचिक्षेपसंक्रुद्धःसौभद्रस्यरथंप्रति ३६ तामापतंतींसहसाघो
ररूपांभुजंगमां अभिमन्युःशरैस्तीक्ष्णैश्चिच्छेदभुजगोपमां ३७ ततःस्वरथमारोप्यलक्ष्मणंगौतमस्तदा अपोवाहरथेनाजौसर्वसैन्यस्यपश्यतः ३८ ततःसमाकु
लेतस्मिन्वर्तमानेमहाभये अभ्यद्रवन्जिघांसंतःपरस्परवधैषिणः ३९ तावकाश्चमहेष्वासाःपांडवाश्चमहारथाः जुह्वंतःसमरेप्राणान्निजघ्नुरितरेतरं ४० मुक्त
केशाविकवचाविरथाश्छिन्नकार्मुकाः बाहुभिःसमयुध्यंतसृंजयाःकुरुभिःसह ४१ ततोभीष्मोमहाबाहुःपांडवानांमहात्मनां सेनांजघानसंक्रुद्धोदिव्यैरस्त्रै
र्महाबलः ४२ हतेश्वरैर्गजैस्तत्रनरैरश्वैश्चपातितैः रथिभिःसादिभिश्चैवसमास्तीर्यतमेदिनी ४३ इतिभीष्मपर्वणि ॥ ॥ संजयउवाच अथराजन्महा
बाहुःसात्यकिर्युद्धदुर्मदः विकृष्यसमरेचापंभारसाधनमुत्तमं १ प्रामुंचत्पुंखसंयुक्तांछरानाशीविषोपमान् प्रगाढंलघुचित्रंचदर्शयन्हस्तलाघवं २ तस्य
विक्षिपतश्चापंशरानन्यांश्चमुंचतः आददानस्यभूयश्चसंदधानस्यचापरान् ३ क्षिपतश्चपरांस्तस्यरणेशत्रून्विनिघ्नतः ददृशेरूपमत्यर्थंमेघस्येववर्षतः ४ त
तमुदीर्यंतमालोक्यराजादुर्योधनस्तदा रथानामयुतंतस्यप्रेषयामासभारत ५ तांस्तुसर्वान्महेष्वासान्सात्यकिःसत्यविक्रमः जघानपरमेष्वासोदिव्येनास्त्रेणवी
॥र्यवान् ६ सकृत्वादारुणंकर्मप्रगृहीतशरासनः र्भसमा ॥

दृष्ट्वा तो वीरो भूरिश्रवसमाहवे ७ सहि संदृश्य सैन्यानां युयुधानेन पीडितां अभ्यधावत संक्रुद्धः कुरूणां कीर्तिवर्द्धनः ८ इंद्रायुधसवर्णं तु स विस्फार्य महद्ध
नुः व्यसृजन्वज्रसंकाशांछरानाशीविषोपमान् ९ सहस्रशो महाराज शैनेयस्य पाणिलाघवं शरांस्तान्मृत्युसंस्पर्शान्सात्यकेस्तु पदानुगाः १० नवि
षेहुस्तदा राजन्स्तु द्रुवुस्ते समंततः विहाय समरे राजन्सात्यकिं युद्धदुर्मदं ११ तं दृष्ट्वा युयुधानस्य सुता दश महाबलाः महारथाः समाख्याताश्चित्रवर्मायु
धध्वजाः १२ समासाद्य महेष्वासं भूरिश्रवसमाहवे ऊचुः सर्वे सुसंरब्धा यूपकेतुं महाहवे १३ भोभोः कौरवदायाद सहास्माभिर्महाबल सहियुध्यस्व संग्रा
मे सहितैः पृथगेव वा १४ अस्मान्वा त्वं पराजित्य यशः प्राप्नुहि संयुगे वयं त्वां वा पराजित्य प्रीतिं दास्यामहे पितुः १५ एवमुक्तस्तदा शूरैस्तानुवाच महाब
लः वीर्यश्लाघी नरश्रेष्ठस्तान्दृष्ट्वा समवस्थितान् १६ साधिदं कथ्यते वीरा यद्येवं मतिरद्य वः युध्यध्वं सहिता यत्ता निहनिष्यामि वो रणे १७ एवमुक्ता
महेष्वासास्ते वीराः क्षिप्रकारिणः महता शरवर्षेण अभ्यवर्षन्नरिंदमाः १८ अपराह्णे महाराज संग्रामस्तुमुलोभवत् एकस्य च बहूनां च समेतानां
रणाजिरे १९ तमेकं रथिनां श्रेष्ठं शरवर्षैः समवाकिरन् प्रावृषीव यथा मेघं सिषिचुर्जलदा नृप २० तैस्तु मुक्तांछरौघांस्तान्यमदंडाशनिप्रभान् अ
संप्राप्तानसंभ्रांतश्चिच्छेदाशु महारथः २१ तत्राद्भुतमपश्याम सौमदत्तेः पराक्रमं यदेको बहुभिर्युद्धे समसज्जदभीतवत् २२ विसृज्य शरवृष्टिं तां दश
राजन्महारथाः परिवार्य महात्मानं निहंतुमुपचक्रमुः २३ सौमदत्तिस्ततः क्रुद्धस्तेषां चापानि भारत चिच्छेद दशभिर्वीरो निमेषे ॥ ॥ ॥

रामहारथः २४ अथैषांछिन्नधनुषांभल्लैः सन्नतपर्वभिः चिच्छेदसमरेराजंछिरांसिभरतर्षभ २५ तेहतान्यपतन्भूमौवज्रभग्नाइवद्रुमाः तान्दृष्ट्वानि हता न्वीरान्रणेपुत्रान्महाबलान् २६ वार्ष्णेयोविनदन्राजन्भूरिश्रवसमभ्ययात् रथंरथेनसमरेपीडयित्वाबलौ २७ तावन्योन्यस्यसमरेनिहत्यरथिवाजिनः विरथावभिवल्गंतौसमेयातांमहारथौ २८ प्रगृहीतमहाखड्गौतौचर्मवरधारिणौ शुशुभातेनरव्याघ्रौयुद्धायसमवस्थितौ २९ ततःसात्यकिमभ्येत्यनिस्त्रिंशवरधारिणं भीमसेनस्तदाराजन्रथमारोपयत्तदा ३० तवापितनयोराजन्भूरिश्रवसमाहवे आरोपयद्रथंतूर्णंपश्यतांसर्वधन्विनां ३१ तस्मिंस्तथावर्तमानेरणेभीष्मंमहारथं अयोधयंतसंरब्धाः पांडवाभरतर्षभ ३२ लोहितायतिचादित्येत्वरमाणोधनंजयः पंचविंशतिसाहस्रान्निजघानमहारथान् ३३ तेहिदुर्योधनादिष्टास्तदापार्थनिबर्हणे अप्राप्यैवगतानाशंशलभाइवपावके ३३ ततोमत्स्याः केकयाश्चधनुर्वेदविशारदाः परिवव्रुरणेपार्थंसहपुत्रंमहारथं ३५ जगामास्तमथादित्योसर्वेमिदोः समुत्थितैः सर्वेषामेवसैन्यानांप्रमोहः समपद्यत ३६ अवहारंततश्चक्रेपितादेवव्रतस्तव संध्याकालेमहाराजसैन्यानांश्रांतवाहनः ३७ पांडवानांकुरूणांचपरस्परसमागमे तेसेने भृशसंविग्नेययतुःस्वंनिवेशनं ३८ ततःस्वशिबिरंगत्वान्यविशंस्तत्रभारत पांडवाःसृंजयैःसार्द्धंकुरवश्चयथाविधि ३९ इतिभीष्मपर्वणिपंचमदिवसयुद्धसमाप्तं ॥ ॥संजयउ० विहृत्यतेततोराजन्सहिताःकुरुपांडवाः व्यतीतायांतुशर्वर्यांपुनर्युद्धायनिर्ययुः १ ततःशब्दोमहानासीत्तवतेषांचभारत युज्यतांरथमुख्यानांक ल्प्यतांचापिदंतिनां २ सन्नह्यतांपदातीनांहयानां ॥ ॥

न१

नांचैवभारत शंखदुंदुभिनिर्घोषास्तुमुलाः सर्वतोभवन् ३ ततोयुधिष्ठिरोराजाधृष्टद्युम्नमभाषत व्यूहंव्यूहमहाबाहोमकरंशत्रुतापनं ४ एवमुक्तस्तुपार्थेन धृष्टद्युम्नोमहारथः व्यदिशद्भीमसेनंवैशिरःसंप्रतिभारत वृषभंत्वेवं ...
धृष्टद्युम्नोमहारथाः तुंडमासीन्महाराजभीमसेनोमहाबलः ५ सौभद्रोद्रौपदेयाश्चराक्षसश्चघटोत्कचः सात्यकिर्धर्मराजश्चव्यूहग्रीवांसमास्थिताः ६ पृष्ठमा
सीन्महाराजविराटोवाहिनीपतिः धृष्टद्युम्नेनसहितोमहत्यासेनयावृतः ७ कैकेयाभ्रातरःपंचवामंपक्षंसमाश्रिताः धृष्टकेतुर्नरव्याघ्रश्चेकितानश्चवीर्य
वान् ८ दक्षिणंपक्षमाश्रित्यस्थितान्व्यूहस्यरक्षिणो पादयोस्तुमहाराजस्थितःश्रीमान्महारथं ९ कुंतिभोजःशतानीकोमहत्यासेनयावृतः शिखंडीतुम
हेष्वासःसोमकैःसंवृतोबली १० इरावांश्चनृपः पुच्छेमकरस्यव्यवस्थितौ एवमेतंमहाव्यूहंव्यूह्यभारतपांडवाः ११ सूर्योदयेमहाराजपुनर्युद्धायदंशिताः कौ
रवानभ्ययुस्तूर्णंहस्त्यश्वरथपत्तिभिः १२ समुच्छ्रितैर्ध्वजच्छत्रैः शस्त्रैश्चविमलैःशितैः व्यूहंदृष्ट्वातुतत्सैन्यंपितादेवव्रतस्तव १३ क्रौंचेनमहताराजन्प्रत्यव्यूहत
वाहिनीं तस्यतुंडेमहेष्वासोभारद्वाजोभ्यवर्तत १४ अश्वत्थामाकृपश्चैवचक्षुरास्तांनरेश्वर कृतवर्मातुसहितःकांबोजवरवाह्लिकैः १५ शिरस्यासीन्नर
श्रेष्ठश्रेष्ठःसर्वधनुष्मतां ग्रीवायांशूरसेनस्तुतवपुत्रश्चभारत १६ दुर्योधनोमहाराजराजभिर्बहुभिर्वृतः प्राग्ज्योतिषस्तुसहितोमद्रसौवीरकेकयैः १७
उरस्यभून्नरश्रेष्ठमहत्यासेनयावृतः स्वसेनयाचसहितःसुशर्माप्रस्थलाधिपः १८ वामंपक्षंसमाश्रित्यदंशितःसमवस्थितः तुषारायवनाश्चैवशकैश्चसह
चूलिकैः १९ दक्षिणंपक्षमाश्रित्यस्थिताव्यूहस्यभारतः श्रुतायुश्चशतायुश्चसोमदत्तिर्मारिष २० व्यूहस्यजघनेतस्थूरक्षमाणाःपरस्परं ततोयुद्धायसंज
ग्मुःपांडवाःकौरवैःसह २१ सूर्योदयेमहाराजततोयुद्धमवर्त्तत प्रतीयूरथिनोनागानागाश्चरथिनोययुः २२ हयारोहाहयारोहान्नाथि॥ ॥ ॥

नश्चापि सादिनः सादिनश्च रथान्राजन्कुंजरांश्च महारणे २३ हस्त्यारोहान्रथा राजन्रथिनश्चापि सादिनः रथिनः पत्तिभिः सार्द्धं सादिन
श्चापि पत्तिभिः २४ अन्योन्यं समरे राजन्प्रत्यधावन्नमर्षिताः भीमसेनार्जुनयमैर्गुप्ता चान्यैर्महारथैः २५ शोभते पांडवी सेना नक्षत्रै
रिव शर्वरी तथा भीष्मकृपद्रोणशल्यदुर्योधनादिभिः २६ तवापि विबभौ सेना ग्रहैर्द्यौरिव संवृता भीमसेनस्तु कौंतेयो द्रोणं दृष्ट्वा पराक्रमी
२७ अभ्याया जवनैरश्वैर्भारद्राजस्य वाहिनीं द्रोणस्तु समरे क्रुद्धो भीमं नवभिरायसैः २८ विव्याध समरे राजन्मर्माण्युद्दिश्य वीर्यवा
न् दृढहस्तस्ततो भीमो भारद्वाजेन संयुगे २९ सारथिं प्रेषयामास यमस्य सदनं प्रति संगृह्य च स्वयं वाहान्भारद्वाजः प्रतापवान् ३० व्यधम
त्पांडवीं सेनां तूलराशिमिवानलः ते वध्यमाना द्रोणेन भीष्मेण च नरोत्तम ३१ सृंजयाः केकयैः सार्द्धं पलायनपराभवन् तथैव तावकं सैन्यं भी
मार्जुनपरिक्षतं ३२ मुह्यते तत्र तत्रैव समदेव वरांगना अभिद्येतां ततो व्यूहौ तस्मिन्वीरवरक्षये ३३ आसीद्व्यतिकरो घोरस्तव तेषां च भा
रत तदद्भुतमपश्याम तावकानां परैः सह ३४ एकायनगताः सर्वे यद्युध्यंत भारत प्रतिसंवार्य चास्त्राणि तेऽन्योन्यस्य विशांपते ३५
युयुधुः पांडवाश्चैव कौरवाश्च महामृधे इति भीष्मपर्वणि धृतराष्ट्र उ० एवं बहुगुणं सैन्यमेवं बहुविधं परं एवमेतद्यथाशास्त्रममोघं चै
व संजय १ पुष्टमस्माकमत्यंतमभिकामं च नः सदा प्रह्वमव्यसनोपेतं पुरस्ताद्दृष्टविक्रमं २ नातिवृद्धमबालं च न कृशं न च पीवरं
लघुवृत्तायतप्रायं सारगात्रमनामयं ३ आत्तसन्नाहशस्त्रं च बहुशस्त्रपरिग्रहं असियुद्धे नियुद्धे च गदायुद्धे च कोविदं ४ प्रास
र्ष्टितोमरेष्वाजौ मरे परिघेष्वायसेषु च भिंडिपालेषु शक्तिषु मुसलेषु च सर्वशः ५ कंपनेषु च चापेषु कणपेषु च सर्वशः क्षेपणीषु च चित्रेषु
मुष्टियुद्धेषु कृत्स्नशः ६ अपरोक्षं च विद्यासु व्यायामे सुकृतश्रमं शस्त्रग्रहणविद्यासु सर्वासु परिनिष्ठितं ७ आरो ७ ॥ ७ ॥

५८

५१ स४

भी० २५९

हेपर्थे स्कंदेसराणोसांतरस्तुते सम्यक्प्रहरणेयानेव्यपयानेचकोविदं ८ नागाश्वरथयानेषुबहुशः सुपरीक्षितं परीक्ष्यचयथान्यायंवेत
नेनोपपादितं ९ नगोष्ठ्यानोपकारेणनसंबंधनिमित्ततः नसौहृदबलेनापिनकुलीन[illegible]परिग्रहैः १० समृद्धजनमार्यंचतुष्टसत्कृतबांधवं कृ
तोपकारभूयिष्ठंयशस्विचमनस्विच ११ सजवैश्चनरैर्मुख्यैर्बहुशोमुख्यकर्मभिः लोकपालो[illegible]पमैस्तातपालितंलोकविश्रुतैः १२ बहुभि
क्षत्रियैर्गुप्तंपृथिव्यांलोकसंमतैः अस्मानभिगतैःकामात्सबलैःसपदानुगैः १३ महोदधिमिवापूर्णमापगाभिःसमंततः अपक्षैःपक्षि
संकाशैरथैर्नागैश्चसंवृतं १४ नानायोध[illegible]जनैर्भीमंवाहनोर्मितरंगिणं क्षेपण्यसिगदाशक्तिशरप्रासैःसमाकुलं १५ ध्वजभूषणसं
बाधंरत्नपट्टैःसुसंचितं वाहनैःपरिधावद्भिर्वायुवेगविकंपितं १६ अपारमिवगर्जंतंसागरप्रतिमंमहत् द्रोणभीष्माभिसंगुप्तंगुप्तंचकृतवर्म
णा १७ कृप[illegible]दुःशासनाभ्यांचजयद्रथमुखैस्तथा भगदत्तविकर्णाभ्यांद्रौणिसौबलबाह्लिकैः १८ गुप्तंप्रवीरैर्लोकस्यसारवद्भि
र्महात्मभिः यदहन्यतसंग्रामेदिष्टमत्रपुरातनं १९ नैतादृशंसमुद्योगंदृष्टवंतोथमानुषाः ऋषयोवामहाभागाःपुराणाभुविसंजय २०
ईदृशोपिबलौघस्तुक्षात्रशस्त्रार्थसंपदा वध्यतेयत्रसंग्रामेकिमन्यद्भागधेयतः २१ विपरीतमिदंसर्वंप्रतिभातिस्मसंजय यत्रेदृशंबल
घोरंनाततार्युधिष्ठिरपांडवान् २२ अथवापांडवार्थायदेवास्तत्र[illegible]मागताःयुध्यतेमामकंसैन्यंयच्चावध्य
तिसंजय २३ उक्तोहिविदुरेणेहहितंपथ्यंचनित्यशः नचगृह्णातितन्मंदःपुत्रोदुर्योधनोमम २४ तस्यमन्येमतिःपूर्वंसर्वज्ञस्यमहात्मनः
आसीद्यथागतंतातयेनदृष्टमिदंपुरा २५ अथवाभाव्यमेवंहिसंजयैतेनसर्वथा पुराधात्रायथासृष्टंतथानतदन्यथा २६ इतिभीष्म
पर्वणि संजयउ० आत्मदोषात्त्वयाराजन्प्राप्तंव्यसनमीदृशं नहिदुर्योधनस्तानिपश्यतेभरतर्षभ १ यानित्वंदृष्टवान्राजन्धर्मसंकर
कानिते तवदोषा ॥ ॥

भीष्म० २५९

या१

त्पुराव्रत्तंघूतमेतद्विशांपते तवदोषेणापुर्वंचप्रवृत्तंसहपांडवैः त्वमेवाद्यफलंभुंक्ष्वकृत्वाकिल्विषमात्मनः ३ आत्मनैवकृतंकर्मआत्मनैवोपभुज्य
ते ३६ वाप्रत्यकाराजंत्वयाप्राप्तंयथातथं ४ तस्माद्राजन्स्थिरोभूत्वाप्राप्येदंव्यसनंमहत् शृणुयुद्धंयथावत्त्वंशंसतोममभारत ५ भीमसेनःसुनि
शितैर्वाणैर्भित्वामहाचमूं आससारततोवीरःसर्वान्दुर्योधनानुजान् ६ दुःशासनंदुर्विषहंदुर्मर्षंदुःसहंदुर्मदंजयं जयसेनंविकर्णंचचित्रसेनंसुदर्श
नं ७ चारुचित्रंसुवर्माणंदुःकर्णंकर्णमेवच एतानन्यांश्चसुबहून्समीपस्थान्महारथान् ८ धार्तराष्ट्रान्सुसंक्रुद्धान्दृष्ट्वाभीमोमहाबलः भीष्मेण
समरेगुप्तांप्रविवेशमहाचमूं ९ अथाह्वोकाप्रविष्टंतमस्तुत्तेसर्वएवहि १० जीवग्राहंनिगृह्णीमोवधमेनंनराधिपाः सतैःपरिवृतःपार्थोभ्रातृभिःकृ
तनिश्चयैः ११ प्रजासंहरणेसूर्यःक्रूरैरिवमहाग्रहैः संप्राप्यमध्यंव्यूहस्यनभीःपांडवमाविशत् १२ यथादेवासुरेयुद्धेमहेंद्रःप्राप्यदानवान् ततः
शतसहस्राणिरथिनांसर्वशस्त्रिणां १३ उद्यतानिशरैर्घोरैस्तमभ्यवर्षिरे सतेषांप्रवरान्योधान्हस्त्यश्वरथसादिनः १४ जघानसमरेशूरोधार्तराष्ट्रा
नचिंतयत् तेषांव्यवसितंज्ञात्वाभीमसेनोजिघृक्षतां १५ समस्तानांवधेराजन्मतिंचक्रेमहाबलः ततोरथंसमुत्सृज्यगदामादायपांडवः १६ जघा
नधार्तराष्ट्राणांतंबलौघमहार्णवं भीमसेनेप्रविष्टेतुधृष्टद्युम्नोपिपार्षतः १७ द्रोणमुत्सृज्यतरसाप्रययौयत्रसौबलः निवार्यमहतींसेनांता
वकानांनरर्षभ १८ आससादरथंतूर्णंभीमसेनस्यसंयुगे दृष्ट्वाविशोकंसमरेभीमसेनस्यसारथिं १९ धृष्टद्युम्नोमहाराजदुर्मनागत
चेतनः आपृच्छद्बाष्पसंरुद्धोनिश्वसन्वाचमीरयन् २० ममप्राणैःप्राणैःप्रीयतमःक्वभीमइतिदुःखितः विशोकस्तमुवाचेदंधृष्टद्युम्नंकृतांजलिः
२१ संस्थाप्यमामिहबलीपांडवःसुमहाबलः प्रविष्टोधार्तराष्ट्राणामेतद्बलमहार्णवं २२ मामुक्त्वापुरुषव्याघ्रप्रीतियुक्तमिदंवचः प्रतिपा
लयमांसूतनियम्याश्वान्मुहूर्तकं यावदेतान्निहन्म्याशुयएमेमद्वधोद्यताः ततोदृष्ट्वागदाहस्तंप्रधावंतमहाबलं २४ सर्वेषामेवसैन्यानांसंहर्षःसमजाय

मध्ये २

त तस्मिन्सुतुमुले युद्धे वर्तमाने महाभये २५ मित्राणि जन्महारहं प्रविवेशासु त्वान्तव विशोकस्य वचः श्रुत्वा धृष्टद्युम्नोपि पार्षतः २६ प्रत्युवाच त
तः सुतं रणे महाबलः न हि मे जीवितेनापि विद्यते ऽद्य प्रयोजनं २७ भीमसेनं रणे हित्वा स्नेहमुत्सृज्य पांडवैः यदि यामि विना भीमं किं मां क्षत्रं वदिष्यति २८
एकायनगते भीमे मयि चावस्थिते युधि अस्वस्ति तस्य कुर्वंति देवाः शक्रपुरोगमाः २९ यः सहायान्परित्यज्य स्वस्तिमानाव्रजेद्गृहान् सम मे भीमः
सखा चैव संबंधी च महाबलः ३० भक्तो मे भक्तिमांश्चाहं तमप्यरिनिसूदनं सोहं तत्र गमिष्यामि यत्र यातो वृकोदरः ३१ निघ्नंतं मां रिपून्पश्य दानवा
निव वासवं एवमुक्त्वा ततो वीरो ययौ मध्येन भारत ३२ भीमसेनस्य मार्गेषु गदाप्रमथितैर्गजैः स ददर्श तदा भीमं दहंतं रिपुवाहिनीं ३३ वा
तो वृक्षानिव वहन् सभंजंतं रणे नृपान् ते हन्यमानाः समरे रथिनः सादिनस्तथा ३४ पादाता दंतिनश्चैव चक्रुरार्तस्वरं महत् हाहाकारश्च संज
ज्ञे तव सैन्यस्य मारिष ३५ वध्यतां भीमसेनेन कृतिना चित्रयोधिना ततः कृतास्त्रास्ते सर्वे परिवार्य वृकोदरं ३६ अभीताः समवर्तंत शस्त्र
वृष्टिं समंततः अभिद्रुतं शस्त्रभृतां वरिष्ठं समंततः पांडवं लोकवीरैः सैन्येन घोरेण सुसंहतेन दृष्ट्वा बली पार्षतो भीमसेनं ३७ अथोप[illegible]गाच्छरविक्ष
तांगं पदातिनं क्रोधविषं वमंतं आश्वासयन्पार्षतो भीमसेनं गदाहस्तं कालमिवांतकाले ३८ निःशल्यमेनं च चकार तूर्णमारोपयच्चात्मरथं महात्
त्मा भृशं परिष्वज्य च भीमसेनमाश्वासयामास च शत्रुमध्ये ३९ भ्रातॄनथोपेत्य तवापि पुत्रस्तस्मिन्विमर्दे सहसाभ्युवाच अयं दुरात्मा द्रुपदस्य पु
त्रः समागतो भीमसेनेन सार्द्धं ४० तं यात सर्वे सहिता निहंतुं मा वो रिपुः प्रार्थयतामनीकं श्रुत्वा तु वाक्यं तममृष्यमाणा ज्येष्ठाज्ञया चोदिता धार्तराष्ट्राः
४१ वधाय निष्पेतुरुदायुधास्ते युगक्षये केतवो यद्वदुग्राः प्रगृह्य चित्राणि धनूंषि वीरा ज्यानेमिघोषैः प्रविकंपयंतः ४२ शरैरवर्षन्द्रुपदस्य पुत्रं यथां
बुदा भूधरं वारिजालैः निहत्य तांश्चापि शरैः सुतीक्ष्णैर्न विव्यथे समरे चित्रयोधी ४३ समभ्युदीर्णांश्च तवात्मजांस्तथा निशम्य वीरानभितः स्थितान्रणे

णोजिघांसुस्स्वयं द्रुपदात्मजो युवा प्रमोहनास्त्रं युयुजे महारथः ४४ क्रुद्धो भृशं तव पुत्रेषु राजन्धृष्टद्युम्नः समरे महेन्द्रः ततो यमुधंतरणोनवीना
प्रमोहनास्त्राहतबुद्धिसत्वाः ४५ प्रदुद्रुवुः कुरवश्चैव सवाजिनागाः सरथाः समंतात परीतकालानिव नष्टसंज्ञान्मोहोपेतांस्तव पुत्रान्निशम्य ४६
एतस्मिन्नेव काले तु द्रोणः शस्त्रभृतां वरः द्रुपदं त्रिभिरासाद्य शरैर्विव्याध दारुणैः ४७ सोतिविद्धस्तदा राजन्रणाद्द्रोणेन पार्थिवः अपायाद्द्रुपदो रा
जन्पूर्ववैरमनुस्मरन ४८ जित्वा द्रोणस्तु द्रुपदं शंखं दध्मौ प्रतापवान तस्य शंखस्वनं श्रुत्वा वित्रेसुः सर्वसोमकाः ४९ अथ शुश्राव तेजस्वी
द्रोणः शस्त्रभृतां वरः प्रमोहनास्त्रेण रणे मोहितानात्मजांस्तव ५० ततो द्रोणो राजगृद्धी त्वरितोभ्याययौ रणात तत्रापश्यन्महेष्वासो भारद्वा
जः प्रतापवान ५१ धृष्टद्युम्नं च भीमं च विचरंतौ महारणे मोहाविष्टांश्च ते पुत्रानपश्यत्स महारथः ५२ ततः प्रज्ञास्त्रमादाय मोहनास्त्रं व्य
शातयत अथ प्रत्यागतप्राणास्तव पुत्रा महारथाः ५३ पुनर्युद्धाय समरे प्रययुर्भीमपार्षतौ ततो युधिष्ठिरः प्राह समाहूय स्वसैनिकान
५४ गच्छंतु पदवीं शक्त्या भीमपार्षतयोर्युधि सौभद्रप्रमुखा वीरा रथा द्वादश दंशिताः ५५ प्रवृत्तिमधिगच्छंतु न हि शुध्यति मे मनः त एवं समनु
ज्ञाताः शूरा विक्रांतयोधिनः ५६ बाढमित्येवमुक्त्वा तु सर्वे पुरुषमानिनः मध्यंदिनगते सूर्ये प्रययुः सर्व एव हि ५७ केकया द्रौपदेयाश्च धृष्टकेतु
श्च वीर्यवान अभिमन्युं पुरस्कृत्य महत्या सेनया वृताः ५८ ते कृत्वा समरे व्यूहं सूचीमुखमरिंदमाः बिभिदुर्धार्तराष्ट्राणां तद्रथानीकमाहवे ५९
तान्प्रयातान्महेष्वासानभिमन्युपुरोगमान भीमसेनभयाविष्टा धृष्टद्युम्नविमोहिता ६० न संधारयितुं शक्ता तव सेना नराधिप मदमूर्छा
न्विता नारी प्रमदेवाध्वनि स्थिता ६१ तेभियाय महेष्वासाः स्वर्णविकृतध्वजाः परीप्संतोभ्यधावंत धृष्टद्युम्नवृकोदरौ ६२ तौ च दृष्ट्वा महे
ष्वासानभिमन्युपुरोगमान बभूवतुर्मुदा युक्तौ निघ्नंतौ तव वाहिनीं ६३ दृष्ट्वा च सहसायांतं पांचाल्यो गुरुमात्मनः नाशंसत वधं वीरः पुत्राणां

तवपार्षतः ६४ ततोरथंसमारोप्यवैश्येपस्यवृकोदरः अभ्यधावत्सुसंक्रुद्धोद्रोणमिषुवस्त्रपारगं ६५ तस्यापिपततस्तूर्णंभारद्वाजःप्रतापवान् कु
र्म्बिच्छेदभल्लेनधनुःशत्रुनिषूदनः ६६ अन्यांश्चशतशोवाणान्प्रेषयामासपार्षते दुर्योधनहितार्थायभर्तृपिंडमनुस्मरन् ६७ अथान्यद्धनु
रादायपार्षतःपरवीरहा द्रोणंविव्याधसप्तत्यारुक्मपुंखैःशिलाशितैः ६८ तस्यद्रोणःपुनश्चापंचिच्छेदामित्रकर्षणः हयांश्चचतुरस्तस्यचतुर्भिः
सायकोत्तमैः ६९ वैवस्वतक्षयंघोरंप्रेषयामासभारत सारथिंचास्यभल्लेनप्रेषयामासमृत्यवे ७० हताश्वात्सरथात्तूर्णमवप्लुत्यमहारथः आ
रुरोहमहावाहुरभिमन्योर्महारथं ७१ ततःसरथनागाश्वासमकंपतवाहिनी पश्यतोभीमसेनस्यपार्षतस्यचपश्यतः ७२ तत्प्रभग्नंव
लंदृष्ट्वाद्रोणेनामिततेजसा नाशक्नुवन्वारयितुंसमस्तास्तेमहारथाः ७३ वध्यमानंततस्सैन्यंद्रोणेननिशितैःशरैः अभ्रमत्तत्रतत्रैवक्षु
भ्यमानइवार्णवः ७४ तथादृष्ट्वाचतत्सैन्यंजहृषेचवलंतव दृष्ट्वाचार्यंचसंक्रुद्धंतपंतंरिपुवाहिनी ७५ चुक्रुशुःसर्वतोयोधाःसाधुसाध्विति
भारत इतिभीष्मपर्वणि संजयउवाच ततोदुर्योधनोराजामोहात्प्रागतस्तदा शरवर्षैःपुनर्भीमंप्रत्यवारयदच्युतं १ एकीभूताःपुनश्चैव
तवपुत्रामहारथाः समेत्यसमरेभीमंयोधयामासुरुद्यताः २ भीमसेनोपिसमरेसंप्राप्यस्वरथंपुनः समारुह्यमहावाहुर्ययौयेन तवात्मजः ३
प्रगृह्यचमहावेगंपरासुकरणंदृढं चित्रंशरासनंसंख्येशरैर्विव्याधतेसुतं ४ ततोदुर्योधनोराजनभीमसेनंमहावलं नाराचेनसुतीक्ष्णेनभृशं
मर्मण्यताडयत् ५ सोतिविद्धोमहेष्वासस्तवपुत्रेणधन्विना संरक्तनयनःक्रोधाद्वेगेनोत्क्षिप्यकार्मुकं ६ दुर्योधनंत्रिभिर्वाणैर्वाह्वोरुरसि
चार्पयत् सतथाभिहतोराजन्नाचलद्गिरिराडिव ७ तौदृष्ट्वासमरेक्रुद्धौविनिघ्नंतौपरस्परं दुर्योधनानुजाःसर्वेशूराःसंत्यक्तजीविताः ८ संस्मृ
त्यमंत्रितंपूर्वंनिग्रहेभीमकर्मणः निश्चयंपरमंकृत्वानिग्रहीतुंप्रचक्रमुः ९ तानापततएवाजौभीमसेनोमहावलः अभ्युपयौमहाराजग

जं प्रतिगर्ज्जिव १० भ शंकुअश्वतेजस्वी नाराचेन समर्पयत चित्रसेनं महाराज तव पुत्रं महायशाः ११ तथैव तानि तव सुतांस्ताडयामास भारत शरैर्बहुविधैः
संख्ये रुक्मपुंखैः सुतेजितैः १२ ततः संछाद्य समरे स्वान्यनीकानि सर्वशः अभिमन्युप्रभृतयस्ते द्वादश महारथाः १३ प्रेषिता धर्मराजेन भीमसेनपदा
नुगाः प्रत्युद्ययुर्महाराज तव पुत्रान्महारथान १४ दृष्ट्वा रथस्थांस्तांश्छूरान्सूर्याग्निसमतेजसः सर्वानेव महेष्वासान्भ्राजमानान्श्रियावृतान् १५ महाहवे
दीप्यमानान्सुवर्णविकचोज्ज्वलान् तत्यजुः समरे भीमं तव पुत्रा महाबलाः १६ तान्नामृष्यत कौंतेयो जीवमानान्गतानिति इति भीष्मपर्वणि स३०३
वाच अन्वीयस्य पुनः सर्वांस्तव पुत्रानपीडयत अभिमन्युश्च समरे भीमसेनेन संयुतः १ पार्षतेन च संप्रेक्ष्य तव सैन्ये महारथाः दुर्योधनप्रगृहीतश
रासनाः २ भृशमश्वैः प्रजवितैः प्रययुर्यत्र ते रथाः अपराह्णे ततो राजन्प्रावर्त्तत महारणः ३ तावकानां च बलिनां परेषां चैव भारत अभिमन्युर्वि
कर्णस्य हयान्हत्वा महाहवे ४ अथैनं पंचविंशत्या क्षुद्रकानां समाचिनोत् हताश्वं तं रथं मुत्सृज्य विकर्णस्तु महारथः ५ आरुरोह रथं राजंश्चि
त्रसेनस्य भास्वरं स्थितावेकरथे तौ तु भ्रातरौ कुरुवर्द्धनौ ६ आर्जुनिः शरवर्षेणाच्छादयामास भारत दुर्जयोथ विकर्णश्च कार्ष्णिं पंचभिरायसैः ७ विव्य
धते न चाकंपत्कार्ष्णिर्मेरुरिव स्थितः दुःशासनस्तु समरे केकयान्पंच मारिष ८ योधयामास राजेंद्र तदद्भुतमिवाभवत द्रौपदेया रणे क्रुद्धा दुर्योधनमवार
यन ९ एकैकस्त्रिभिरानर्छत् पुत्रं तव विशांपते पुत्रोपि तव दुर्धर्षो द्रौपद्यास्तनयान्रणे १० सायकैर्निशितै राजन्नाजघान पृथक्पृथक् तैश्चापि नि
र्द्धः शुशुभे रुधिरेण समुक्षितः ११ गिरिः प्रस्रवणैर्यद्वद्धातुभिश्च विमिश्रितैः भीष्मोपि समरे राजन्पांडवानां वरूथिनीम् १२ कालयामास बल
वान्पालः पशुगणानिव ततो गांडीवनिर्घोषः प्रादुरासीद्विशांपते १३ दक्षिणेन वरूथिन्याः पार्थस्यारीन्निनिघ्नतः अत्रस्थुः समरे तत्र कबंधानि स
हस्रशः १४ कुरूणां चापि सैन्येषु पांडवानां च भारत शोणितोदं शिरावर्तं गजाद्वीपं हयोर्मिणं १५ रथनौभिर्नरव्याघ्राः प्रतेरुः सैन्यसागरं छित्त्वा हस्ता

भी०
२५२

विकवचाविरथाश्चनरोत्तमाः १६ पतितास्तत्रदृश्यंतेशतशोथसहस्रशः निहतैर्मत्तमातंगैःशोणितौघपरिप्लुतैः १७ भूर्भातिभरतश्रेष्ठपर्वतैरा
चितायथा तत्राद्भुतमपश्यामतवतेषांचभारत १८ नतत्रासीत्सुमाकश्चिद्योयोद्धुंनाभिकांक्षते एवंयुयुधिरेवीराःप्रार्थयानामहद्यशः १९ तावकाःपांडवैःसा
र्द्धंकांक्षमाणाजयंयुधि इतिभीष्मपर्वणि । संजयउवाच ततोदुर्योधनोराजालोहितायतिभास्करे संग्रामरभसोभीमंहंतुकामोभ्यधावत १ तमायांत
मभिप्रेक्ष्यनवीरंदृढवैरिणां भीमसेनःसुसंक्रुद्धइदंवचनमब्रवीत् २ अयंसकालःसंप्राप्तोवर्षपूगाभिकांक्षितः अद्यत्वांनिहनिष्यामिय
दिनोत्सृजसेरणं ३ अद्यकुंत्याःपरिक्लेशंवनवासंचकृत्स्नशः द्रौपद्याश्चपरिक्लेशंप्रणोत्स्यामिहतेत्वयि ४ यत्त्वंमत्सरीभूत्वापांडवानवमन्य
से तस्यपापस्यगांधारेपश्यव्यसनमागतं ५ कर्णस्यमतमास्थायसौबलस्यचयत्पुरा अचिंत्यपांडवान्कामाद्यथेष्टंकृतवानसि ६ याच
मानंचयन्मोहाद्दाशार्हमवमन्यसे उलूकस्यसमादेशंयद्ददासिचहृष्टवत् ७ तेनत्वांनिहनिष्यामिसानुबंधंसबांधवं शमीकरिष्येतत्पापंय
त्पुराकृतवानसि ८ एवमुक्त्वाधनुर्घोरंविकृष्योद्भ्राम्यचासकृत् समादायशरान्घोरान्महाशनिसमप्रभान् ९ षड्विंशत्तरसाक्रुद्धोमुमो
चाशुसुयोधने ज्वलिताग्निशिखाकारान्वज्रकल्पानजिह्मगान् १० ततोस्यकार्मुकंद्वाभ्यांसूतंद्वाभ्यांचविव्यधे चतुर्भिर्जवनानश्वानन
यद्यमसादनं ११ द्वाभ्यांचसुविकृष्टाभ्यां [illegible] शराभ्यामरिमर्दनः चिच्छेदसमरेछत्रंराज्ञस्तस्यरथोत्तमात् १२ त्रिभिश्चतस्यचिच्छेदज्वलंतंध्व
जमुत्तमं छित्वातच्चननादोच्चैस्तवपुत्रस्यपश्यतः १३ रथाच्चसध्वजःश्रीमान्नानारत्नविभूषितः पपातसहसाभूमौविद्युज्जलधरादिव १४
ज्वलंतंसूर्यसंकाशंनागंमणिमयंशुभं ध्वजंकुरुपतेश्छिन्नंददृशुःसर्वपार्थिवाः १५ अथैनंदशभिर्बाणैस्तोत्रैरिवमहागजं अजिघानरणे
भीमःस्मयन्निवमहारथः १६ ततस्तुराजासिंधूनांरथश्रेष्ठोमहाबलः दुर्योधन [illegible] जग्राहपार्ष्णिंसत्पुरुषैःसह १७ कृपश्चर

स्मृ?

एम०
२५२

थिनां श्रेष्ठः कौरव्यममितौजसं आपपात रथं राजन्दुर्योधनममर्षणं १८ स गाढविद्धो व्यथितो भीमसेनेन संयुगे निषसाद रथोपस्थे राजन्दुर्योधन
स्तदा १९ परिवार्य रणे भीमं हस्तिकाम्बोजयन्त्रयः रथैरनेकसाहस्रैर्भीमस्यावारयन्दिशः २० धृष्टकेतुस्ततो राजन्नभिमन्युश्च वीर्यवान् कैकेया
द्रौपदेयाश्च तव पुत्रानयोधयन् २१ चित्रसेनः सुचित्रश्च चित्रांगश्चित्रदर्शनः सुचारुश्चारुचित्रश्च तथानंदोपनंदकौ २२ अष्टावेते महे
ष्वासाः सुकुमारा यशस्विनः अभिमन्युरथं राजन्समंतात्पर्यवारयन् २३ अजघान ततस्तूर्णमभिमन्युर्महात्मना एकैकं पंचभिर्विध्वा शरैः
संनतपर्वभिः २४ वज्रमृत्युप्रतीकाशैर्विचित्रायुधनिःसृतैः अमृष्यमाणास्ते सर्वे सौभद्रं रथसत्तमं २५ ववर्षुर्मार्गणैस्तीक्ष्णैर्गिरिं मेरु
मिवांबुदाः स पीड्यमानः समरे कृतास्त्रो युद्धदुर्मदः २६ अभिमन्युर्महाराज तावकान्समकंपयत यथा देवासुरे युद्धे वज्रपाणिर्महासुरा
न् २७ विकर्णाय ततो भल्लान्प्रेषयामास भारत चतुर्दश रथश्रेष्ठो घोरानाशीविषोपमान् २८ स तैर्विकर्णस्य रथात्पातयामास वीर्यवा
न् ध्वजं सूतं हयांश्चापं नृत्यमान इवाहवे २९ ततश्चान्यांश्छरान्पीतानकुंठाग्रान्शिलाशितान् प्रेषयामास सौभद्रो विकर्णाय महाबलः ३०
ते विकर्णं समासाद्य कंकबर्हिणवाससः भित्त्वा देहं गता भूमिं ज्वलंत इव पन्नगाः ३१ ते शरा हेमपुंखाग्रा व्यदृश्यंत महीतले विकर्णरुधि
राक्तिन्ना वमंत इव शोणितं ३२ विकर्णं विद्धं निर्भिन्नं तस्यैवान्ये सहोदराः अभ्यद्रवंत समरे सौभद्रप्रमुखान्नृपान् ३३ अभियाय तथैवा
स्वरथान्सूर्यवर्चसः अविध्यन्समरेऽन्योन्यं संरब्धा युद्धदुर्मदाः ३४ दुर्मुखः श्रुतकर्माणं विध्वा सप्तभिराशुगैः ध्वजमेकेन चिच्छेद सा
रथिं चास्य सप्तभिः ३५ अश्वान्जांबूनदैर्जालैः प्रच्छन्नान्वातरंहसः जघान षड्भिरासाद्य सारथिं चाभ्यपातयत् ३६ स हताश्वे रथे तिष्ठ
न्छ्रुतकर्मा महाबलः शक्तिं चिक्षेप संक्रुद्धो महोल्कां ज्वलितामिव ३७ सा दुर्मुखस्य विपुलं वर्म भित्त्वा यशस्विनः विदार्य प्रावि

भी०
२५३

श्रुतसोमो भीमसेनसुतः

शार्दूलमिवैष्यमाणा स्वतेजसा ३८ तं दृष्ट्वा विरथं तत्र सुतसोमो महाबलः पश्यतां सर्वसैन्यानां रथमारोपयत्स्वकं ३९ श्रुतकीर्त्तिर्महावीरो जयत्सेनं
सुतं तव अभ्ययात्समरे राजन्हंतुकामो यशस्विनं ४० तस्य विक्षिपतश्चापं श्रुतकीर्त्तेर्महात्मनः चिच्छेद समरे राजन्जयत्सेनः सुतस्तव ४१ क्षु
रप्रेण सुतीक्ष्णेन प्रहसन्निव भारत तं दृष्ट्वा छिन्नधन्वानं शतानीकः सहोदरं ४२ अभ्यपद्यत तेजस्वी सिंहवद्विनदन्मुहुः शतानीकस्तु सम
रे दृढं विस्फार्य कार्मुकं ४३ विव्याध दशभिस्तूर्णं जयत्सेनं शिलीमुखैः अथान्येन सुतीक्ष्णेन सर्वावरणभेदिना ४४ जयत्सेनं शतानीको
विव्याध समरे भृशं तथा तस्मिन्वर्त्तमाने दुष्कर्णो भ्रातुरंतिके ४५ चिच्छेद समरे चापं नाकुलेः क्रोधमूर्छितः अथान्यद्धनुरादाय भार
साहनमुत्तमं ४६ समास्थाय शरान्घोराञ्छतानीको महाबलः तिष्ठ तिष्ठेति चामंत्र्य दुष्कर्णं भ्रातुरग्रतः ४७ मुमोचास्मै शितान्बाणान्ज्व
लितान्पन्नगानिव ततोऽस्य धनुरेकेन द्वाभ्यां सूतं च मारिष ४८ चिच्छेद समरे तूर्णं तं च विव्याध सप्तभिः अश्वान्मनोजवांश्चास्य कल्माषा
न्वीतकल्मषः ४९ जघान निशितैः तूर्णं सर्वान्द्वादशभिः शरैः अथापरेण भल्लेन सुसुक्तेनारिघातिना ५० दुष्कर्णं समरे राजन्हृदि वि
व्याध पत्रिणा स पपात ततो भूमौ वज्राहत इव द्रुमः ५१ दुष्कर्णं निहितं दृष्ट्वा पंच राजन्महारथाः जिघांसंतः शतानीकं समंतात्प
र्यवारयन् ५२ छाद्यमानं शरव्रातैः शतानीकं यशस्विनं अभ्यधावन्त संक्रुद्धाः केकयाः पंच सोदराः ५३ तानभ्यापततः प्रेक्ष्य त
व पुत्रा महारथान् प्रत्युद्ययुर्महाराज गजा इव महागजान् ५४ दुर्मुखो दुर्जयश्चैव तथा दुर्मर्षणो युवा शत्रुंजयः शत्रुसहः सर्वे क्रुद्धा
यशस्विनः ५५ प्रत्युद्याता महाराज केकयान्भ्रातरः समं रथैर्नगरशंकाशैर्हयैर्युक्तैर्मनोजवैः ५६ नानावर्णविचित्राभिः
पताकाभिरलंकृतैः वरचापधरा वीरा विचित्रकवचध्वजाः ५७ विविशुस्ते परं सैन्यं सिंहा इव वनाद्वनं तेषां सुतुमुलं युद्धमभिव

श्र्वे

दु दुष्कर्णो द्रुपाल नप्तृः

स्तो१ ता१

कारुपद्विपं ५८ आवर्त्तमहारौद्रं निघ्नताममितेरेतरं अन्योन्यागस्कृतां राजन्यमराष्ट्रविवर्द्धनं ५९ मुहूर्त्तोस्तमिते सूर्ये चक्रुर्यु
द्धं सुदारुणं रथिनः सादिनश्चात्र व्यकीर्यंत सहस्रशः ६० ततः शांतनवः क्रुद्धः शरैः सन्नतपर्वभिः नाशयामास तां सेनां भीष्मस्ते
षां महात्मनां ६१ पांचालानां च सैन्यानि शरैर्निन्ये यमक्षयं एवं भित्वा महेष्वासः पांडवानामनीकिनीं ६२ कृत्वावहारं सैन्या
नां ययौ स्वशिबिरं प्रति धर्मराजोपि संप्रेक्ष्य धृष्टद्युम्नवृकोदरौ ६३ मूर्द्धि चैतावुपाघ्राय प्रविष्टः शिबिरं ययौ इति श्रीभीष्मप
र्वणि षष्ठदिवसयुद्धं समाप्तं ॥ ॥ संजय उवाच ॥ ॥ अथ स्वप्त्वा महाराज परस्परकृतागसः जग्मुः स्वशिबिराण्येव रुधि
रेण समुक्षिताः १ विश्रम्य च यथान्यायं पूजयित्वा परस्परं सन्नद्धाः समदृश्यंत भूयो युद्धचिकीर्षया २ ततस्त्वत्सुतो राजंश्चिं
तयाभिपरिप्लुतः विस्रवच्छोणिताक्तांगः पप्रच्छेदं पितामहं ३ सैन्यानि घोराणि भयानकानि व्यूढानि सम्यग्बहुलध्वजानि विहा
य हत्वा च निपीड्य शूराः ते पांडवानां त्वरिता महारथाः ४ संमोह्य सर्वान्युधि कीर्तिमंतो व्यूहं च तं मकरं वज्रकल्पं प्रविश्य भीमेन
निबर्हितोस्मि घोरैः शरैर्मृत्युदंडप्रकाशैः ५ क्रुद्धं समुद्वीक्ष्य भयेन राजन्संमूर्छितो न लभे शांतिमद्य इच्छे प्रसादात्तव सत्य
संध प्राप्तुं जयं पांडवेयांश्च हंतुं ६ तेनैवमुक्तः प्रहसन्महात्मा दुर्योधनं ज्ञानमतिर्विदित्वा तं प्रत्युवाचाविमना मनस्वी गंगासु
तः शस्त्रभृतां वरिष्ठः ७ परेण यत्नेन विगाह्य सेनां सर्वात्मनाहं तव राजपुत्र इच्छामि दातुं विजयं सुखं च न चात्मानं छादये
यं त्वदर्थे ८ एते तु रौद्रा बहवो महारथा यशस्विनः शूरतमाः कृतास्त्राः ये पांडवानां समरे सहाया जितक्लमाः क्रोधविषं वमं

मी.
११४

तः ९ नैनेहशक्याः सहसाविजेतुंवीर्यान्वताः कृतवैरास्त्वयाच अहंह्येतान्प्रतियोत्स्यामि राजन्सर्वात्मनाजीवितंत्यज्य वी
रः १० रणेतवार्थायमहानुभावंजीवितंरक्षितव्यंमयाद्य सर्वात्मनार्थोपसदेववैद्त्वां लोकान्देहेयं किमुशत्रूंस्तवेह तानप्यंड
वान्योधयिष्यामि राजन्प्रियंचतेसर्वमहंकरिष्ये श्रुत्वैवचैनत्परमप्रतीतोदुर्योधनः शांतनवंबभूव १२ सर्वाणिसैन्यानि
ततः प्रहृष्टोनिर्गच्छतेत्याहनृपांश्चसर्वान् तदाज्ञयातातविनिर्ययुस्तद्रथाश्वपादातगजायुतानि १३ प्रहर्षयुक्तानितुता
निराजन्महांतिनानाविधशस्त्रवंति स्थितानिनागाश्वपदातिमंतिविरेजुराजन्बलानि १४ वृंदैः स्थिताश्चापिसुसंप्रयुक्ता
श्चकाशिरेदंतिगणाः समंतात् शस्त्रास्त्रविद्भिर्नरदेवयोधैरवस्थिताः सैन्यगणास्त्वदीयाः १५ तथाश्वपादातगजाश्चस
धैः प्रयान्दिराजौविधिवत्प्रणुन्नैः समुद्धतेवेतरुणार्कवर्णोरजोबभौच्छादयदंशुमंतं १६ रेजुः पताकारथदंतिसंस्था
वातेरिताभ्राम्यमाणाः समंतात् नानारंगाः समरेतत्रराजन्मेघैर्युक्ताविद्युतः खेयथैव १७ धनूंषिविस्फारयतांनृपाणांबभू
वशब्दस्तुमुलोतिघोरः विमथ्यतोदेवमहासुरौघैर्यथार्णवस्यादियुगेतदानीं १८ तदुग्रनादंबहुवर्णरूपंतवात्मजानांस
मुदीर्णवर्णंबभूवसैन्यंरिपुसैन्यहंतृयुगांतमेघौघनिभंतदानीं १९ इतिभीष्मपर्वणि संजयउवाच तथात्मजंतवपु
नर्गांगेयोध्यानमास्थितं अब्रवीद्भरतश्रेष्ठसंप्रहर्षकरंवचः अहंद्रोणाश्चशल्यश्चकृतवर्माचसात्वतः अश्वत्थामाविकर्णो
श्चभगदत्तश्चसौबलः २ विंदानुविंदावावंत्यौबाह्लीकः सहबाह्लीकैः त्रिगर्तराजश्चबलीमागधश्चसुदुर्जयः ३ बृहद्बल

श्चकोशल्यश्चित्रसेनोविविंशतिः रथाश्चवहुसाहस्राः शोभमानामहाध्वजाः ४ नानादेशसमुत्पन्नास्त्वदर्थेयोद्धुमुद्यताः
एतेचान्येचवहवस्त्वदर्थेसक्तजीविताः ५ देवानमपिरोजेतुंसमर्थाइतिमेमतिः अवश्यंतुमयाराजंस्तववाच्यंहितंसदा ६
अशक्याः पांडवाजेतुंदेवैरपिसवासवैः वासुदेवसहायाश्चमहेंद्रसमविक्रमाः ७ सर्वथाहंतुराजेंद्रकरिष्येवचनंतव पांडवा
न्वारणेजेष्यामिमांवाजेष्यंतिपांडवाः ८ एवमुक्त्वाददौचास्मैविशल्यकरणींशुभां ओषधींवीर्यसंपन्नांविशल्यश्चाभवत्तदा ९
ततः प्रभातेविमलेस्वेनानीकेनवीर्यवान् अव्यूहतस्वयंवीरोव्यूहंव्यूहविशारदः १० मंडलंभरतश्रेष्ठनानाशस्त्रसमाकुलं सं
पूर्णंयोधमुख्यैश्चतथादंतिपदातिभिः ११ रथैरनेकसाहस्रैः समंतात्परिवारितं अश्ववृंदैर्महद्भिश्चर्ष्टितोमरधारिभिः १२
नागेनागेरथाः सप्तसप्तचाश्वारथेरथे अश्वेश्वेचर्मिणः सप्तधानुष्काः सप्तचर्मिणः १३ एवंव्यूहंमहाराजतवसैन्यंमहारथैः
स्थितंरणायमहतेभीष्मेणपरिवारितं १४ दशाश्वानांसहस्राणिदंतिनांचतथैवच रथानामयुतंचापिपुत्राश्चतवदंशिताः
१५ चित्रसेनादयः शूराअभ्यरक्षन्पितामहं रक्ष्यमाणश्चतैः शूरैर्गोप्यमानाश्चतेनते १६ सन्नद्धाः समदृश्यंतराजानस्तेमहा
बलाः दुर्योधनस्तुसमरेदंशितोरथमास्थितः १७ व्यराजतश्रियायुक्तोयथाशक्रस्त्रिविष्टपे ततः शब्दोमहानासीत्पुत्राणांतव
भारत १८ रथघोषश्चविपुलोवादित्राणांचनिःस्वनः भीष्मेणधार्तराष्ट्राणांव्यूहः प्रत्यङ्मुखोययौ १९ मंडलः सुमहाना
सीद्दुर्भेद्योमित्रघातिना सर्वतः शुशुभेराजन्रणेरीणांदुरासदः २० मंडलंतुसमालोक्यव्यूहंपरमदारुणं स्वयंयुधिष्ठिरो रा

जायहंवज्रमथाकरोत् ॥ २१ तथाक्रुद्धेष्वनीकेषु यथास्थानमवस्थिताः रथिनः सादिनश्चैव सिंहनादमथानदन् २२ विभिन्न
तो व्यूहं निर्ययुर्युद्धकांक्षिणः इतरेतरतः शूराः सहसेनाः प्रहारिणः २३ भारद्वाजो ययौ मत्स्यं द्रौणिश्चापि शिखंडिनं स्वयं दुर्योध
नो राजा पार्षतं समुपाद्रवत् २४ नकुलं सहदेवं च राजन्मद्रेशमीयतुः विंदानुविंदावावंत्यौ युधामन्युमभिद्रुतौ २५ सर्वे नृपास्तु स
मरे धनंजयमयोधयन् भीमसेनं रणे यत्तो हार्दिक्यः समवारयत् २६ चित्रसेनं विकर्णं च तथा दुर्मर्षणं विभो आर्जुनिः समरे राज
न्तव पुत्रानयोधयत् २७ प्राग्ज्योतिषं तु राजानं हैडिंबो राक्षसोत्तमः अभिदुद्राव वेगेन मत्तो मत्तमिव द्विपं २८ अलंबुषस्ततो राजन्
सात्यकिं युद्धदुर्मदं ससैन्यं समरे क्रुद्धो राक्षसः समभिद्रवत् २९ भूरिश्रवा रणे यत्तो धृष्टकेतुमयोधयत् श्रुतायुषं तु राजानं
धर्मपुत्रो युधिष्ठिरः ३० चेकितानस्तु समरे कृपमेवान्वयोधयत् शेषाः प्रतिययुर्यत्ता भीमसेनं महारथं ३१ ततो राजसहस्राणि
परिवव्रुर्धनंजयं शक्तितोमरनाराचगदापरिघपाणयः ३२ अर्जुनोऽथ भृशं क्रुद्धो वार्ष्णेयमिदमब्रवीत् पश्य माधव सैन्यानि धार्त
राष्ट्रस्य संयुगे ३३ व्यूढानि व्यूहविदुषा गांगेयेन महात्मना युद्धाभिकामाञ्छूरांश्च पश्य माधव दंशितान् ३४ त्रिगर्त्तराजसहितं
भ्रातृभिः पश्य केशव अद्यैतान्घातयिष्यामि पश्यतस्ते जनार्दन ३५ य इमे मां यदुश्रेष्ठ योद्धुकामा रणाजिरे एतावदुक्त्वा कौंतेयो
धनुर्ज्यामवमृज्य च ३६ ववर्ष शरवर्षाणि नराधिपगणान्प्रति तेऽपि तं परमेष्वासाः शरवर्षैरपूरयन् ३७ तडागमिव धाराभिर्य
था प्रावृषि तोयदाः हाहाकारो महानासीत्तव सैन्ये विशांपते ३८ छाद्यमानौ भृशं कृष्णौ शरैर्दृष्ट्वा महारणे देवा देवर्षयश्चैव गं
धर्वाश्च महोरगाः ३९ विस्मयं परमं जग्मुर्दृष्ट्वा कृष्णौ तथाचितौ ततः क्रुद्धोऽर्जुनो राजन्नैंद्रमस्त्रमुदीरयत् ३० तत्राद्भुतमप

रणामिविजयस्यपराक्रमं शस्त्रवृष्टिंपरैर्मुक्तांशरैर्घोरैर्वारयत ३१ नचशस्त्रैरनिर्भिन्नंकश्चिदासीद्विशांपते एषांराजसहस्त्राणांहयानांदंतिनां
तथा ३२ द्वाभ्यांशरैस्त्रिभिश्चान्यान्पार्थोविव्याधमारिष तेहन्यमानाः पार्थेनभीष्मंशांतनवंययुः ३३ अगाधेमज्जमानानांभीष्मस्त्राताता
ह्यभवत् आपतन्स्थितेस्तत्रप्रभग्नंतावकंबलं ३४ संचुक्षुभेमहाराजवातैरिवमहार्णवः इतिश्रीमहाभारतेभीष्मपर्वणि ॥ ॥
संजयउवाच तथाप्रवृत्तेसंग्रामेनिवृत्तेचसुशर्मणि प्रभग्नेषुचवीरेषुपांडवेनमहात्मना १ क्षुभ्यमाणेबलेतूर्णंसागरप्रतिमेतव प्रत्युद्या
तेचगांगेयेत्वरितंविजयंप्रति २ दृष्ट्वादुर्योधनोराजन्रणेपार्थस्यविक्रमं त्वरमाणःसमभ्येत्यसर्वांस्तानब्रवीन्नृपान् ३ तेषांचप्र
मुखेशूरंसुशर्माणंमहाबलं मध्येसर्वस्यसैन्यस्यभृशंसंहर्षयन्वचः ४ एषभीष्मःशांतनवोयोद्धुकामोधनंजयं सर्वात्मनाकुरु
श्रेष्ठस्त्यक्त्वाजीवितमात्मनः ५ तंप्रयांतंपरानीकंसर्वसैन्येनभारत संयत्ताःसमरेसर्वेपालयध्वंपितामहं ६ वाढमित्येवमु
क्त्वातुतान्यनीकानिसर्वशः नरेंद्राणांमहाराजसमाजग्मुःपितामहं ७ ततःप्रयातःसहसाभीष्मःशांतनवोर्जुनं रणेभारतमा
यांतमाससादमहाबलं ८ महाश्वेताश्वयुक्तेनभीमवानरकेतुना महतामेघनादेनरथेनातिविराजता ९ समरेसर्वसैन्याना
मुपयांतंधनंजयं अभवत्तुमुलोनादोभयाद्दृष्ट्वाकिरीटिनं १० अभीषुहस्तंकृष्णंचदृष्ट्वादित्यमिवापरं मध्यंदिनगतंसंख्येनशेकु
रभिवीक्षितुं ११ तथाशांतनवंभीष्मंश्वेताश्वंश्वेतकार्मुकं नशेकुःपांडवाद्रष्टुंश्वेतंग्रहमिवोदितम् १२ ससर्वतःपरिवृतस्त्रिगर्तैः
सुमहात्मभिः भ्रातृभिस्तवपुत्रैश्चतथान्यैश्चमहारथैः १३ भारद्वाजस्तुसमरेमत्स्यंविव्याधपत्रिणा ध्वजंचास्यशरेणाजौधनु
श्चैकेनचिच्छिदे तदपास्यधनुश्छिन्नंविराटोवाहिनीपतिः अन्यदादत्तवेगेनधनुर्भारसहंदृढं १५ शरांश्चाशीविषाकारान्ज्व

प्र ५

भी·प·
१२६

लितान्पन्नगानिव द्रोणस्त्रिभिः प्रविव्याध चतुर्भिश्चास्य वाजिनः १६ ध्वजमेकेन विव्याध सारथिं चास्य पंचभिः धनुश्चैकेषुणा विध्य त्रात्क्रुद्धो द्विजर्ष
भः १७ तस्य द्रोणोवधीदश्वांश्चैरैः सन्नतपर्वभिः अष्टाभिर्भरतश्रेष्ठ सूतमेकेन पत्रिणा १८ स हताश्वाद्वप्लुत्य स्यंदनाद्धतसारथिः आ
रुरोह रथं तूर्णं [illegible] पुत्रस्य रथिनां वरः १९ ततः स तौ पितापुत्रौ भारद्वाजं रथस्थितौ महता शरवर्षेण वारयामासतुर्बलात् २० भर
द्वाजस्ततः क्रुद्धः शरमाशीविषोपमं चिक्षेप समरे तूर्णं शंखं प्रति जनेश्वर २१ स तस्य हृदयं भित्त्वा पीत्वा शोणितमाहवे जगाम धरणीं बाणो लोहिता
र्द्रकृतच्छविः २२ स पपात रथात्तूर्णं भारद्वाजशराहतः हित्वा धनुः शरांश्चैव पितुरेव समीपतः २३ हतं स्वमात्मजं दृष्ट्वा विराटः प्राद्रवद्भयात्
उत्सृज्य समरे द्रोणं व्यात्ताननमिवांतकं २४ भारद्वाजस्ततस्तूर्णं पांडवानां महाचमूं वारयामास समरे शतशोथ सहस्रशः २५ शिखंड्यपि
महाराज द्रोणिमासाद्य संयुगे आजघान भ्रुवोर्मध्ये नाराचैस्त्रिभिराशुगैः २६ स बभौ नरशार्दूलो ललाटे संस्थितैस्त्रिभिः शिखरैः कांचनमये
र्मेरुस्त्रिभिरिवोच्छ्रितैः २७ अश्वत्थामा ततः क्रुद्धो निमेषार्द्धाच्छिखंडिनः स तं रथमथो राजंस्तुरगानायुधं ध्वजं २८ शरैर्बहुभिरुच्छिद्य पात
यामास संयुगे स हताश्वाद्वप्लुत्य रथाद्वै रथिनां वरः २९ खड्गमादाय निशितं विमलं च शरावरं श्येनवद्विचरत्क्रुद्धः शिखंडी शत्रुतापनः
३० सखड्गस्य महाराज चरतस्तस्य संयुगे नांतरं ददृशे द्रोणिस्तदद्भुतमिवाभवत् ३१ ततः शरसहस्राणि बहूनि भरतर्षभ प्रेषयामास समरे द्रो
णिः परमकोपनः ३२ तमापतंतीं समरे शरवृष्टिं सुदारुणां असिना तीक्ष्णधारेण चिच्छेद बलिनां वरः ३३ ततोस्य विमलं द्रोणि
[illegible] शतचंद्रं मनोरमं चर्म च्छित्वासिं चास्य खंडयामास संयुगे ३४ शरैश्च बहुशो राजंस्तं च विव्या
ध पत्रिभिः शिखंडी तु ततः खड्गं खंडितं तेन सायकैः ३५ आविध्य व्यसृजत्तूर्णं ज्वलंतमिव पन्नगं तमापतंतं सहसा वज्रासनिसम

स्तनं ३६ चिच्छेदसमरेद्रौणिर्दर्शयन्पाणिलाघवं शिखंडिनंचविव्याधशरैर्बहुभिरायसैः ३७ शिखंडीतुभृशंराजंस्ताड्यमानःशितैःशरैः
आरुरोहरथंतूर्णंमाधवस्यमहात्मनः ३८ सात्यकिश्चापिसंक्रुद्धोराक्षसंतंमहाहवे अलंबुषंशरैर्घोरैर्विव्याधबलिनंबली ३९ राक्षसेंद्र
स्ततस्तस्यधनुश्चिच्छेदभारत अर्द्धचंद्रेणसमरेतंचविव्याधसायकैः ४० मायांचराक्षसींकृत्वाशरवर्षैरवाकिरत् तत्राद्भुतमपश्यामशैनेयस्यप
राक्रमं ४१ नासंभ्रमद्यत्समरेवध्यमानःशितैःशरैः ऐंद्रमस्त्रंचवार्ष्णेयोयोजयामासभारत ४२ विजयाद्यत्तुप्राप्तंमाधवेनमहात्मना तदस्त्र
भस्मसात्कृत्वामायांतांराक्षसींतदा ४३ अलंबुषंशरैर्घोरैरभ्याकिरतसर्वशः पर्वतंवारिधाराभिःप्रावृषीवबलाहकः ४४ तत्तथापीडितंतेनमाध
वेनयशस्विना प्रदुद्रावभयाद्रक्षोहित्वासात्यकिमाहवे ४५ तमजेयंरणेसेंद्रंसंख्येमघवतास्वपिशैनेयःप्राणदज्जित्वायोधानांतवपश्यतां
४६ अवधीत्तावकांश्चापिसात्यकिःसत्यविक्रमः निशितैर्बहुभिर्बाणैस्तेऽद्रवंतभयार्दिताः ४७ एतस्मिन्नेवकालेतुद्रुपदस्यात्मजोबली धृ
ष्टद्युम्नंचसमरेतूर्णंविव्याधपत्रिणा ५० षष्ट्याचत्रिंशताचैवतदद्भुतमिवाभवत् तस्यसेनापतिःक्रुद्धोधनुश्चिच्छेदमारिष ५१ हयांश्च
तुरःशीघ्रंनिजघानमहाबलः शरैश्चैनंसुनिशितैःक्षिप्रंविव्याधसप्तभिः ५२ सहताश्वान्महाबाहुरवप्लुत्यरथाद्बली पदातिरसिमुद्यम्यप्राधा
वत्पार्षतंप्रति ५३ शकुनिस्तुसमभ्येत्यराजगृद्धीमहाबलः राजानंसर्वलोकस्यरथमारोपयत्स्वकं ५४ ततोनृपंपराजित्यपार्षतःपरवीर
हा निजघ्नेतावकंसैन्यंवज्रपाणिरिवासुरान् ५५ कृतवर्मारणेभीमंशरैराछन्महारथं प्रच्छादयामासचतंमहामेघोरविंयथा ५६ त
तःप्रहस्यसमरेभीमसेनःपरंतपः प्रेषयामाससंक्रुद्धःसायकान्कृतवर्मणे ५७ तैर्हन्यमानोविरथःसात्वतःशस्त्रकोविदः नाकंपतम
हाराजभीममभ्याच्छिनच्छरैः ५८ तस्याश्वांश्चतुरोहत्वाभीमसेनोमहाबलः सारथिंपातयामासध्वजंचसुपरिष्कृतं ५९ शरैर्बहुविधै

एनेदुर्यो धनाः ५

४१ दुर्योधनधृ ष्टद्युम्नयोर्युद्धं

श्चैनमाचिनोत्परवीरहा शकलीकृतसर्वांगः श्वाविद्वत्समदृश्यत ३० हताश्वाच्चरथात्तूर्णंवृषकस्यरथंययौ श्यालस्यतेमहाराजतव
पुत्रस्यपश्यतः ३१ भीमसेनोपिसंक्रुद्धः त्वत्सैन्यंसमाद्रवत् निजघानचसंक्रुद्धो दंडपाणिरिवांतकः इतिभीष्मपर्वणि धृतराष्ट्रउवा॰
सुबहूनिविचित्राणिद्वैरथानिचसंजय पांडूनांमामकैः सार्द्धमश्रौषंतवजल्पतः १ नचैवमामकंकिंचिद्धृष्टंशंससिसंजय नित्यंपां
डुसुतान्हृष्टानभग्नांश्चैवशंससि २ जीयमानान्विमनसोमामकान्विगतौजसः वदसेसंयुगेसूतदिष्टमेवनसंशयः ३ संजयउवाच
यथाशक्तियथोत्साहंयुद्धेचेष्टंतितावकाः दर्शयंतःपरंशक्त्यापौरुषंपुरुषर्षभाः ४ गंगायाःसुरनद्यावैस्वादुभूतंयथोदकं महोदधिगुणा
भ्यासाल्लवणत्वंनियच्छति ५ तथातत्पौरुषंराजंस्तावकानांमहात्मनां प्राप्यपांडुसुतान्वीरान्व्यर्थीभवतिसंयुगे ६ घटमानान्यथाश
क्तिकुर्वाणान्कर्मदुष्करं नदोषेणकुरुश्रेष्ठस्तान्योधान्गंतुमर्हसि ७ तवापराधात्सुमहान्सपुत्रस्यविशांपते पृथिव्याःप्रक्षयोघोरो
यमराष्ट्रविवर्द्धनः ८ आत्मदोषसमुत्पन्नंशोचितुंनार्हसेनृप नहिरक्षंतिराजानःसर्वथात्रापिजीवितं ९ युद्धेनसुकृतान्लो
कानिछंतिवसुधाधिपाः चमूंविगाह्ययुध्यंतेनित्यंस्वर्गपरायणाः १० पूर्वाह्णेतुमहाराजप्रावर्त्ततजनक्षयः तन्ममेकमनाभूत्वा
शृणुदेवासुरोपमं ११ आवंत्यौतुमहेष्वासौमहात्मानौमहाद्युती इरावंतमभिप्रेत्यसमेयातांरणोत्कटौ १२ तेषांप्रववृतेयुद्धंतु
मुलंलोमहर्षणं इरावांस्तुसुसंक्रुद्धोभ्रातरौदेवरूपिणौ १३ विव्याधनिशितैस्तूर्णंशरैःसन्नतपर्वभिः तावेतंप्रत्यविध्येतांसमरेचित्रयो
धिनौ १४ युध्यतांहिततोराजन्विशेषोनस्मदृश्यते यततांशत्रुनाशायकृतप्रतिकृतैषिणां १५ इरावांस्तुरणेराजन्ननुविंदस्यसायकैः
चतुर्भिश्चतुरोवाहाननयद्यमसादनं १६ भल्लाभ्यांसुतीक्ष्णाभ्यांधनुःकेतुंचमारिष चिच्छेदसमरेराजंस्तदद्भुतमिवाभवत् १७ त्यक्त्वानुविंदो

प्र६

यरथंविंदस्मरथमास्थितः धनुर्गृहीत्वासुदृढंभारसाहमनुत्तमं १८ तावेकस्थौरणेवीरावावंतौबलिनांवरौ शरान्मुमुचतुस्तूर्णंगिरावतिमहा
त्मनि १९ ताभ्यांमुक्तामहावेगाः शराः कनकभूषणाः दिवाकरपथंप्राप्यछादयामासुरंबरं २० इरावांस्तुरणेक्रुद्धोभ्रातरौतौमहारथौ
ववर्षशरवर्षेणसारथिंचाभ्यपातयत् २१ तस्मिन्निपतितेराजन्नानमत्वेषसारथौ रथः प्रदुद्रावदिशः समुद्भ्रांतहयस्ततः २२ तौसजित्वा
महाराजनागराजसुतासुतः पौरुषंख्यापयंस्तूर्णमवधमत्तववाहिनी २३ सावध्यमानासमरेधार्तराष्ट्रीमहाचमूः वेगान्बहुविधां
श्चक्रेविषंपीत्वेवमानवः २४ हैडिंबोराक्षसेंद्रस्तुभगदत्तंसमाद्रवत् रथेनादित्यवर्णेनसध्वजेनमहाबलः २५ ततः प्राग्ज्योतिषो
राजानागराजंसमास्थितः यथावज्रधरः पूर्वंसंग्रामेतारकामये २६ तत्रदेवाः सगंधर्वाऋषयश्चसमागताः विशेषंनस्मविंदंतिहै
डिंबभगदत्तयोः २७ यथासुरपतिः शक्रस्त्रासयामासदानवान् तथैवसमरेराजाद्रावयामासपांडवान् २८ तेनविद्राव्यमाणा
स्तेपांडवाः सर्वतोदिशं त्रातारंनाभ्यविंदंतस्वेष्वनीकेषुभारत २९ भैमसेनिंरथस्थंतुतत्रापश्याममभारत शेषाविमनसोभूत्वाप्राद्रवं
तमहारथाः ३० निवृत्तेषुतुपांडूनांपुनः सैन्येषुभारत आसीन्निष्ठानकोघोरस्तवसैन्यस्यसंयुगे ३१ घटोत्कचस्ततोराजन्भगदत्तंमहा
रणे शरैः प्रच्छादयामासमेरुंगिरिमिवांबुदः ३२ निहत्यतांछरान्राजाराक्षसस्यधनुश्च्युतान् भैमसेनिंरणेतूर्णंसर्वमर्मस्वताडय
त् ३३ सताड्यमानोबहुभिः शरैः सन्नतपर्वभिः नविव्यथेराक्षसेंद्रोभिद्यमानइवाचलः ३४ तस्यप्राग्ज्योतिषः क्रुद्धस्तोमरान्सच
तुर्दश प्रेषयामाससमरेतांश्चचिच्छेदराक्षसः ३५ सतांछित्वामहाबाहुस्तोमरान्निशितैः शरैः भगदत्तंचविव्याधसप्तत्याकंकपत्रि
भिः ३६ ततः प्राग्ज्योतिषोराजाप्रहसन्निवभारत तस्याश्वांश्चतुरोराजन्पातयामाससायकैः ३७ सहताश्वेरथेतिष्ठन्राक्षसेंद्रःप्रतापवान्

म